# MASTERS OF ARTS
# IN
# SANSKRIT

## CLASSICAL LITERATURE

**Paper-14**

UTKAL UNIVERSITY

NAAC ACCREDITED A+


**UTKAL UNIVERSITY**

**VANI VIHAR, BHUBANESWAR, ODISHA-751004**

**DIRECTORATE OF DISTANCE & CONTINUING EDUCATION**
**UTKAL UNIVERSITY : VANI VIHAR**
**BHUBANESWAR-751007**

**From the Director's Desk**

The Directorate of Distance & Continuing Education, originally established as the University Evening College way back in 1962 has travelled a long way in the last 52 years. 'EDUCATION FOR ALL' is our motto. Increasingly the Open and Distance Learning institutions are aspiring to provide education for anyone, anytime and anywhere. DDCE, Utkal University has been constantly striving to rise up to the challenges of Open Distance Learning system. Nearly one lakh students have passed through the portals of this great temple of learning. We may not have numerous great tales of outstanding academic achievements but we have great tales of success in life, of recovering lost opportunities, tremendous satisfaction in life, turning points in career and those who feel that without us they would not be where they are today. There are also flashes when our students figure in best ten in their honours subjects. Our students must be free from despair and negative attitude. They must be enthusiastic, full of energy and confident of their future. To meet the needs of quality enhancement and to address the quality concerns of our stake holders over the years, we are switching over to self instructional material printed courseware. We are sure that students would go beyond the course ware provided by us. We are aware that most of you are working and have also family responsibility. Please remember that only a busy person has time for everything and a lazy person has none. We are sure, that you will be able to chalk out a well planned programme to study the courseware. By choosing to pursue a course in distance mode, you have made a commitment for self improvement and acquiring higher educational qualification. You should rise up to your commitment. Every student must go beyond the standard books and self instructional course material. You should read number of books and use ICT learning resources like the internet, television and radio programmes etc. As only limited number of classes will be held, a student should come to the personal contact programme well prepared. The PCP should be used for clarification of doubt and counselling. This can only happen if you read the course material before PCP. You can always mail your feedback on the course ware to us. It is very important that one should discuss the contents of the course materials with other fellow learners.

We wish you happy reading.

**DIRECTOR**

## Paper-14. Classical Literature (Sahitya)Prose & Poetry

Unit-I. Vasavadatta - Introductory verses till 'Kathayitumarebhe.'

Unit-II. Vasavadatta - From 'Asti mandaragiri' upto the end of 'pratyaksadrsta Bhava-pina pratyam yuvatih',

Unit-III. Gitagovindam Ch-I to VI

Unit-IV. Amaru-shataka (According to Arjunavarma Deva's edition) Slokas1-50

Unit-V. Modern Sanskrit - Selected poems from Kavidvadashi Akasoham visalah, Krstih, Margah, Bhukampottaram, Vismrtapi sa katha,

**Books Recommended:**


1. Vasavadatta, A Sanskrit Romance of Subandhu, Ed. by Louis H. Gray, Delhi, 1962.
2. Vasavadatta with Comm. Capala, Ed. by Pandit Shankar Dev Sastri
3. Vasavadatta of Subandhu – Chowkhamba Publication, Varanasi.
4. Gitagovindam or the love song of the dark lord, (Ed.) B.S. Miller, MLBD, Delhi.
5. Gitagovindam (Ed.) Bhagaban Panda, Dept. of Culture, Govt, of Orissa.
6. Gitagovindam with Rasikapriya, Chowkhamba Publication, Varanasi.
7. Kavidvadasi, Sanskrit Parisad, (Ed.) R.V. Tripathy, H.S. Gaur University, Sagar, 2006.

**इकाई-प्रथम**

सुबन्धुप्रणीता

# वासवदत्ता

'शशिप्रभा' संस्कृतहिन्दीव्याख्योपेता

## ( मङ्गलाचरणम् )

**करबदरसदृशमखिलं भुवनतलं यत्प्रसादतः कवयः।**

**पश्यन्ति सूक्ष्ममतयः सा जयति सरस्वती देवी॥१॥**

**अन्वय**—यत्प्रसादतः सूक्ष्ममतयः कवयः अखिलं भुवनतलं करबदरसदृशं पश्यन्ति सा सरस्वती देवी जयति।

**संस्कृतव्याख्या**—स्वगद्यरचनायाः वासवदत्तायाः निर्विघ्नसमाप्तये सुधियासु प्रचारप्रसाराय च सरस्वत्याः जयकाररूपेण मङ्गलमाचरति—**करबदरेति। यत्प्रसादतः** यस्याः सरस्वत्याः देव्याः प्रसादतः अनुग्रहेण **सूक्ष्ममतयः** सूक्ष्मा तीव्रा मतिर्बुद्धिर्येषां ते तीव्रधियः अल्पधियः वा **कवयः** काव्यकर्त्तारः **अखिलं** निखिलं **भुवनतलं** चराचराचरजगत् **करबदरसदृशं** करे हस्ते बदरं बदरीफलं तत्सदृशं **पश्यन्ति** विलोकयन्ति। अनायासेन यथार्थरूपेण सकलं जगत् विजानन्तीत्यर्थः । **सा** एतादृशी महिमामण्डिता प्रसिद्धा वा **सरस्वती देवी** वागधिष्ठातृदेवता **जयति** जयं प्राप्नोतिः सर्वोत्कृष्टा विद्यते इत्यर्थः। **पक्षान्तरे यत्प्रसादतः** यस्याः नद्याः निर्मलतया **सूक्ष्ममतयः** अल्पधियः कवयः कं जलं तस्य वयः पक्षिणः जलपक्षिणः इत्यर्थः, **अखिलं** सम्पूर्णं **भुवनतलं** जलतलं **करबदरसदृशं** हस्ते बदरीफलसदृशं **पश्यन्ति** विलोकयन्ति, द्रष्टुं समर्थाः भवन्तीत्यर्थः **सा** एतादृशी निर्मलजला **सरस्वती देवी** सरस्वती नाम प्रसिद्धा निर्मलजला नदी **जयति** सर्वोत्कृष्टा विद्यते। अत्र सरस्वत्याः गुणकीर्त्तनरूपं मङ्गलाचरणम्। आर्यावृत्तम्।

**खिन्नोऽसि मुञ्च शैलं बिभृमो वयमिति वदत्सु शिथिलभुजः।**

**भरभुग्नविततबाहुषु गोपेषु हसन् हरिर्जयति।।२।।**

**अन्वय–**खिन्नः असि शैलं मुञ्च वयं विभृमः इति वदत्सु भरभुग्नविततबाहुषु गोपेषु शिथिलभुजः हसन् हरिः जयति। पक्षान्तर- अन्वय-खिन्नः असि, (अस्मान्) मुञ्च, वयं शैलं विभृमः इति भरभुग्नविततबाहुषु गोपेषु वदत्सु शिथिल-भुजः हसन् हरिः जयति।

**संस्कृतव्याख्या–**हे कृष्ण! गोवर्धनधारणेन खिन्नः परिश्रान्तः असि अत एव **शैलं** एतत्पर्वतं **मुञ्च** परित्यज। वयं सर्वे गोपाः एनं **विभृमः** धारयामः इति अनेन प्रकारेण **वदत्सु** कथयत्सु **भरभुग्नविततबाहुषु** भरेण गोवर्धनभारेण भुग्नाः कुटिलाः वितताः विस्तृताः प्रलम्बाः बाहवः भुजः येषां तेषु **हसन् शिथिलीभुजः** शिथिलः शिथिलीकृतः न तु पूर्णरूपेण व्यक्तः भुजः बाहुः येन तादृशः **हरिः** श्रीकृष्णः **जयति** सर्वश्रेष्ठः विद्यते। **पक्षान्तरे–**कृष्णकथनानुसारं गोवर्धनं पूजयतः नन्दादयः गोपाः इन्द्रं कथयन्ति–हे इन्द्र! गोवर्धनपूजया त्वं **खिन्नः** दुःखी असि, **अस्मान्** गोपान् **मुञ्च** परित्यज, **वयं** गोपाः **शैलं** गोवर्धनपर्वतं **विभृमः** पूजयामः **इति** एवं प्रकारेण **भरभुग्नविततबाहुषु** भरेण दृढेन भग्नेन निश्चयेन वितताः बाहवः येषां तादृशेषु **गोपेषु वदत्सु** कथयत्सु **हविर्भुजः** हविषं भोजयतीति तादृशः इन्द्रः तस्मात् **हसन्** हरिः श्रीकृष्णः **जयति** श्रेष्ठः अस्ति।

**कठिनतरदामवेष्टनलेखासन्देहदायिनो यस्य।**

**राजन्ति बलिविभङ्गाः स पातु दामोदरो भवतः।।३।।**

**अन्वय–**यस्य कठिनतरदामवेष्टनलेखासन्देहदायिनः बलिविभङ्गा राजन्ति, सः दामोदरः भवतः पातु।

**संस्कृतव्याख्या–यस्य** कृष्णस्य **कठिनतरदामवेष्टनलेखासन्देहदायिनः** कठिनतरेण अतिकठोरेण दाम्ना रज्वा यद्वेष्टनं बन्धनं यद्वा कठिनतरम् अतिदृढं दाम्ना रज्वा यद्वेष्टनं बन्धनं तस्य लेखाणां रेखाणां सन्देहं संशयं दातुम्

उत्पादयितुं शीलं येषां ते **बलिविभङ्गाः** त्रिवलिततयः **राजन्ति** सुशोभन्ते **सः** एतादृशत्रिवलिसम्पन्नः **दामोदरः** कृष्णः **भवतः** युष्यान् **पातु** रक्षतु।

**स जयति हिमकरलेखा चकास्ति यस्योमयोत्सुकान्निहिता।**
**नयनप्रदीपकज्जलजिघृक्षया रतजशुक्तिरिव॥४॥**

**अन्वय–** यस्य हिमकरलेखा उत्सुकात् उमया नयनप्रदीपकज्जलजिघृक्षया निहिता रजतशुक्तिः इव चकास्ति, सः जयति।

**संस्कृतव्याख्या–यस्य** शिवस्य ललाटे **हिमकरलेखा** चन्द्रलेखा **उत्सुकात्** औत्सुक्यात् **उमया** शिवपत्न्या पार्वत्या **नयनप्रदीपकज्जलजिघृक्षया** नयनं शिवस्य तृतीयं नेत्रम् एव प्रदीपः दीपः तेन कज्जलजिघृक्षया कज्जलं निर्मातुमभिलाषेण तत्र **निहिता** स्थापिता **रजतशुक्तिः** इव रौप्यशुक्तिः इव **चकास्ति** सुशोभते **सः** एतदुण–विशिष्टः देवः शङ्करः इत्यर्थः **जयति** सर्वोत्कृष्टः विद्यते।

**( सज्जनप्रशंसा )**

**भवति सुभगत्वमधिकं विस्तारितपरगुणस्य सुजनस्य।**

**वहति विकाशितकुमुदो द्विगुणरुचिं हिमकरोद्द्योतः ॥५॥**

**अन्वय–**विस्तारितपरगुणस्य सुजनस्य सुभगत्वम् अधिकं भवति। विकाशित–कुमुदः हिमकरोद्द्योतः द्विगुणरुचिं वहति।

**संस्कृतव्याख्या–**सज्जनं प्रशंसयत्यत्र–**भवतीति। विस्तारितपरगुणस्य** विस्तारिताः सर्वजनसमक्षं प्रकटीकृता परेषाम् अन्येषां गुणाः शीलादयः येन तादृशस्य **सुजनस्य** सज्जनस्य **सुभगत्वं** सौभाग्यत्वम् महत्त्वं वा अधिकं पूर्वापेक्षया वृद्धिं गतं **भवति** जायते। तथाहि–**विकाशितकुमुदः** विकाशितानि विकासं प्रापितानि कुमुदानि येन तादृशः **हिमकरोद्द्योतः** हिमकरस्य चन्द्रस्य उद्योतः प्रकाशः द्विगुणरुचिं द्विगुणां पूर्वाभ्यधिकां रुचिं शोभां सौन्दर्यं वा **वहति** धारयति। यथा कुमुदानि विकाशयित्वा चन्द्रस्य प्रकाशः अत्यधिकं सुशोभते तथैव परगुणान प्रकटयित्वा सज्जनोऽप्यतितरां विराजते अत एव दुर्जनैरपि परोपकाराय प्रयत्नं कार्यमिति भावः।

**( दुर्जननिन्दा )**

**विषधरतोऽप्यतिविषमः खल इति न मृषा वदन्ति विद्वांसः।**
**यदयं नकुलद्वेषी सकुलद्वेषी पुनः पिशुनः॥६॥**

**अन्वय**-खलः विषधरतः अपि अतिविषमः (भवति) इति विद्वांसः मृषा न वदन्ति। यत् अयं नकुलद्वेषी (भवति) पिशुनः पुनः सकुलद्वेषी (भवति)।

**संस्कृतव्याख्या**- दुर्जनस्य क्रूरत्वं वर्णयत्यत्र–**विषधरत इति। खलः** दुर्जनः **विषधरतः** सर्पाद् अपि **अतिविषमः** अतिक्रूरः **इति** एवं **विद्वांसः** विद्वज्जनाः **मिथ्या** अयथार्थं **न वदन्ति** न कथयन्ति **यत्** यतोहि **अयम्** एषः सर्पः **नकुलद्वेषी** नकुलवंशविरोधी भवति स्वकुलविरोधी न भवति। **पिशुनः अपि** परञ्च दुर्जनः **सकुलद्वेषी** सकुलस्य स्ववंशस्य एव द्वेषी विरोधी भवति। सर्पस्तु नकुलवंशविरोधी भवति स्वकुलविरोधी न भवति परञ्च दुर्जनः अपराधिनता सहैव स्वकुलजानपि द्वेष्टि। एवं दुर्जनस्य क्रूरत्वे किं न वक्तव्यम्।

**अतिमलिने कर्त्तव्ये भवति खलानामतीव निपुणा धीः।**
**तिमिरे हि कौशिकानां रूपं प्रतिपद्यते चक्षुः ॥७॥**

**अन्वय**–अतिमलिने कर्त्तव्ये खलानां धीः अतीव निपुणा भवति। हि कौशिकानां चक्षुः तिमिरे रूपं प्रतिपद्यते।

**संस्कृतव्याख्या–अतिमलिने** अतिनिन्दिते अतिगर्हिते इत्यर्थः। **कर्त्तव्ये** कार्ये **खलानां** दुर्जनानां **धीः** बुद्धिः **अतीव** अत्यधिकं **निपुणा** पटुतरा **भवति। हि** यतोहि **कौशिकानाम्** उलूकानां **चक्षुः** दृष्टिः **तिमिरे** अन्धकारे **रूपं** स्वरूपं **प्रतिपद्यते** दृश्यते। उलूकाः दिवान्धाः भवन्ति। यथा दिवान्धा अपि कौशिकाः रात्रौ अन्धकारे दर्शयन्ति तथैव सत्कार्ये मूर्खत्वमापान्नाः अपि दुर्जनाः दुष्कार्ये नितान्तं कुशलाः भवन्ति। अत्र दृष्टान्तोऽलङ्कारः।

**विध्वस्तपरगुणानां भवति खलानामतीव मलिनत्वम्।**
**अन्तरितशशिरुचामपि सलिलमुचां मलिनिमाऽभ्यधिकः॥८॥**

**अन्वय**–विध्वस्तपरगुणानां खलानां मलिनत्वम् अतीव भवति। अन्तरितशशिरुचां सलिलमुचां मलिनिमा अभ्यधिकाः (भवति)।

**संस्कृतव्याख्या–विध्वस्तपरगुणानां** विध्वस्ताः निन्दादिभिः तिरोहिताः कलुषीकृता वा परेषाम् अन्येषां सज्जनानामित्यर्थः गुणाः यैः तादृशानां **खलानां** दुर्जनानां **मलिनत्वं** कृष्णत्वम् अपकीर्तिः **अतीव** अत्यधिकं **भवति** वृद्धिमाप्नोति। दुर्जनाः स्वप्रशंसने सज्जनानां गुणान् निन्दन्ति परञ्च तेन सज्जनानां लेशमात्रमपि अपकीर्तिः न प्रसरति। तेन दुर्ज्जनानामेव अपयशाः लोके प्रसारतीति भावः। कथममिदं समर्थन् दृष्टान्तं प्रस्तौति–**अन्तरितशशिरुचाम्** अन्तरिताः तिरोहिताः शशिनः चन्द्रस्य रुक् कान्तिः यैः तादृशानां **सलिलमुचां** वर्षाकालिकमेघानां **मलिनिमा** कृष्णत्वं **अत्यधिकः** भवति। अथवा सलिलमुचां जलवर्षणेन आनन्दितलोकानां मेघानां शशिरुचो चन्द्रकान्तेरन्तर्ध्यानेन मालिन्यं कृष्णत्वमधिकं भवति तत् सदैव परपीडकानां दुर्जनानां परगुणानिन्दाविषये किं वक्तव्यम्। अर्थान्तरन्यासोऽलङ्कारः।

**हस्त इव भूतिमलिनो यथा यथा लङ्घयति खलः सुजनम्।**
**दर्पणमिव तं कुरुते तथा तथा निर्मलच्छायाम्।।९।।**

**अन्वय–**भूतिमलिनः हस्त इव खलः दर्पणम् इव सुजनं यथा यथा लङ्घयति तथा तथा तं निर्मलच्छायां कुरुते।

**संस्कृतव्याख्या–भूतिमलिनः** भूत्या भस्मना मलिनः कलुषीकृतः पक्षे भूत्या स्वनैपूण्येन मलिनः कलुषितः अन्तःकरण यस्त तादृशः। **हस्तः इव** करः इव **खलः** दुर्जनः **दर्पणम् इव** आदर्शम् इव **सुजनं** सज्जनं **यथा यथा** येन येन प्रकारेण **लङ्घयति** मर्दयति, पक्षे तिरस्करोति, **तथा तथा** तेन तेन प्रकारेण **तं** दर्पणं पक्षे सज्जनं **निर्मलच्छायां** निर्मला सम्यग्रूपेण दर्शनीया छाया कीर्ति प्रतिबिम्बं यस्मिन् तादृशं, पक्षे निर्मला स्वच्छा छाया कीर्ति यस्य तादृशं **कुरुते** करोति। उपमालङ्कारोऽत्र।

**सा रसवत्ता विहता नवका विलसन्ति चरति नो कङ्कः।**
**सरसीव कीर्त्तिशेषं गतवति भुवि विक्रमादित्ये ।।१०।।**

**अन्वय–**सरसि इव विक्रमादित्ये भुवि कीर्तिशेषं गतवति सा रसवत्ता विहता। नवकाः विलसन्ति, कङ्कः न चरति।

**संस्कृतव्याख्या–सरसि इव** सरोवरे इव **विक्रमादित्ये** तन्नामकराजनि **कीर्तिशेषं** कीर्तिः यशः एवः शेषः अवशिष्ट यत्र तं पक्षे पङ्कमात्रं **गतवति** प्राप्ते

**विक्रमादित्ये** स्वर्गंगते इति भावः सरसि शुष्के जाते सा पूर्वानुभूता **रसवत्ता** सरसता सहृदयता अथवा शृङ्गारादिरससम्पन्नता गुणवत्ता ध्वनौ साभिलाषता पक्षे सारससम्पन्नता **विहता** विनष्टा जाता, पक्षे शून्यत्वं गता अन्तर्हिता वा। किञ्च **नवकाः** नूतनाः कवयः राजानः वा पक्षे न वकाः कपोताऽपि न, **विलसन्ति** सुशोभयन्ति विचरन्ति वा। **कङ्कः** कं पण्डितं कः पण्डितः पक्षे कङ्कनामपक्षिविशेषः। **न चरति** न पीडयति, सर्वे सर्वान् पीडयन्तीति भावः, पक्षे न परिभ्रमति।

**( सत्कविसूक्तिवैशिष्ट्यम् )**

**अविदितगुणाऽपि सत्कविभणितिः कर्णेषु वमति मधुधाराम्।**
**अनधिगतपरिमलाऽपि हि हरति दृशं मालतीमाला॥११॥**

**अन्वय–**अविदितगुणा अपि सत्कविभणितिः कर्णेषु मधुधारां वमति। हि अनधिगतपरिमलाअपि मालतीमाला दृशं हरति।

**संस्कृतव्याख्या– अविदितगुणा अपि** अविदिताः अज्ञाताः माधुर्यादयः गुणाः यस्याः तादृशी **सत्कविभणितिः** सत्कवेः रमणीयार्थरचननिपुणस्य काव्यप्रणेतुः भणितिः सूक्तिः **कर्णेषु** श्रोत्रेषु **मधुधारां** मधुरतायाः सन्ततिं **वमति** उद्गिरति **हि** यतः **अनधिगतपरिमला अपि** अनधिगतः अनुपलब्धः परिमलः सुगन्धः यस्याः तादृशी **मालतीमाला** मालतीपुष्पविशेषस्त्रक् **दृशं** नेत्रं **हरति** आकर्षयति।

**गुणिनामपि निजरूपप्रतिपत्तिः परत एव सम्भवति।**
**स्वमहिमदर्शनमक्ष्णयोर्मुकुरतले जायते यस्मात् ॥१२॥**

**अन्वय–**गुणिनाम् अपि निजरूपप्रतिपत्तिः परतः एव सम्भवति। यस्मात् अक्ष्णोः स्वमहिमदर्शनम् मुकुरमले जायते।

**संस्कृतव्याख्या–गुणिनां** गुणसम्पन्नां जनानां अपि **निजरूपप्रतिपत्तिः** निजस्य स्वस्य रूपस्य महत्त्वस्य प्रतिपत्तिः ज्ञानं **परतः** अन्यस्मात् जनाद् एव **सम्भवति** सम्यग्रूपेण ज्ञायते। **यस्मात्** यतोहि **अक्ष्णोः** नेत्रस्य **स्वमहिमदर्शनं** स्वस्य महिम्नः महत्वस्य दर्शनं विलोकनम् **मुकुरतले** दर्पणपटले **जायते** भवति।

**( ग्रन्थप्रणयनोपोद्घातः )**

**सरस्वतीदत्तवरप्रसादश्चक्रे सुबन्धुः सुजनैकबन्धुः।**
**प्रत्यक्षरश्लेषमयप्रबन्धविन्यासवैदग्ध्यनिधिर्निबन्धम् ॥१३॥**

**अन्वय**–सरस्वतीदत्तवरप्रसादः सुजनैकबन्धुः सुबन्धुः प्रत्यक्षरश्लेषमयप्रबन्ध-विन्यासवैदग्ध्यनिधिः निबन्धं चक्रे।

**संस्कृतव्याख्या–सरस्वतीदत्तवरप्रसादः** सरस्वत्या विद्याधिष्ठातृदेव्या दत्तेन प्रदत्तेन वरेण अभीष्टप्राप्तेन **प्रसादः** अनुगृहीतः ग्रन्थविरचनोत्साहसम्पन्नः इति भावः, **सुजनैकबन्धुः** सुजनानां सत्पुरुषाणाम् एकबन्धुः एकमात्र-मद्वितीयः बन्धुः सखा **सुबन्धुः** तन्नामकविः **प्रत्यक्षरश्लेषमयप्रबन्धविन्यास-वैदग्ध्यनिधिः** प्रत्यक्षरं प्रतिवर्णं श्लेषमयः श्लेषसम्पन्नः यः प्रबन्धः रचना तस्य **विन्यासे** विशिष्टेन न्यासे निर्माणे यद्वैदग्ध्यं निपुणता तस्य निधिः आश्रयभूतः प्रबन्धं वासवदत्तानामकग्रन्थं। चक्रे विरचितम्।

**( चिन्तामणिवर्णनम् )**

**अभूदभूतपूर्वःसर्वोर्वीपतिचक्रचारुचूडामणिश्रेणीशाणकोणकष-णनिर्मलीकृतचरणनखमणिर्नृसिंह इव दर्शितहिरण्यकशिपुक्षेत्रदानविस्मयः, कृष्ण इव कृतवसुदेवतर्पणो, नारायण इव सौकर्यसमासादितधरणिमण्डलः, कंसा-रातिरिव जनितयशोदानन्दसमृद्धिरानकदुन्दुभिरिव कृतकाव्यादरः, सागर-शायीवानन्तभोगिचूडामणिमरीचिरश्रितपद्मो, वरुण इवाशान्तरक्ष-णोऽगस्त्य इव दक्षिणाशाप्रसाधको जलनिधिरिव वाहिनीशतनायकः समकरप्रचारश्च, हर इव महासेनानुगतो निवर्तितमारश्च, मेरुरिव विबुधालयो विश्वकर्माश्रयश्च, रविरिव क्षणदानप्रियश्छायासन्तापहरश्च, कुसुमकेतुरिव जनितानिरुद्धसम्पद्रतिसुखप्रदश्च, विद्याधरोऽपि सुमना, धृतराष्ट्रोऽपि गुणप्रियः, क्षमानुगतोऽपि सुधर्माश्रितो, बृहन्नलानुभावोऽप्यन्तः सरलो, महिममहिषीसम्भवोऽपि वृषोत्पादी, अतरलोऽपि महानायको, राजा चिन्तामणिर्नाम।**

**संस्कृतव्याख्या**–अभूदित्यस्य क्रियापदस्य 'राजा चिन्तामणिर्नाम्' इत्यनेनान्वयः। तं राजानमतः परं विशिनष्टि-**अभूतपूर्वः** पूर्वं भूतः भूतपूर्वः

(अव्ययीभावः) न भूतपूर्वः अभूतपूर्वः नञ्तत्पुरुषः, तादृक्पूर्वं कोऽपि राजा नाभवदित्यर्थः। **सर्वोर्वीपतिचक्रचारुचूणामणिश्रेणीशाणकोणकष-णनिर्मलीकृतचरणनखमणिः**—सर्वेषां सकलानामुर्वीपतीनां नृपतीनां चक्रस्य समुदायस्य चारुः रमणीयाः चूड़ामणिश्रेणी शिरोरत्नपङ्क्तिरेव शाणः निकषः तस्य कोणेनाग्रभागेन कषणेन सङ्घर्षणेन निर्मलिकृता निर्मलनीकृता चरणनखाः पादनखाः मणयः इव यस्य तादृशः (बहुव्रीहिः) सर्वै राजभिः प्रणम्यमानः आसीदिति भाव। **नृसिंह इव** विष्णुः इव **दर्शितहिरण्यकशिपुक्षेत्रदान-विस्मयः**—दर्शितः प्रकाशितः हिरण्यस्य सुवर्णस्य कशिपोः अन्नवस्त्रादेः क्षेत्रस्य भूमेः च दानेन प्रदानेन विस्मयः येन तादृशः (बहुव्रीहिः), पक्षे दर्शितेः प्रदर्शितः हिरण्यकशिपोः प्रह्लादपितुः दैत्यस्य क्षेत्रस्य शरीरस्य दानेन विदारणेन विस्मयः आश्चर्यं येन तादृशः। **कृष्णः इव** वासुदेवः इव **कृतवसुदेवतर्पणः** कृतं सम्पादितं वसुभिः धनैः देवानाम् अमराणां तर्पणं सन्तोषणं येन तादृशः (बहुव्रीहिः), प्रभूतधनद्वारा तर्पणं रक्षणं येन तादृशः पक्षे–कृतं विहितं वसुदेवस्य स्वजनकस्य तर्पणं रक्षणं येन तादृशः। **नारायणः इव** विष्णुः इव **सौकर्यसमासादितधरणिमण्डलः**— सुकरस्य भावः सौकर्यं, समासादितं प्राप्तं जितं वा धरणिमण्डलं भूमण्डलं येन तादृशः (बहुव्रीहिः), महाबलत्वेन सरलतया जितसर्वमहीपतिः इति भावः, पक्षेसौकर्येण सुकरस्य भावेन वाराहावतारेण समासादितं सागराद् उद्धृतं धरणिमण्डलं येन सः। **कंसारातिः इव** कंसस्य स्वमातुलस्य अरातिः शत्रुः कृष्णः इव। **जनितयशोदानन्दसमृद्धिः** जनिता उत्पादिता यशोदा यशप्रदायिनी आनन्दा आनन्ददात्री च समृद्धिः सम्पत्तिः येन तादृशः कूपादिनिर्माणात् लोकानन्ददायकः इति भावः , पक्षेजनिता यशोदायाः नन्दपत्न्याः आनन्दसमृद्धिः येन सः। **आनकदुन्दुभिः** इव–आनक–दुन्दुभिः वसुदेवः इव **कृतकाव्यादरः** कृतः सम्पादितः काव्येषु कविरचनासु आदरः श्रद्धा येन तादृशः बहुव्रीहिः काव्यसमादरकः इति भावः, पक्षे–कृतः काव्यैः देवैः आदरः यस्य तादृशः **सागरशायी इव** सागरे शयितुं शीलः यस्य सः विष्णु इव **अनन्तभोगिचूडामणिमरीचिरञ्जितपादपद्मः** अनन्तानाम् असङ्ख्यानां भोगिनां राज्ञां चूड़ामणीनां शिरोरत्नानां मरीचिभिः किरणैः प्रभाभिर्वा रञ्जितं रक्तीकृतं पादपद्मं चरणकमलं यस्य तादृशः (बहुव्रीहिः), पक्षे–अनन्तभोगी शेषनागः तस्य चूड़ामणिमरीचिभिः रञ्जितं पादपद्मं यस्य तादृशः। **वरुणः इव**

एतन्नामकदेवविशेषः इव **आशान्तरक्षणः** आशानां चतुर्णां दिशाम् अन्ते रक्षणं संरक्षणं यस्य सः (बहुव्रीहिः) तादृशः, पक्षे आशायाः पश्चिमदिशोऽन्ते रक्षणं यस्य सः। **अगस्त्यः इव** एतन्नामक ऋषिः इव **दक्षिणाशाप्रसाधकः** दक्षिणानां निपुणानाम् आशायाः अभिलाषस्य प्रसाधकः प्रकृष्टरूपेण साधकः सम्पादनकर्त्ता (तत्पुरुषः), पक्षे दक्षिणाशायाः दक्षिणदिशः प्रसाधकः अलङ्कर्त्ता। **जलनिधिः इव** सागरः इव। **वाहिनीशतनायकः** वाहिनीनां सेनानां शतस्य अगणितस्य नायकः नेता, पक्षे–वाहिनीशतस्य नदीशतस्य नायकः स्वामी **समकरप्रचारः च** समेन सर्वाषु प्रजासु समानरूपेण करस्य राजग्रहणभागस्य प्रचारः यस्य तादृशः च (बहुव्रीहिः); पक्षे–मकराणां जलजन्तुविशेषाणां प्रचारेण इतस्ततः परिभ्रमणेन सहितः च। **हरः इव** शङ्करः इव **महासेनानुगतः** महत्या विपुलया सेनया बलेन अनुगतः अनुसृतः, पक्षे–महासेनेन स्वपुत्रेण कार्तिकेयेन अनुगतः **निवर्तितमारः च** निवर्तितः स्वशरीरसौष्ठवेन पराजितः मारः कामदेवः येन तादृशः च अथवा निवर्तितः विनाशितः मारः विघ्नः येन सः च (बहुव्रीहिः), पक्षे निवर्तितः भस्मीकृतः मारः कामः येन तादृशः। **मेरुः इव** एतन्नामकः पर्वतविशेषः इव। **विबुधालयः** विबुधानां विद्वज्जनानाम् आलयः आश्रयः(तत्पुरुषः), पक्षे विबुधानां देवानाम् आलयः **विश्वकर्माश्रयः च** विश्वानि सकलानि यानि प्रजापालनादीनि कर्माणि तेषाम् आश्रयः तत्सम्पादकः, पक्षे विश्वकर्मणः देवशिल्पिनः सूर्यस्य वा आश्रयः च। **रविः इव** सूर्यः इव **क्षणदानप्रियः** क्षणेषु उत्सवेषु दानं धनप्रदानं प्रियं यस्य तादृशः अथवा क्षणं प्रतिक्षणं निरन्तरं दानं प्रियं यस्य तादृशः (बहुव्रीहिः) पक्षे क्षणदा रात्रिः न प्रिया यस्य तादृशः **छायासन्तापहरः च** छायया स्वाश्रयप्रदानेन सन्तापं पीडितानां दुःखं हरतीति तथोक्तः,पक्षे छायायाः स्वपत्न्याः सन्तापं हरतीति तथोक्तः। **कुसुमकेतुः इव** कामदेवः इव **जनितानिरुद्धसम्पत्** जनिता उत्पादिता अनिरुद्धा सततस्थायिनी सम्पत् ऐश्वर्यं येन सः (बहुव्रीहिः) पक्षे जनिता अनिरुद्धस्य स्वपुत्रस्य सम्पद् ऐश्वर्यं येन तादृशः **रतिसुखप्रदश्च** रतौ कामक्रीडायां सुखप्रदः आनन्दजनकः च, पक्षे रतेः स्वपत्न्याः सुखप्रदः आनन्दप्रदः च। **विद्याधरः अपि** विद्वान् अपि सः राजा, पक्षे विद्याधरः देवयोनिविशेषः अपि **सुमना** सु शोभनं मनः यस्य, पक्षे देवः। **धृतराष्ट्रः अपि** धृतं शासितं राष्ट्रं राज्यं येन तादृशः अपि पक्षे दुर्योधनस्य पिता अपि **गुणप्रियः** सन्धिविग्रहादयः दयादाक्षिण्यादयः वा प्रियाः अभीष्टाः

यस्य तादृशः बहुव्रीहिः, पक्षे गुणः भीमः प्रिय यस्य तादृशः। **क्षमानुगतः अपि** क्षमया शान्त्या अनुगतः युक्तः अपि, पक्षे क्षमां पृथ्वीम् अनुगतः आश्रितः अपि। **सुधर्माश्रितः** शोभनं प्रजापालनादिकं धर्मम् आश्रयं यस्य तादृशः, पक्षे-सुधर्मा देवसभाश्रितः। **बृहन्नलानुभावः अपि** अर्जुन-प्रभावः अपि महाप्रभावशाली अपीत्यर्थः,पक्षे बृहद् महान् यः नलः तृणविशेषः तस्य अनुभावः जायमानः अपि **अन्तःसरलः** स्वच्छमना पक्षे अन्तः मध्ये सरलः सरल-वृक्षविशेषयुक्तः। **महिममहिषीसम्भवः अपि** महिममहिष्यां कृताभिषेकायां राजपत्न्यां सम्भवः जायमानः अपि पक्षे महिममहिष्याः महाक्षीरायाः सम्भवः जायमानः अपि **वृषोत्पादी** वृषं धर्मम् उत्पादयति जनयति इति तादृशः पक्षे वृषमुत्पादयिंतुं समर्थः। **अतरलः अपि** अचश्चलः स्थिमरतिः अपि, पक्षे हारमणिभिन्नः अपि **महानायकः** महान् नायकः नेता, पक्षे हारमध्यमणिः विद्यते।

**( चिन्तामणिशासनवर्णनम् )**

**यत्र च शासति धरणिमण्डलं छलनिग्रहप्रयोगो वादेषु नास्तिकता चार्वाकेषु कण्टकयोगो नियोगेषु परीवादो वीणासु खलसंयोगः शालिषु द्विजिह्वसङ्गृहीतिराहितुण्डिकेषु करच्छेदः क्लृप्तकरग्रहणेषु नेत्रोत्पाटनं मुनीनां द्विजराजविरुद्धता पङ्कजानां सार्वभौमयोगो दिग्गजस्याग्नितुलाशुद्धिः सुवर्णानां सूचीभेदो मणीनां शूलभङ्गो युवतिप्रसवे दुःशासनदर्शनं भारते करपत्रदारणं जलजानाम् ....।**

**संस्कृतव्याख्या–यत्र** यस्मिन् चिन्तामणौ राजनि **धरणिमण्डलं** भूमण्डलं **शासति** शासने **वादेषु** वादविवादेषु शास्त्रार्थेषु **छलनिग्रहप्रयोगः** छलस्य वाक्छलस्य निग्रहस्य न्यायशास्त्रोक्तस्य प्रतिज्ञाहान्यादेः प्रयोगः व्यवहारः, न तु प्रजासु छलस्य कपटस्य निग्रहस्य बन्धनदण्डादेः प्रयोगः उपयोगः भवति यतो हि प्रजाजनाः अपराधरहिताः आसन्। **चार्वाकेषु** चार्वाकमतानुयायिषु **नास्तिकता** ईश्वराभावस्वीकारत्वम् आसीत्, न तु प्रजासु नास्तिकता दरिद्रता दुःखं वा आसीत्। **नियोगेषु** पुत्रप्राप्त्यर्थं नियोजनेषु **कण्टकयोगः** कण्टकस्य रोमाञ्चस्य योगः सम्बन्धः, न तु प्रजासु निरपराधात् कण्टकदण्डेन सम्बन्धः आसीत्। **वीणासु** वल्लकीषु वाद्ययन्त्रविशेषेषु परीवादः परितः वादनं अथवा वादनदण्डसम्बन्धः, न तु प्रजासु कोऽपि **परीवादः** निन्दकः आसीत्। **शालिषु**

धान्येषु, **खलसंयोगः** तुषविमोचनार्थं खलस्य तुषमर्दनस्थानस्य संयोगः सम्बन्धः, न तु प्रजासु खलस्य दुष्टस्य संयोगः सम्बन्धः आसीत् दुष्टाभावात्। **आहितुण्डिकेषु** सर्पोपजीविषु **द्विजिह्वसङ्गृहीतिः** द्विजिह्वानां सर्पाणां सङ्गृहीतिः सङ्ग्रहणं, न तु प्रजासु मिथ्याभाषकानां सङ्ग्रहः आसीत्। **क्लृप्तकरग्रहणेषु** क्लृप्ता यथोचितरूपेण निर्धारिता ये कराः राजग्राह्यभागाः तेषां ग्रहणेषु आदानेषु करच्छेदः करस्य राजग्राह्यभागस्य छेदः न्यूनीकरणम्, न तु प्रजासु अपराधाभावात् करच्छेदः करकर्तनस्य दण्डः आसीत्। **मुनीनां** मुनिनामकवृक्षाणां **नेत्रोत्पादनं** नेत्रस्य वल्कलस्य उत्पादनं कर्तनं न तु प्रजानां दण्डेन नेत्रोत्पादनं नेत्रनिस्सारणम् आसीत्। **पङ्कजानां** कमलानां **द्विजराजविरुद्धता** द्विजराजेन चन्द्रेण विरुद्धता विरोधः, न तु प्रजानां द्विजराजेन क्षत्रियशासकेन चिन्तामणिना विरुद्धता विरोधः आसीत्। **दिग्गजस्य** दिशानां गजस्य हस्तिनः **सार्वभौमयोगः** सार्वभौमनाम्नः गजस्य योगः सम्बन्धः, न तु चिन्तामणिव्यतिरिक्ते राजनि सार्वभौमस्य योगः प्रयोगः आसीत्, चिन्तामणिरेव सार्वभौमः राजा आसीत्। **सुवर्णानां** काञ्चनानां **अग्नितुलाशुद्धिः** अग्निना स्वच्छतायाः तुलया मात्रायाः शुद्धिः ज्ञानम्, न तु प्रजानां निरापराधत्वात् अग्निना तुलया च अपराधस्य शुद्धिः आसीत्। **मणीनां** मुक्तानां **सूचीभेदः** सूत्रप्रवेशनाय सूच्या भेदः रन्ध्रविधानं, न तु लोकानां सूचीभेददण्डः आसीत्। **युवतिप्रसवे** युवत्याः गर्भिण्याः प्रसवे सन्तानोत्पत्तौ **शूलभङ्गः** शूलेनोदरपीडया भङ्गःकष्टं, न तु लोके शूल्यारोहणस्य दण्डः आसीत्। **भारते** महाभारतग्रन्थे **दुःशासनदर्शनः** दुःशासनस्य तन्नाम्नः धृतराष्ट्रपुत्रस्य दर्शनः ज्ञानम्, न तु प्रजासु राज्ञः दुःशासनस्य कुशासनस्य दर्शनः निरीक्षणः आसीत्। **जलजानां** कमलानां **करपत्रदारणं** करैः सूर्यकिरणैः पत्राणां किसलयानां दारणं विकासनं, न तु प्रजानां करपत्रेण क्रकचेन दारणं विदारणम् आसीत्।

**महावराहो गोत्रोद्धरणप्रवृत्तोऽपि गोत्रोद्दलनमकरोत्। राघवः परिहरन्नपि जनकभुवं जनकभुवा सह वनं विवेश। भरतो रामे दर्शितभक्तिरपि राज्ये विराममकरोत्। नलस्य दमयन्त्या मिलितस्यापि पुनर्भूपरिग्रहो जातः। पृथुरपि गोत्रसमुत्सारणविस्तारितभूमण्डलः। इत्थं नास्ति वागवसरः पूर्वतरराजसु।**

**संस्कृतव्याख्या–महावराहः** वराहावताररूपो विष्णुः **गोत्रोद्धरणप्रवृत्तः अपि** गोत्रा पृथ्वी तस्याः उद्धरणाय समुद्धाराय प्रवृत्तः संलग्नः अपि **गोत्रोद्दलनम्** गोत्रायाः पृथिव्याः उद्दलनम् विनाशनम् अकरोत्। अत्र विरोधः। पृथिव्याः समुद्धाराय प्रवृत्तोऽपि तस्या एव उद्दलनमनुचितम्। वस्तुतस्तु गोत्रस्य पर्वतस्य उद्दलनं चूर्णनमकरोद् इति विरोधपरिहारः। **राघवः** रामः **जनकभुवं** जनकस्य पितुः भुवं राज्यं **परिहरन्** परित्यजन् अपि **जनकभुवा सह** पितुः राज्येन सह **वनं** जङ्गलम् **विवेश** प्राविशत् इति विरोधः। यस्य राज्यस्य परित्यागः तेनैव सह वनगमनमनुचितम्। वस्तुतस्तु जनकभुवा सीतया सह वनगमनमिति विरोध परिहारः। **भरतः** रामस्यानुजः कैकेयिपुत्र; **रामे** स्वस्याग्रजे **दर्शितभक्तिः अपि** दर्शिता प्रदर्शिता भक्तिः प्रेम येन तादृशः अपि **राज्ये विरामं** रामस्याभावः अकरोत् इति विरोधः। राज्ये विरामं विरतिम् इति विरोधपरिहारः। **दमयन्त्या** स्वपत्न्या सह **मिलितस्य** सङ्गमस्य नलस्य निषधनरेशस्य **पुनर्भूपरिग्रहः** पुनर्भू विधवा तथा परिग्रहः प्राप्ति **जातः** अभवत् इति विरोधः। पुनः भूपरिग्रहः राज्यप्राप्तिः अभवत् इति परिहारः। **पृथुः** तन्नामक राजाविशेषः **गोत्रसमुत्सारणविस्तारितभूमण्डलः** गोत्राणां स्ववंशजनानां समुत्सारणेन निवार्सनेन विनाशनेन वा विस्तारितं विस्तृतंकृतं भूमण्डलं स्वराज्यं येन तादृशः इति निन्दा। गोत्राणां पर्वतानां समुत्सारणेन विक्षेपेण विस्तारितं विस्तृतं कृतं भूमण्डलं येन सः इति परिहारः। **इत्थम्** अनेन प्रकारणेन **पूर्वतरराजसु** पूर्ववर्तिषु राज्ञेषु विषयेषु **वागवसरः** प्रशंसायोग्यता **नास्ति** न विद्यते।

## ( चिन्तामणिवैशिष्ट्यवर्णनम् )

**स पुनरन्य एव देवो न्यक्कृतसर्वोर्वीपतिचरितः। तथाहि स पर्वतः कटकसञ्चारिणो गोन्धर्वान् दर्शितशृङ्गोन्नतिः सुखयन् न विरराम। स हि मालयो नावश्यायोच्छलितो नो मायाजन्मने हितश्च। स हि मानी गिरिस्थितो वृषध्वजः। असौ सदागतिरवधूताखिलकान्तारः पावकाग्रेसरी नभोगोत्सुकः सुमनोहरश्च।**

**संस्कृतव्याख्या–सः** चिन्तामणिः **न्यक्कृतसर्वोर्वीपतिचरितः** न्यक्कृतः तिरस्कृतः स्वचरितेन सर्वेषां सकलानां उर्वीपतीनां राज्ञां चरितं येन तादृशः सन् **पुनः अन्यः** विलक्षणः **देवः** राजा आसीत्। **तथाहि** तदेव सिद्धं भवति यत्–**सः**

चिन्तामणिः राजा **पर्वतः** पर्वः उत्सवः वर्तते यस्य सः पर्वतः सर्वदोत्सवे संलग्नः इति भावः, पक्षे पर्वतः गिरिः। **दर्शितशृङ्गोन्नतिः** दर्शिता प्रदर्शिता शृङ्गस्य स्वप्रभावस्य पताकायाः वा उन्नतिः येन तादृशः (बहुव्रीहिः), पक्षे दर्शिता शृङ्गानां शिखराणाम् उन्नतिः येन तादृशः **कटकसञ्चारिणः** कटके सैन्ये सञ्चरणस्य शीलं येषां तादृशान्, पक्षे कटके मध्ये सञ्चरणस्य शीलं येषां तान् **गन्धर्वान्** अश्वान्, पक्षे देवगायकान् **सुखयन्** आह्लादयन् **न विरराम** विरामं नाकरोत्। **सः** चिन्तामणिः **हि मालयो** हि निश्चित रूपेण मायाः लक्ष्म्याः आलयः निवासस्थानम्, पक्षे हिमस्य आलयः गृहं हिमालयः नाम पर्वतः। **नावश्यायोच्छलितः** अवश्यायेन अहङ्कारेण नोच्छलितः नातिक्रान्तमर्यादः, पक्षे अवश्यायेन हिमेन उच्छलितः प्रवृद्धः। **नो मायाजन्मने हितः च** मायाजन्मने कपटप्रवृत्त्यै हितः हितकरः अनुकूलः वा न विद्यते, पक्षे उमायाः पार्वत्या जन्मने उद्भवाय न योग्यः च। सः चिन्तामणिः **हिमानी गिरिस्थितः** हि निश्चितरूपेण मानी स्वाभिमानी गिरि वाचि वचने वा स्थितः अचलः, पक्षे हिमान्यां हिमयुक्ते गिरौ पर्वते हिमालये स्थितः विद्यमानः **वृषध्वजः** वृषः धर्मः ध्वजः चिह्नं यस्य तादृशः धार्मिकः इत्यर्थः, पक्षे शिवः।

**असौ** चिन्तामणिः **सदागतिः** सतां सज्जनानां गतिः निर्वाहः यस्य तादृशः, पक्षे सदागतिः सर्वदा प्रवहणशीलः वायुः **अवधूताखिलकान्तारः** अवधूताः विदलिताः अखिलकान्ताराः सकलदुर्गमार्गाः दुर्भिक्षाः वा येन तादृशः, पक्षे अवधूतानि प्रकम्पितानि अखिलानि सकलानि कान्ताराणि वनानि येन सः। **पावकाग्रेसरः** पावकानां पवित्रचरितानां जनानाम्, अग्रेसरः प्रमुख, पक्षे पावकस्य अग्ने अग्रेसरः मित्रम्। **न भोगोत्सुकः** भोगेषु कामादिसुखेषु नोत्सुकः अनासक्तः, पक्षे नभोगेषु आकाशगमनेषु उत्सुकः। **सुमनोहरः** सुमनसां विद्वज्जनानाम् हरः समाकर्षकः अथवा प्रियदर्शी, पक्षे सुमनानां पुष्पाणां हरः हरणकर्त्ता।

**स रत्नाकरोऽनहिमयः कथमगाधः समर्यादो नोद्रोकोऽप्यस्य विस्मयाः सदा हिमकराश्रयोऽमृतमयः सपोतस्तस्याचलो नक्रोधो महानदीनः समुद्रः। स चन्द्र इव क्षणदानन्दकरः कुमुदवनबन्धुः सकलकलाकुलगृहं नतारातिबलः। मित्रोदयहेतुः काञ्चनशोभां बिभ्रदचलाधिकलक्ष्मीः सुमेरुरिव।**

**संस्कृतव्याख्या–**चिन्तामणिः साक्षाद्रूपेण समुद्रः आसीत् यतोहि–**सः** पूर्वोक्तः चिन्तामणिः **रत्नाकरः** रत्नानां श्रेष्ठवस्तूनाम् आकरः निधिः, पक्षे–रत्नानां मन्थनकाले समुत्थितानां चतुर्दशरत्नानां मौक्तिकादीनाम् आकरः निधिः। **अनहिमयः** अहिः दुर्जनः तन्मयः तद्युक्तः स्वभावः नास्ति यस्य तादृशः, दुर्जनसंसर्गरहितः इत्यर्थः, पक्षे–अहिमयः सर्पयुक्तः नाहिमयः अनहिमयः सर्परहितः इत्यर्थः। **अगाधः** निर्लोभः, पक्षे गम्भीरः। **समर्यादः** न्यायपथप्रवृत्तः सम्मानयुक्तः वा, पक्षे सीमानतिक्रमणयुक्तः। **नोद्रोकः** उद्रोकरहितः सावधानः इत्यर्थः, पक्षे उद्रोकः नावद्वारा गमनागमनयोग्यः न। **विस्मयः** आश्चर्य स्वरूपः। **सदा हिमकराश्रयः** सदा दाता हिमकरः शीतलः आश्रयः यस्य सः, पक्षे सदा सर्वदा अहिमकराश्रयः अहीनां सर्पाणां मकरणां समुद्रजन्तु–विशेषाणां च आश्रयः निवासः यत्र तादृशः। **अमृतमयः** सुधास्वरूपः, पक्षे जलमयः। **सपोतः** योग्यपुरुषोपेतः पक्षे सयानपात्रः। **अचनो न क्रोधः** अचलः स्थिरः क्रोधः नास्ति यस्य तादृशः, पक्षे–अचलः मैनाकपर्वतः नक्रः मकरः अन्तः यस्य सः। **महानदीनः** महान् महानुभावः अदीनः अदरिद्रः, धन्नसम्पन्नः इत्यर्थः, पक्षे–महानदीनां महतीनां नदीनाम् इनः स्वामी।

**सः** चिन्तामणिः **चन्द्रः इव** शशीव **क्षणदानन्दकरः** क्षणं प्रतिक्षणम् दानेन आनन्दकरः आह्लादकः अथवा क्षणम् उत्सवं ददातीति क्षणदः, तादृशः चासौ आनन्दकरश्च, पक्षे क्षणदायाः रात्रेः आनन्दकरः आह्लादकः। **कुमुदवनबन्धुः** कोः पृथिव्याः मुदा हर्षेण अवनं रक्षणं कुमुदवनं तेन बन्धुः इव बन्धुः, पक्षे कैरवगणस्य विकासनेन बन्धुः। **सकलकलाकुलगृहं** सकलानां गीतवाद्यादीनां चतुषष्ठेः कलानां कुलगृहम् आश्रयस्थानम्, पक्षे–सकलानां षोडशानां कलानां गृहम् आश्रयस्थानम्। **न तारातिबलः** नताः विनयमताः अरातिबलाः शत्रुसैनिकाः येन सः तादृशः, पक्षे–ताराः नक्षत्राणि न अतिबलाः अतिबलसम्पन्नाः यस्मात् तादृशः आसीत्।

अयं चिन्तामणिः **सुमेरुः** पर्वतः इव आसीत् यतोहि **मित्रोदयहेतुः** मित्राणां सुहृदानां उदये अभ्युदये हेतुः कारणभूतः, पक्षे मित्रस्य सूर्यस्य उदये उद्गतौ कारणभूतः। **काञ्चनशोभां विभत्** काञ्चनम् अवर्णनीयां शोभां विभ्रत् दधानः, पक्षे–काञ्चनस्य सुवर्णस्य शोभां दधानः। **अचलाधिकलक्ष्मीः** अचला

स्थिरा अधिका अन्येभ्यः नृपतीभ्यः विशिष्टा लक्ष्मीः समृद्धिः ऐश्वर्यं वा यस्य तादृशः, पक्षे अचलेभ्यः अन्येभ्यः पर्वतेभ्यः अधिका लक्ष्मीः शोभा यस्य तादृशः आसीत्।

**यस्य च रिपुवर्गः सदा पार्थोऽपि न महाभारतरणयोग्यः, भीष्मोऽप्यशान्तनवेहितः, सानुचरोऽपि न गोत्रभूषितः। अपि च त्रिशङ्कुरिव नक्षत्रपक्षस्खलितः, शङ्करोऽपि न विषादी, पावकोऽपि न कृष्णवर्त्मा, आश्रयाशोऽपि न दहनः, नान्तक इवाकस्मादपहृतजीवनः, न राहुरिव मित्रमण्डलग्रहणविवर्द्धितरुचिः, न नल इव कलिविघटितः, न चक्रीवश्शृगालवधस्तुतिसमुल्लसितः, नन्दगोप इव यशोदयाऽऽश्रितः, जरासन्ध इव घटितसन्धिविग्रहः, भार्गव इव सदानभोगः, दशरथ इव सुमित्रोपेतः सुमन्त्राधिष्ठितश्च, दिलीप इव सुदक्षिणानुरक्तो रक्षितगुश्च, राम इव जनितकुशलवयोरूपोच्छ्रायः....।**

**संस्कृतव्याख्या–यस्य** चिन्तामणेः **रिपुवर्गः** शत्रुगणः **सदा पार्थः अपि** सदा राजा सन् अपि पक्षे, पृथापुत्रः अर्जुनः सन् अपि **महाभारतरणयोग्यः** महाभारतस्य महत्कार्यस्य तरणे सम्पादने योग्यः, पक्षे–महाभारतस्य रणाय युद्धाय योग्यः समर्थः न आसीत्। **भीष्मः अपि** भयङ्करः अपि, पक्षे–शान्तनुपुत्रः भीष्मः अपि **अशान्तनवेहितः** अशान्तमविरतं नवं स्तुत्यम् ईहितम् अभीष्टं यस्य तादृशः, पक्षे–अशान्तनवे पितृभिन्नाय हितः। **सानुचरः अपि** अनुचरैः सेवकैः सहितः अपि, पक्षे–सानौ पर्वते चरतीति सानुचरः अपि **गोत्रभूषितः** गोत्रैः गोत्रजनैः भूषितः अलङ्कृतः, पक्षे–गोत्रस्य पर्वतस्य भुवि भूमौ सितः स्थितः **न** आसीत्। **अपि च** अन्यदपि **त्रिशङ्कु इव** राजविशेषः इव **नक्षत्रपथस्खलितः** क्षत्रस्य क्षत्रियस्य पथात् धर्मात् स्खलितं च्युतः न, पक्षे–नक्षत्रपथात् आकाशात् स्खलितः च्युतः। **शङ्करः अपि** कल्याणकरः अपि, पक्षे–शिवः अपि **विषादी न** विषादयुक्तः **न** पक्षे–विषभक्षकः न आसीत्। **पावकः अपि** पावयिता अपि, पक्षे–अग्निः अपि **कृष्णवर्त्मा** कृष्णं कलुषितं वर्त्म आचारं यस्य तादृशः अग्निः **न** आसीत्। **आश्रयाशः अपि** आश्रयाणां स्वाधीनजनानाम् आशा यस्मिन् तादृशः अपि, पक्षे आश्रयं काष्ठादिकं स्वस्थानम् अश्नाति भक्षयति इति तादृशः अग्निः अपि। **दहनः** सन्तापजनकः

पक्षे–दाहकः **न** आसीत्। **अन्तकः इव** यमः इव **अकस्मादपहृतजीवनः** अकस्मात् सहसा एव अकारणं अपहृतं विनाशितं जीवनं जीविका येन तादृशः, पक्षे–अकस्मात् सहसा अपहृतं गृहीतं जीवनं जीवितां येन तादृशः, **न** आसीत्। **राहुः इव** भृगुपुत्रः इव, **मित्रमण्डलग्रहणविवर्धितरुचिः** मित्राणां सुहृज्जनानां मण्डलस्य राज्यस्य ग्रहणे स्ववशीकरणे विवर्धिता वृद्धिंगता रुचिः स्पृहा यस्य तादृशः, पक्षे–मित्रमण्डलस्य सूर्यमण्डलस्य ग्रहणेन ग्रसनेने विवर्धिता रुचिः **न** आसीत्। **नल इव** निषधनरेशः इव, **कलिविघटितः** कलिना छलेन विघटित आक्रान्तः, पक्षे–कलिना युगविशेषेण विघटितः आक्रान्तः **न** आसीत्। **चक्री इव** विष्णुः इव **शृगालवधस्तुतिसमुल्लसितः** शृगालानां भयाक्रान्तानां वधेन हननेन स्तुत्या प्रशंसनेन समुल्लसितः आनन्दितः, पक्षे–शृगालस्य राजविशेषस्य वधेन स्तुत्या समुल्लसितः भक्तैः प्रीणितः **न** आसीत्। **नन्दगोपः इव** नन्दनामकः गोपालकः इव **यशोदयाऽऽश्रितः** यशसा कीर्त्या दयया परदुःख-निवारणेच्छया आश्रितः सम्पन्नः, पक्षे यशोदया स्वपत्न्या युक्तः। **जरासन्धः इव** राजविशेषः इव **घटितसन्धिविग्रहः** घटितौ सम्पादितौ सन्धिः सन्धानं विग्रहः युद्ध च येन सः, पक्षे–घटितः कृतः सन्धिः सान्धानं यस्य तस्य विग्रहः देहः यस्य सः। **भार्गव इव** शुक्राचार्यः इव **सदानभोगः** दानेन विप्रादिभ्यः धनप्रदानेन भोगेण सर्वसुखानुभवेन च सहितः, पक्षे सदा नभसि आकाशे गः गमनशीलः **दशरथः इव** रामस्य पिता इव **सुमित्रोपेतः** सुमित्रैः उपेतः युक्तः, पक्षे–स्वपत्न्या सुमित्रया युक्तः, **सुमन्त्राधिष्ठितः च** सुमन्त्रेण सम्परामर्शेन अधिष्ठितः आश्रितः च, पक्षे–सारथिना सुमन्त्रेण युक्तः। **दिलीपः इव सुदक्षिणानुरक्तः** सुदक्षिणेषु सरलान्तःकरणेषु यज्ञादिदानेषु वा अनुरक्तः प्रीतिसम्पन्नः, पक्षे स्वपत्न्यां सुदक्षिणाम् अनुरक्तः स्नेहयुक्तः, **रक्षितगुः च** रक्षिता पालिता गौः पृथ्वी येन सः, पक्षे–रक्षिता सेविता गौ धेनुः येन सः। **रामः इव** दशरथपुत्रः इव **जनितकुशलवयोरूपोच्छ्रायः** जनितः विहितः कुशलः पर्याप्तो वयसो यौवनादेः रूपस्य सौन्दर्यस्य च उच्छ्रायः अभ्युदयः येन तादृशः, पक्षे–जनितः सम्पादितः कुशलवयोः तन्नामकयोः स्वपुत्रयोः रूपस्य सौन्दर्यस्य उच्छ्रायः अभ्युदयः येनः सः।

## ( कन्दर्पकेतुवर्णनम् )

**तस्य च पारिजात इवाश्रितनन्दनः, हिमालय इव जनितशिवः, मन्दर इव भोगिभोगाङ्कितः, कैलास इव महेश्वरोपभुक्तकोटिः, मधुरिव नानारामानन्दकरः, क्षीरोदमथनोद्यतमन्दर इव मुखरितभुवनः, रागरज्जुरिवोल्लासितरतिः, ईशानभूतिसञ्चय इव सन्ध्योच्छलितः, शरन्मेघ इवावदातहृदयो विष्णुपदावलम्बी च, पार्थ इव समरसाहसोचितः, कंस इव कुवलयापीडभूषितः, ताक्ष्र्य इव विनताऽऽनन्दकरः सुमुखनन्दनश्च, विष्णुरिव क्रोडीकृतसुतनुः, शान्तनव इव स्ववशस्थापितकालधर्मः, कौरवव्यूह इव सुशर्माधिष्ठितः जलधरसमय इव विमलतरवारिधारात्रासितराज-मण्डलः, सुबाहुरपि रामानन्दी, समदृष्टिरपि महेश्वरः मुक्तामयोऽप्यतरलमध्यः, वंशप्रदीपोऽप्यक्षतदशस्तनयोऽभूत्कन्दर्पकेतुर्नाम।**

**संस्कृतव्याख्या– तस्य च** तस्य चिन्तामणेः च **कन्दर्पकेतुः नाम** कन्दर्पकेतुः नामकः **तनयः** पुत्रः **अभूत्** अभवत्। सः कन्दर्पकेतुः **परिजातः इव** इन्द्रकानने स्थितः देववृक्षः इव **आश्रितनन्दनः** आश्रितान् शरणागतान् स्वोपजीविनो वा नन्दयतीत्याश्रितनन्दनः, पक्षे आश्रितं आश्रयीकृतं नन्दनम् इन्द्रकाननं येन तादृशः आसीत् **हिमालयः इव** नगाधिराजः इव **जनितशिवः** जनितः समुत्पादितः जनानां शिवं कल्याणं सुखं वा येन सः, पक्षे–जनिता समुत्पादिता शिवा पार्वती येन सः। **मन्दरः इव** मन्दराचलः इव **भोगिभोगाङ्कितः** भोगिनां विलासिनां राज्ञां वा भोगैः विलासैः सुखैः वा सम्पन्नः, पक्षे–भोगिनः सर्पस्य वासुकेः भोगेन शरीरेण अङ्कितः चिह्नितः। **कैलासः इव** हिमालयस्य शिवनिवाससरूपः शृङ्गविशेषः तद्वत् **महेश्वरोपभुक्तकोटिः** महेश्वरैः महाराजैः उपभुक्ताः उपभुक्ता कोटयः असङ्ख्यानि धनानि यस्य सः, पक्षे महेश्वरेण शङ्करेण उपभुक्ताः उपभुक्ता कोटिः अग्रभागः यस्य सः। **मधुःइव** वसन्तः इव **नानारामानन्दकरः** नाना अनेकासां रामाणां युवतीनाम् आनन्दकरः आह्लादकः अनेकरमणीसुखकरः इत्यर्थ, पक्षे–नाना आरामेषु उपवनेषु आनन्दकरः आनन्दजनकः। **क्षीरोदमथनोद्यतमन्दरः इव** क्षीरोदस्य क्षीरसागरस्य मथनाय उद्यतः तत्परः यः मन्दरः मन्दराचलः तादृशः इव **मुखरितभुवनः** मुखरितं प्रशस्त्येन शब्दायमानं कृतं भुवनं लोकं येन तादृशः, पक्षे–मुखरितं ध्वनिमानं कृतं भुवनं जलं

येन सः। **रागरज्जुः इव** रागः अनुरागः एव रज्जुः नायिकानायकयोः बन्धनं साधनं यस्य सः कामदेवः इव **उल्लासितरतिः** उल्लासिता वर्द्धिता रतिः अनुरागः येन तादृशः, पक्षे–उल्लासिता समानन्दिता रतिः कामपत्नी येन तादृशः। **ईशानभूतिसञ्चयः इव** ईशानस्य शङ्करस्य भूतिसञ्चयः भस्मराशिः इव **सन्ध्योच्छलितः** सन्ध्यैः विद्वद्भिः कार्ये उच्छलितः नियोजितः, पक्षे–सन्ध्यासु सायंसमयेषु उच्छलितः वृद्धिं प्राप्तः। **शरन्मेध इव** शरत्कालीनः बादलः इव **अवदातहृदयः** अवदातं स्वच्छं हृदयम् अन्तःकरणं यस्य तादृशः, पक्षे–अवदातं निर्मलं हृदयं मध्यभागः यस्य तादृशः **विष्णुपदावलम्बी च** विष्णुपदं विष्णु-चरणम् अवलम्बते समाश्रयते इति विष्णुपदावलम्बी विष्णुभक्तः इत्यर्थः, पक्षे–विष्णुपदम् आकाशम् अवलम्बते इति, आकाशे स्थितः इति भावः। **पार्थः इव** अर्जुनः इव **समरसाहसोचितः** समरे सङ्ग्रामे यत्साहसं तत्रोचितः योग्यः पक्ष–द्वयेऽपि एवमेव। **कंसः इव** कृष्णस्य मातुलः इव **कुवलयापीडभूषितः** कोः पृथिव्याः वलयं परिधिः एव आपीडः शेखरः तेन भूषितः शोभितः, कुवलयैः नीलकमलैः कृतः आपीडः शेखरः तेन वा भूषितः पक्षे–कुवलयापीड इति नामकेन हस्तिना भूषितः। **तार्क्ष्यः इव** गरुडः इव **विनतानन्दकरः** विनतानां विनम्राणां आनन्दकरः हर्षदायकः, पक्षे–स्वमातुः विनतायाः आनन्दकरः **सुमुखनन्दनः च** सुमुखान् विदुषः नन्दयति प्रीणयति इति तथोक्तः, पक्षे सुमुखः तन्नामा नन्दनः पुत्रः यस्य तादृशः, **विष्णु इव** लक्ष्मीपतिः इव **कोडीकृतसुतनुः** क्रोडीकृता सम्यगालिङ्गिता सुतनवः शोभनाङ्गाः युवत्यः येन सः, पक्षे–क्रोडीकृता सूकरीकृता सुतनुः शोभना तनुः शरीरं येन सः। **शान्तनवः इव** शान्तनवः शन्तनुपुत्रः भीष्मः इव **स्ववशस्थापितकालधर्मः** स्ववशे स्वधीने स्थापितः कृतः कालः धर्मः च येन सः, पक्षे–स्ववशे स्थापितः कालधर्मः मृत्युः येन सः। **कौरवव्यूहः** इव कौरवाणां दुर्योधनादीनां व्यूहः सेनाविन्यासः सः, चक्रव्यूहः **इव सुशर्माधिष्ठितः** सुशर्म शोभनं सुखं तेन अधिष्ठितः सम्पन्नः, पक्षे–सुयशर्मणा त्रिगलपतिना अधिष्ठितः **जलधरसमयः इव** वर्षाकालः इव **विमलतरवारिधारात्रासितराजमण्डलः** विमला निर्मला तरवारेः खड्गस्य धारा अग्रभागः तया त्रसितं भीषितं राज्ञां नृपतीनां मण्डलं गणः येन सः, पक्षे–विमलतराभिः अतिशयनिर्मलाभिः वारिधाराभिः जलसन्निपातैः त्रासितं भीषितं राजहंसानां मण्डलं समूहः येन

सः। अतः परं विरोधाभासेन कन्दर्पकेतुं वर्णयति महकविः—**सुबाहुः अपि** शोभनौ बाहू भुजौ यस्य तादृशः अपि, पक्षे—सुबाहुनामक राक्षसः अपि **रामानन्दी** रामाः रमण्यः ताः आनन्दयति प्रीणयति इति रामानन्दी, पक्षे—रामं दशरथपुत्रम् आनन्दयति इति रामानन्दी। **समदृष्टिः अपि** समा सर्वत्र समाना दृष्टिः दर्शनं यस्य तादृशः अपि, पक्षे—समसङ्ख्याका दृष्टयः नेत्राणि यस्य सः अपि, **महेश्वरः** महाराजा विद्यते, पक्षे—त्रिनेत्रः शङ्करः विद्यते। **मुक्तामयः अपि** मुक्तः परित्यक्तः आमयः रोगः यस्य तादृशः अपि, पक्षे—मौक्तिकयुक्तः अपि **अतरलमध्यः** अतरलः **अचञ्चलः** अन्तःकरणं यस्य सः, पक्षे—अतरलः हारमध्यमणिरहितः। **वंशप्रदीपः अपि** वंशस्य कुलस्य प्रदीपः समुज्ज्वलकरः अपि, पक्षे—वंशे वेणौ उद्दीपितः प्रदीप्तः अपि **अक्षतदशः** अक्षता अविनष्टा दशा अवस्था यस्य सः, पक्षे—अक्षता अदग्धा दशा वर्तिका यस्य सः, ईदृशः कन्दर्पकेतुः नाम तनयोऽभूद् इति सम्बन्धः।

### (कन्दर्पकेतुवैशिष्ट्यवर्णनम्)

**येन च चन्द्रेणेव सकलकलाकुलगृहेण, शर्वरीतिहारिणा, दलितकैरवेण, प्रसाधिताशेन विलोकिताः, जलधय इव समुल्लसितगोत्राः, सुदूरविवर्द्धितजीवनाः, प्रसन्नसत्त्वाः सन्तः, परामृद्धिमवापुः।**

**संस्कृतव्याख्या**—चन्द्रेण इव येन विलोकिताः जलधयः इव सन्तः परामृद्धिमवापुरत्यन्वयः। **येन च** कन्दर्पकेतुना च **चन्द्रेण इव** निशाकरेण इव **सकलकलाकुलगृहेण** सकलानां समस्तानां नृत्यगीतानां चतुषष्ठेः कलानां कुलस्य समूहस्य गृहम् आश्रयस्थानम् तादृशेन, पक्षे—सकलानां शोडषकलानां कुलस्य गृहम् तेन **शर्वरीतिहारिणा** शर्वस्य शङ्करस्य रीतिः शीलम् ऐश्वर्यादिकं प्रत्यनासक्तिः रूपादिकं हरति अनुकरोतीति तेन, सर्वरीत्या सर्वप्रकारेण मनोहारकः वा तेन, पक्षे—शर्वर्याः निशायाः इतीः अन्धकारः तस्य हारिणा विनाशकेन, **दलितकैरवेण** दलिताः चूर्णीकृताः विनाशिताः कैरवाः रिपवः येन तादृशेन, पक्षे—दलितानि प्रफुल्लितानि कैरवाणि कुमुदानि येन तादृशेन **प्रसाधिताशेन** प्रकर्षेण साधिता स्ववशीकृता आशाः दिशः येन तादृशेन अथ वा प्रकर्षेण साधिताः पूरिताः आशाः प्रजानामभिलाषः येन, पक्षे—प्रसाधिताः अलङ्कृताः आशाः दिशः येन तादृशेन, **विलोकिताः** दृष्टाः **जलधयः इव**

सागराः इव सन्तः सज्जनाः **समुल्लसितगोत्राः** समुल्लसिताः वृद्धिं प्राप्ताः गोत्राः भूमिर्गोसमूहः येषां तादृशाः अथवा समुल्लसितं समुद्दीपितं प्रख्यापिमिति भावः, गोत्रं वंशं यैः तादृशाः, पक्षे–समुल्लसिताः तरङ्गैः अघातिताः गोत्राः तटवर्तिनः पर्वताः यैः तादृशाः **सुदूरविवर्धितजीवनाः** सुदूरम् अत्यधिकं विवर्धितं जीवनं जीविका येषां तादृशाः, पक्षे–सुदूरम् अत्यधिकमुच्चैः विवर्धितं उच्छलितं जीवनं जलं येषां तादृशाः **प्रसन्नसत्वाः** प्रसन्नं स्वच्छं कपटादिरहितं सत्वं मनः अन्तःकरणं येषां तादृशाः, पक्षे–प्रसन्नाः सत्वाः प्राणिनः जलजन्तवः वा येषु तादृशाः **पराम् ऋद्धिं** अत्यधिकं समृद्धिम् **अवापुः** लब्धवन्तः।

**( कन्दर्पकेतुसौन्दर्यवर्णनम् )**

**यस्य च जनितानिरुद्धलीलस्य, रतिप्रियस्य, कुसुमशरासनस्य मकरकेतोरिव दर्शनेन, वनिताजनस्य हृदयमुल्ललास।**

**संस्कृतव्याख्या**–मकरकेतोरिव यस्य दर्शनेन वनिताजनस्य हृदयमुल्लला-सेत्यन्वयः। **जनितानिरुद्धलीलस्य** जनिताः उत्पादिताः अनिरुद्धाः अनिवारिताः लीला विलासाः कामक्रीडा वा येन तादृशस्य अनिवारितकामक्रीडोत्पादकस्य इत्यर्थः, पक्षे–जनिता उत्पादिता अनिरुद्धस्य स्वपुत्रस्य लीला बालक्रीडा येन तादृशस्य **रतिप्रियस्य** रतिः कामक्रीडा प्रिया अभिलषिता येन तस्य, पक्षे–रतिः कामपत्नी प्रिया अभीष्टा यस्य तस्य, **कुसुमशरासनस्य** कुसुमशरं कामदेवम् अस्यति तिरस्करोति स्वलावण्येनेति तादृशस्य, पक्षे–पुष्पधन्वनः **मकरकेतोः इव** कामदेवस्य इव **यस्य च** यस्य कन्दर्पकेतोः **दर्शनेन** दृष्टिपथमागतेन **वनिताजनस्य** युवतिलोकस्य **हृदयम्** अन्तःकरणं कामक्रीडायै **उल्ललास** समुल्लासं हर्षं वा प्राप।

**यस्मै चानुगतदक्षिणसदागतये, नेत्रश्रुतिसुखदाय, कोमलकोकिलरुताय विकासितपल्लवाय, कृतकान्तारतरङ्गाय सुरभिसुमनोऽभिरामाय, सर्वजनसुलभपद्माय, विस्तृतकनकसम्पदे अतिक्रान्तदमनकाय वसन्तायेव, उपवनलता इवोत्कलिकासहस्रसङ्कुलः भ्रमरसङ्गताः, प्रबालहारिण्यः विलसद्वयसस्यतरुण्यः स्पृहयाञ्चकुः।**

**संस्कृतव्याख्या**–वसन्ताय उपवनलाः इव यस्मै तरुण्यः स्पृहयाञ्चकुः इत्यन्वयः। **अनुगतदक्षिणसदागतये** अनुगतानाम् अनुचराणां दक्षिणानां

कुशलानां पण्डितानां वा सतां सज्जनानां च आगतिः आगमनस्थानं तस्मै, पक्षे–अनुगतः अनुसृतः दक्षिणः दक्षिणपथादायातः सदागतिः वायुः यस्मिन् तस्मै, **नेत्रश्रुतिसुखदाय** सौन्दर्येण नेत्राभ्यां मधुरवचसा श्रुतीभ्यां कर्णाभ्यां सुखदाय आनन्दप्रदात्रे। पक्षे–नेत्राभ्यां श्रुतिः येषां ते नेत्रश्रुतयः सर्पा तेषां सुखदाय आनन्ददात्रे **कोमलकोकिलरुताय** कोमलं मधुरं कोकिलस्य इव रुतं वचनं यस्य तादृशाय, पक्षे–कोमलं मधुरं कोकिलरुतं कोकिलकूजनं यस्मिन् तस्मै। **विकासितपल्लवाय** विकासितपल्लवाः श्रृंगारचेष्टाः येन तस्मै अथवा विकासितं पल्लवं बलं येन तस्मै, पक्षे–विकासिताः पल्लवाः किसलयानि येन तस्मै। **कृतकान्तारतरङ्गाय** कृतः सम्पादितः कान्तासु रमणीषु रतेः सुरतस्य रङ्गः अनुरागः येन तादृशाय, पक्षे–कृतः कान्ताराणां वनानां तरङ्गः प्रकम्पनं येन तस्मै। **सुरभिसुमनोऽभिरामाय** सुरभिभिः सुगन्धिभिः सुमनैः पुष्पैः अभिरामः मनोहरः तस्मै अथवा सुरभयः ख्याताः सुमनसः पाण्डिताः तैः अभिरामः तस्मै, पक्षे–सुरभिभिः सुगन्धितैः सुमनैः पुष्पैः अभिरामः रमणीयः तस्मै। **सर्वजनसुलभपद्माय** सर्वेषां जनानां सुलभा सुप्राप्या सुभोग्या वा पद्मा लक्ष्मीः, ऐश्वर्यम् इति भावः, यस्य तस्मै, पक्षे–सर्वजनसुलभं पद्मं कमलं यस्य तस्मै। **विस्तृतकनकसम्पदे** विस्तृता विस्तीर्णा प्रचुरेत्यर्थः कनकसम्पत् यस्य तस्मै, पक्षे–विस्तृतः कनकः धतूरः चम्पकपुष्पं वा यस्मिन् तस्मै। **अतिक्रान्तदमनकाय** अतिक्रान्ताः स्वशौर्यादिना अभिभूताः दमनकाः युद्धवीराः येन तस्मै, पक्षे–अतिक्रान्ताः अतिव्याप्ताः दमनकालः सुरभियुक्ताः लताविशेषः यस्मिन् तस्मै। **वसन्ताय इव यस्मै** कन्दर्पकेतवे **उत्कलिकासहस्त्रसङ्कुलाः**। उत्कलिकानाम् उत्कण्ठानां सहस्त्रेण असंख्यातेन अनेकै उत्कण्ठाभिः इत्यर्थः, सङ्कुलाः युक्ताः पूर्णाः वा, पक्षे–उत्कलिकानां कोरकाणां सहस्त्रेण सङ्कुलाः। **भ्रमरसङ्गताः** भ्रमरैः कामिजनैः सङ्गताः मिलिताः परिवृताः वा, पक्षे–भ्रमरैः मधुकरैः सङ्गताः। **प्रवालहारिण्यः** प्रवालानां विद्रुमाणां हारः माला येषां ताः अथवा प्रबालैः प्रकृष्टैः केशैः हारिण्यः मनोरमाः, पक्षे–प्रवालानि किसलयानि तैः हारिण्यः मनोहारिण्यः **विलसद्वयसः** विलसत् विशेषेण प्रस्फुरत् अङ्गेषु वयः यौवनं यासां ताः, पक्षे–विलसन्ति विशेषेण अलङ्कृतानि वयांसि पक्षिणः यासु ताः, **उपवनलताः इव उद्यानलता** इव तरुण्यः युवतयः **स्पृहपाश्चकुः** अभिलाषमकुर्वन्।

## ( कन्दर्पकेतुवीरत्ववर्णनम् )

**यस्य च समरभुवि भुजदण्डेन कोदण्डं, कोदण्डेन शराः, शरैररिशिरः, अरिशिरसा भूमण्डलं, भूमण्डलेनाननुभूतपूर्वो नायकः, नायकेन कीर्त्तिः, कीर्त्त्या च सप्त सागराः, सागरैः कृतयुगादिराजचरितस्मरणम्, स्मरणेन स्थैर्यम्, स्थैर्येण प्रतिक्षणमाश्चर्यमासादितम्।**

**संस्कृतव्याख्या–समरभुवि** रणभूमौ **यस्य** चन्द्रकेतोः **भुजदण्डेन** बाहु-दण्डेन **कोदण्डं** धनुः **कोदण्डेन** धनुषा **शराः** बाणाः **शरैः** बाणैः **अरिशिरः** शत्रुशिरः **अरिशिरसा** शत्रुशिरसा **भूमण्डलं** पृथ्वीमण्डलं **भूमण्डलेन** पृथ्वी-मण्डलेन **अननुभूतपूर्वः** पूर्वम् अनुभूतं न भवतीत्यननुभूतपूर्वः **नायकः** नेता **नायकेन** नेतृणा **कीर्त्तिः** यशः **कीर्त्या** यशसा **सप्त सागराः** सप्त समुद्राः **सागरैः** समुद्रैः **कृतयुगादिराजचरितस्मरणं** सतयुगादिनृपचरितस्मरणं **स्मरणेन स्थैर्यं** स्थिरता **स्थैर्येण आश्चर्यं असादितं** प्राप्तम्। मालादीपकमलङ्कारः।

**यस्य च प्रतापानलदग्धदयितानां रिपुसुन्दरीणां करतलताडनभीतैरिव मुक्ताहारैः पयोधरपरिसरो मुक्तः।**

**संस्कृतव्याख्या–यस्य** कन्दर्पकेतोः **प्रतापानलदग्धदयितानाम्** प्रतापः तेजः एव अनलः अग्निः तेन दग्धाः भस्मीभूताः दयिताः प्रियतमाः पतयः यासां तासां **रिपुसुन्दरीणाम्** शत्रुपत्नीनां **करतलताडनभीतैः इव** करतलेन शत्रुपत्नीनां हस्तेन यत् ताडनं वैधव्यकष्टेन वक्षःस्थलताडनं तस्मात् भीतैः भयाक्रान्तैः इव अत्रोत्प्रेक्षा, वक्षःस्थलताडनाद् तत्र स्थित्वादस्माकमपि ताडनं भविष्यतीति मन्यमानैरिति भावः **मुहक्ताहारैः** मौक्तिकहारैः **पयोधरपरिसरः** पयोधरयोः स्तनयोः परिसः उपान्तप्रदेशः मुक्तः परित्यक्तः।

## ( कन्दर्पकेतुखड्गवर्णनम् )

**यस्य च निशितनाराचजर्ज्जरितमत्तमातङ्गकुम्भस्थलविगलितनिस्त-लमुक्ताफलनिकरदन्तुरितपरिसरे, पतत्पत्ररथे, रक्तवारिसमुड्ड्यमान-द्विरदपदकच्छपे विलसदुत्पलपुण्डरीके, वाहिनीशतसमाकुले, नृत्य-त्कबन्धविधुरे, सुरसुन्दरीसमागमोत्सुकभटाहङ्कारभाषणरवभीषणे, सागर इव समरशिरसि, भिन्नपदातिकरितुरगरुधिरार्द्रजयलक्ष्मीपादाल-क्तकरागरञ्जित इव खड्गो रराज।**

**संस्कृतव्याख्या**–सागर इव समरशिरसि यस्य खड्गो रराजेत्यन्वय:। **निशितनाराचजर्ज्जरितमत्तमातङ्गकुम्भस्थलविगलितनिस्तलमुक्ताफलनिकरदन्तुरितरिसरे** निशितै: अतितीक्ष्णै: नाराचै: लौहबाणै: जर्ज्जरितानि शिथिलानि छिन्नानि इत्यर्थ: मत्तमातङ्गकुम्भस्थलानि मत्तानां मदस्राविणां मातङ्गानां हस्तीनां कुम्भस्थलानि कपोलस्थलानि तेभ्य: विगलितै: प्रस्रवितै: निस्तलै: वर्तुलाकारै: मुक्ताफलनिकरै: मौक्तिकसमूहै: दन्तुरित: निम्नोन्नतभूत: परिसर: प्रान्तप्रदेश: यस्य तादृशे। **पतत्पत्ररथे** पतन्त: पत्ररथा: बाणपक्षा: यस्मिन् तस्मिन् अथवा पतन्ति पत्राणि वाहनानि रथा स्यन्दनानि च यस्मिन् तस्मिन्, पक्षे–पतन्त: जलपानायायान्त: पत्ररथा: पक्षिण: यत्र तादृशे। **रक्तवारिसमुङ्ख्यमानद्विरदपदकच्छपे** रक्तं रुधिरं वारि जलमिव रक्तमेव वारि इति वा तत्र समुङ्ख्यमानानि उत्प्लवमानानि द्विरदपदानि हस्तीपदानि कच्छपा: इव यस्मिन् तत्र पक्षे–रक्तं रुधिरम् इव वारि जलं तत्र समुङ्ख्यमानानि द्विरदपदानीव कच्छपा: यत्र तादृशे। **विलसदुत्पलपुण्डरीके** विलसन्ति शोभमानानि उद्गतं पलं माँसं येभ्य: तानि इव उत्पलानि मांसरहितानि अस्थिमात्रशेषाणि शरीराणी पुण्डरीकाणि सितच्छत्राणि मृज्जनानां हृत्कमलानि वा यत्र तादृशे, पक्षे–उत्पलानि कुमुदानि पुण्डरीकाणि श्वेतकमलानि यत्र तादृशे। **वाहिनीशतसमाकुले** वाहिनीनां सेनानानां शतेन असंख्येन समाकुले व्याप्ते। पक्षे–वाहिनीनां नदीनां शतेन समाकुले व्याप्ते **नृत्यत्कबन्धविधुरे** नृत्यद्भि: शिरच्छेदेन इतस्तत: प्रलुण्ठद्भि: कबन्धै: रुण्डै: बन्धुरे उन्नतानते, पक्षे–नृत्यद्भि: उच्छ्लद्भि: कबन्धै: जलै: बन्धुरे मनोहरे। **सुरसुन्दरीसमागमोत्सुकमताहङ्कारभाषणरवभीषणे** सुरसुन्दरीणाम् अप्सरसां समागमे सङ्गमने लाभे वा उत्सुका: उत्कण्ठिता: ये भटा: मृता: सैनिका: तेषाम् अहङ्कारेण गर्वेण यो भाषण: वीरत्वकथनध्वनि: तेन भीषणे भयप्रदे, अप्सरसां समागमोत्सुका: मृता: सैनिका: परस्परं युध्यमान: आहूयन्ते इत्यर्थ:, पक्षे–सुरसुन्दरी: नाम मत्स्यविशेषा: तेषां समागमे लाभे प्राप्तौ वा उत्सुकानां भटानां केवटादीनामहङ्कारभाषणरवेण भीषणे। **सागरे इव** समुद्रे इव, **समरशिरसि** युद्धभूमौ **यस्य** कन्दर्पकेतो: **खण्ड्ग: भिन्नपदातिकरितुरगरुधिरार्द्रजयलक्ष्मीपादालक्तकरागरञ्जित: इव** भिन्नानां विदारितानां मृतानां पदातीनां पदसैनिकानां करिणां हस्तीनां तुरगाणाम् अश्वानां च रुधिरेण रक्तेन आर्द्र: क्लिन्न: जयलक्ष्म्या: विजयश्रित: पादयो: चरणयो: अलक्तकरागेण लाक्षारक्तेन रक्तिम्ना वा रञ्जित: रक्तवर्णीकृत: इव **रराज** सुशोभितवान्।

**( प्रभातकालवर्णनम् )**

**अथ स कदाचिदवसन्नायां यामवत्यां दधिधवलकालक्षपणकग्रासपिण्ड इव, निशायमुनाफेनपुञ्ज इव, मेनकानखमार्जनधवलशिलाशकल इव, मधुच्छत्रच्छायमण्डलोदरे, पश्चिमाचलोपधानसुखनिषण्णशिरसो राजतताटङ्कचक्र इव, श्यामश्यामायाः, शेषमधुभाजिचषक इव विभारीवध्वाः, अपरजलधिपयसि शङ्खकान्तिकामुक इव मज्नति कुमुदिनीनायके.....।**

**संस्कृतव्याख्या**–कन्दर्पकेतोः वर्णनं कृत्वा प्रभातकालिके स्वप्ने सोऽष्टादशवर्षीयां काञ्चित् कन्यकां ददर्शेति कथां वर्णनाभिलाषी कविः पूर्वं प्रभातकालं वर्णयति **अथेत्यादिना।** अथ सः कदाचित् स्वप्ने कन्यां ददर्शेत्यन्वयः। **अथ** अनन्तरं **सः** कन्दर्पकेतुः **कदाचित्** एकदा **यामवत्यां** रात्रौ **अवसन्नायां** समाप्तायां प्रभातकाले इत्यर्थः, **कुमुदिनीनायके** चन्द्रमसि **दधिधवलकालक्षपणकग्रासपिण्डे इव** कालः समयः यमो वा सः इव क्षपणकः बौद्धः जैनः वा कालक्षपणकः दध्नामिश्रत्वाद्धवलः श्वेतवर्णः यः कालक्षपणकस्य ग्रासपिण्डः कवलपिण्डः तस्मिन्न्वि विद्यमाने। **निशायमुनाफेनपुञ्जे इव** निशा रात्रिः एव यमुना सूर्यतनया नदी नीलत्वसाम्यात् तस्याः फेनपुञ्जे इव डिण्डीसमूहे इव **मेनकानखमार्जनधवलशिलाशकले इव** मेनकायाः अप्सरसः हिमालयस्य पत्न्याः वा नखमार्जनाय नखप्रक्षालनाय यत् धवलं शुभ्रं शिलाशकलं पाषाणखण्डं स्फटिकखण्डम् इत्यर्थः तादृशे। **मधुच्छत्रच्छायमण्डलोदरे** मधुच्छत्रस्य मधुकोशस्य इव छाया कान्तिः यस्य तादृशं मण्डलोदरं बिम्बमध्यं यस्य तादृशे। **पश्चिमाचलोपधानसुखनिषण्णशिरसः** पश्चिमाचलः अस्ताचलः एव उपधानमुपबर्हः तस्मिन् सुखेन सुखपूर्वकेण निषण्णं स्थितं यस्याः तस्याः **श्यामश्यामायाः** श्यामा रात्रिः एव श्यामाः षोडशी बाला तस्याः **राजतताटङ्कचक्रे इव** राजतं रजत–निर्मितं यत् ताटङ्कचक्रं वर्तुलाकारश्रोत्राभूषणविशेषः तादृशे इव। **विभावरीवध्वाः** विभावरी रात्रिः एव वधूः कामिनी तस्याः **शेषमधुभाजिचषके इव** शेषं पीतावशिष्टं यद् मधुमद्यं तद्भजतीति तादृशे चषके पानपात्रे इव विद्यमाने। **अपरजलधिपयसि** पश्चिमसमुद्रजले **शङ्खकान्तिकामुके इव** शङ्खस्य शुक्तेः कान्ति शोभां कामयत अभिलषत इति तादृशे **इव मज्जति** निमग्ने सति......।

**शिशिरहिमशीकरकर्दमितकुमुदपरागमध्यबद्धचरणेषु षट्चरणेषु, कलप्रलापबोधितचकिताभिसारिकासु सारिकासु, प्रबुद्धाध्ययनकर्मठेषु मठेषु, विभासरागमुखरकार्पटिकजनोपगीयमानकाव्यकथासु रथ्यासु.....।**

**संस्कृतव्याख्या**–तदा **षट्चरणेषु** भ्रमरेषु **शिशिरहिमशीकरकर्दमित-कुमुदपरागमध्यबद्धचरणेषु** शिशिरैः शीतलैः हिमशीकरैः हिमजलबिन्दुभिः कर्दमितस्य कर्दमवदाचरितस्य पङ्कत्वं नीतस्य वा कुमुदानां कैरवाणां परागस्य किञ्जल्कस्य मध्ये अन्तः बद्धाः संसक्ताः चरणाः पादाः येषां तादृशेषु सत्सु। **सारिकासु** पक्षिविशेषासु **कलप्रलापबोधितचकिताभिसारिकासु** कलः अव्यक्तमधुरः यः प्रलापः ध्वनिः तेन बोधिताः सूचिताः स्वपाज्जागरिताः वा अत एव चकिताः अन्यपुरुषदर्शनाशङ्कया भयाक्रान्ताः अभिसारिकाः नायिकाविशेषाः याभिः तादृशीषु सतीषु। **मठेषु** छात्रावासेषु **प्रबुद्धाध्ययनकर्मठेषु** प्रबुद्धाः स्वापोत्थिताः अध्ययनकर्मठाः अध्ययनशीलाः छाया: येषु तादृशेषु सत्सु। रथ्यासु मार्गेषु **विभासरागमुखरकार्पटिकजनोपगीयमानकाव्यकथासु** विभासरागेण रागविशेषेण मुखराः वाचालाः गायन्तः ये कार्पटिकाः जनाः ग्रामे ग्रामे अटन्तः विभासगानं गाययित्वा वस्त्रयाचकभिक्षवः लोकाः तैः गीयमाना काव्यकथा यासु तादृशीषु सतीषु।

## ( प्राभातिकदीपवर्णनम् )

**सकलनिपीतनैशतिमिरसङ्घातमतनीयस्तया वोढुमसमर्थेष्विव कज्जलव्याजादुद्वमत्सु, कामिमिथुननिधुवनलीलादर्शनार्थमिवोद्ग्रीविकाश-तदानखिन्नेषु, विविधविभ्रमसुरतक्रीडासाक्षिषु, शरणागतमिवाधोनिलीनं तिमिरमवत्सु, दुर्जनवचनेष्विव दग्धस्नेहतया मन्दिमानमुपगतेषु। अतिवृद्धेष्विव दशान्तमुपगतेषु, विपन्नसदीश्वरेष्विव पात्रमात्रावशेषेषु, दानवेष्विव निशाऽन्तमध्यचारिषु, अस्तगिरिशिखरेष्विव पतत्पतङ्गेषु प्रदीपेषु.....।**

**संस्कृतव्याख्या**–प्रभातकालिकं दीपकं वर्णयत्यत्र। सकलेत्येवं विधेषु सत्सु प्रदीपेषु इति सम्बन्धः। प्रदीपेषु दीपकेषु **सकलनिपीतनैशतिमिरसङ्घातम्** सकलं सम्पूर्णं निरवशेषं यथास्यात्तथा इति क्रियाविशेषणम् अथवा सकलानि सम्पूर्णानि

इति तिमिरविशेषणम् तादृशानि यानि नैशानि रात्रिजातानि तिमिराणि अन्धकाराः तेषां सङ्घातं समूहम् **अतनीयस्तया** पीततमसाम् अतिशयेन **वोढुं** स्वस्मिन् धारयितुम् **असमर्थेषु** सामर्थ्यरहितजातेषु **कज्जलव्याजात्** कज्जलस्य व्याजात् व्यपदेशात् **उद्वमत्सु इव** उद्गिरत्सु इव। **कामिमिथुननिधुवनलीलादर्शनार्थं** कामिनोः कामाभिलाषिणोः मिथुनं युगलं तस्य निधुवनलीलायाः सुरतक्रीडायाः दर्शनार्थं दर्शनाय **उद्ग्रीविकाशतदानखिन्नेषु** उद्गीविकाशतस्य अनेकशः ग्रीवोन्नमनस्य दानेन हेतुना खिन्नेषु इव। **विविधविभ्रमसुरतक्रीडासाक्षिषु** विविधैः अनेकप्रकारकैः विभ्रमैः विलासैः या सुरतक्रीडा कामकेलिः यासु तासां साक्षिषु साक्षाद्रूपेण दर्शकेषु। **शरणागतम् इव** शरणप्राप्तम् इव **अधोनिलीनं** अधः स्वतले निलीनम् उपगूढं **तिमिरम्** अन्धकारम् **अवत्सु** रक्षत्सु, **दग्धस्नेहतया** दग्धः विनष्टः समाप्तः इत्यर्थः स्नेहः तैलं येषां ते दग्धस्नेहाः तेषां भावः दग्धस्नेहता तया, पक्षे–दग्धस्नेहतया विनष्टस्नेहेन **मन्दिमानं** कृशत्वम् **उपगतेषु** प्राप्तेषु, **दशान्तम्** दशायाः वर्तेः अन्तम् समाप्तिम्, पक्षे–दशायाः अवस्थायाः अन्तम् **उपगतेषु** प्राप्तेषु। **अतिवृद्धेषु इव** अतिजरासम्पन्नजनेषु इव, **दशान्तरम्** अन्तभागम्, पक्षे आयुसमाप्ति **उपगतेषु** प्राप्तेषु। **विपन्नसदी-श्वरेषु इव** विपन्नाः विपद्ग्रस्ताः ये सन्तः साधवः ईश्वराः राजनः धनिकाःवा तेषु इव, **पात्रमात्रावशेषेषु** पात्रमात्रं केवलं तैलाधारभाजनम् एवावशेषं येषां तेषु, पक्षे केवलं स्नेहभाजनमेवाशेषं येषां तेषु। **दानवेषु इव** निशाचरेषु इव, **निशान्तमध्यचारिषु** निशान्तस्य गृहस्य मध्ये अन्तः सञ्चरितुं शीलं येषां तादृशेषु पक्षे निशायाः रात्रेः अन्तः मध्ये च सञ्चरणशीलेषु **पतत्पतङ्गेषु** पतन्तः इतस्ततः आगत्य दीपकोपरि उपविशन्तः पतङ्गाः शलभाः येषु तेषु पक्षे–पतन् अस्तंगच्छन् पतङ्गः सूर्यः येषु तेषु अस्तगिरिशिखरेषु इव अस्ताचलशिखरेषु इव जातेषु..........।

**अनवरतनिपतन्मकरन्दबिन्दुसन्दोहास्वादमदमुग्धमधुकरनिकुरम्ब-झङ्कारमुखरितेषु, म्लानिमानमुपगच्छत्सु वासागारकुसुमोपहारेषु, ....।**

**संस्कृतव्याख्या–**शयनगृहस्य पुष्पाणि विशिनष्टि–वासागार कुसुमोपहारेषु म्लानिमानमुपगच्छत्सु इत्यन्वयः। **वासागारकुसुमोपहारेषु** वासागारेषु शयनगृहेषु विकीर्णा ये कुसुमोपहाराः उपहारपुषणि तेषु **अनवरतनिपतन्मकरन्दबिन्दु-**

**सन्दोहास्वादमदमुग्धमधुकरनिकुरम्बझङ्कारमुखरितेषु** अनवरतं निरन्तरं निपतन् निःस्रवन् यो मकरन्दबिन्दूनां पुष्परस बिदूनां सन्देहः समुदायः तस्यास्यवादेन पानेन यो मदः हर्षः तेन मुग्धा अत्यधिकं हर्षान्विता ये मधुकराः भ्रमराः तेषां निकुरम्बस्य समुहस्य झङ्कारेण गुञ्जारेण मुखरितेषु शब्दायमानेषु **म्लानिमानं** म्लानत्वम् **उपगच्छत्सु** प्राप्तेषु सत्सु.....।

**( प्रियैरालिङ्ग्यमानाकामिनीवर्णनम् )**

**विगलत्कुन्दैरलकैः प्रियविरहशोकाद्बाष्पबिन्दूनिवोत्सृजतीषु, प्रियतमगमननिषेधमिव कुर्वतीषु वाचालतुलाकोटिभिश्चरणपल्लवैः, रजनिशेषसुरतभरपरिश्रमविगलितकेशपाशदरदलितमाधवीमालापरिमललुब्धमधुकरनिकुरम्बपक्षानिलनिपीतनिदाघजलकणिकासु, उद्वेल्लद्भुजवल्लिकङ्कणझणत्कारसुभागासु, नखपदसंसक्तकेशपाशविनिर्मोकवेदनाकृतसीत्कारविनिर्गतदुग्धमुग्धदशनकिरणच्छटाधवलितभोगावासासु, पुनर्दर्शनप्रश्नविधुरसखीजनानुक्षणवीक्ष्यमाणप्रियतमासु, क्षणदागतसुरतवैयात्यवचनसंस्मारकगृहशुकचाटुव्याहृतिक्षणजनितमन्दाक्षासु, शरद्वासरलक्ष्मीष्विव नखालङ्कृतपयोधरासु, आसन्नमरणास्विव जीवितेशपुराभिमुखीषु, वसन्तराजिष्विव उत्कलिकाबहुलासु, प्रियैरालिङ्ग्यमानासु कामिनीषु......।**

**संस्कृतव्याख्या**—विगलत्कुन्दैरित्यादिना वर्णितासु कामिनीषु प्रियैरालिङ्ग्यमानासु इत्यन्वयः। विगलत्कुन्दैः विगलन्ति अधःपतन्ति कुन्दानि कुन्दपुष्पापि येभ्यः तादृशैः **अलकैः प्रियविरहशोकात्** प्रियाणां दयितजनानां विरहस्य वियोगस्य शोकात् **बाष्पबिन्दून्** अश्रूणि **उत्सृजतीषु इव** मुञ्चतीषु इव, उत्प्रेक्षालङ्कारः, **वाचालतुलाकोटिभिः** वाचालाः शब्दायमानाः तुलाकोटयः नूपुराः येषु तादृशैः **चरणवल्लवैः**, पादकिसलयैः, **प्रियतमगमननिषेधं** प्रियतमानां दयितजनानां गमनस्य निषेधं **कुर्वतीषु इव** सम्पादयतीषु इव, अत्रोत्प्रेक्षा, **रजनिशेषसुरतभरपरिश्रमविगलितकेशपाशदरदलितमाधवीमालापरिमललुब्धमधुकरनिकुरम्बपक्षानिलनिपीतनिदाघजलकणिकासु** रजनिशेषे रात्रेरन्तिमे प्रहरे यः सुरतभरः सम्भोगातिशयः तत्र परिश्रमेण उत्पन्नः सुरतकाले एव विगलिते विश्लथिते केशपाशे कचकलापे दरदलितायाः अल्पप्रस्फुटितायाः माधवीमालायाः अतिमुक्तकुसुममालायाः

परिमले सुगन्धे लुब्धानाम् अभिलाषीणां मधुकराणां भ्रमराणां निकुरम्बस्य समूहस्य पक्षानिलेन पक्षवायुना निपीताः शोषिताः निदाघजलकणिकाः स्वेदजलबिन्दवः यासां तादृशीषु सतीषु। **उद्वेलद्भुजवल्लिकङ्कणझणत्कारसुभगासु** उद्वेलन्त्यः विवर्तमानाः या भुजवल्लयः बाहुलताः तासां कङ्कणानां वलयानां झणत्कारेण झञ्झन्ध्वनिनासुभगासु मनोहरासु सतीषु। **नखपदसंसक्तकेशपाशविनिर्मोक-वेदनाकृतसीत्कारविनिर्गतदुग्धमुग्धदशनकिरणच्छटाधवलितभोगावासासु** नखपदेषु नखक्षतस्थानेषु संसक्तः सम्पृक्तः यः केशपाशः केशसमूहः तस्य विनिर्मोकेन मोचनेन या वेदना पीडा तया कृतः यः सीत्कारः सी–सी इति ध्वनिः तस्माद् विनिर्गयता बहिर्निष्क्रान्तया दुग्धमुग्धानां दुग्धवद्रव्याणां दशनानां दन्तानां किरणानां छटया शोभया धवलितः धावलीकृतः भोगावासः सुरतगृहं शयनगृहं वा याभिः तादृशीषु सतीषु। **पुनर्दर्शनप्रश्नविधुरसखीजनानुक्ष-णवीक्ष्यमाणप्रियतमासु** पुनर्दर्शनप्रश्ने 'पुनः कदागमन भविष्यतीति प्रश्नविषये विधुराः कातराः तादृशैः सखीजनैः सखीलोकैः अनुक्षणं निरन्तरं वीक्ष्यमाणः विलोक्यमानः प्रियतमः दयितः यासां तादृशीषु सतीषु। **क्षणदागतसुरतवैयात्य-वचनसंस्मारकगृहशुकचाटुव्याहृतिक्षणजनितमन्दाक्षासु** क्षणदा रात्रिः तद्गतानि यानि वैयात्यवचनानि 'मा–मा मानद' इत्यादीनी धृष्टवचनानि तत्संस्मारिकाभिः गृहशुकानां गृहपालितशुकानां चाटुव्याहृतिभिः प्रियवचनोक्तिभिः क्षणं क्षणमात्रं जनितम् उत्पन्नं मन्दाक्षं लज्जा यासां तादृशीषु सतीषु **शरद्वासरलक्ष्मीषु इव** शरदः शरत्कालस्य वासरलक्ष्मीषु दिवसशोभासु इव **नखालङ्कृतपयोधरासु** नखैः नखक्षतैः अलङ्कृतौ शोभायमानौ पयोधरौ कुचौ यासां तादृशीषु समीषु, पक्षे–खे आकाशे अलम् अधिकतया कृता विस्तारिताः अलङ्कृताः सुशोभिताः वा पयोधराः मेघाः याभिः तादृश्यः न भवन्तीति नखालङ्कृतपयोधराः तासु। **आसन्नमरणासु इव** आसन्नं समुपस्थितं मरणं यासां तादृशीषु इव **जीवितेशपुराभिमुखीषु** जीवितेशस्य दयितस्य पुरस्य शरीरस्य अभिमुखीषु सम्मुखे विद्यमानासु, पक्षे–जीवितेशस्य यमराजस्य पुराभिमुखीषु नगराभिमुखीषु। **वसन्तराजिषु इव** वसन्ते वसन्ततौ याः वनराजयः काननपङ्क्तयः तासु इव **उत्कलिकाबहुलासु** उत्कालिका उत्कण्ठा बहुला प्रचुराः यासां तादृशीषु सतीषु **कामिनीषु** रमणीषु **प्रियैः** प्रियतमैः **आलिङ्ग्यमानासु** परिजृम्भमानासु सतीषु....।

**( प्राभातिकपवनवर्णनम् )**

**आन्दोलितकुसुमकेसरे केसरेणुमुषि रणितनूपुरमणीनां रमणीनाम्, विकचकुमुदाकरे मुदाकरे सङ्गभाजि, प्रियविरहितासु रहितासु सुखेन मुर्मुरचूर्णमिव समन्तादर्पके दर्पकेषुदहनस्य, दूरप्रसारितकोकप्रियतमारुते मारुते वहित....।**

**संस्कृतव्याख्या–** अतः परं प्रभातकालिकस्य पवनस्य वर्णनम्। आन्दोलितकुसुमकेसरे इत्यादिविशेषण युक्ते मारुते वहतीत्यन्वयः। **आन्दोलितकुसुमकेसरे** आन्दोलिताः प्रकम्पिताः कुसुमानां पुष्पाणां केसराः परागाः येन तादृशे, **रणितनूपुरमणीनां** रणिताः ध्वनिताः नूपुरमणयः मञ्जीरमणयः यासां तासां **रमणीनां** कामिनीनां **केसरेणुमुषि** अत्र शसयोरभेदः इति शकारस्थाने सकारः प्रयुक्तः। केशेषु विद्यमानः ये रेणवः सिन्दूरादिपरागाः तान् मुष्णातीति तस्मिन् अथवा केशेषु विद्यमानानि यानि पुष्पाणि तद्गतरजोहारकम् तस्मिन्। **मुदाकरे** मुदः प्रसन्नतायाः आकरः निधिः तस्मिन् आह्लादके **विकचकुमुदाकरे** विकचः प्रस्फुटितः यः कुमुदाकरः तस्मिन् **सङ्गभाजि** सङ्गं संसर्गं भजतीति तादृशे **सुखेन प्रियविरहितासु** प्रियैः दयितैः विरहितासु वियुक्तासु, प्रियसंसर्गजन्यानन्देन रहितासु शून्यासु विरहिणीषु इत्यर्थः **दर्पकेषुदहनस्य** दर्पकस्य कामदेवस्य यः इषुदहनः वाणाग्निः तस्य **मुर्मुरचूर्णम् इव** तुषाग्निभस्म इव **समन्तात्** पूर्णरूपात् **अर्पके** प्रक्षेपके, **दूरप्रसारितकोकप्रियतमारुते** दूरं प्रसारितं नीतं कोकप्रियतमानां चक्रवाकप्रेयसीनां चक्रवाकीनामित्यर्थः रुतं करुणक्रन्दनं येन तादृशे **मारुते** पवने **वहति** मन्दगतिना चलति सति.....।

**( स्वप्नदृष्टकन्यावर्णनम् )**

**( तत्र कन्याजघनस्थलवर्णनम् )**

**जघनमदननगरतोरणस्त्रजा, मन्मथमहानिधिजघनकोशमन्दिरकनकप्राकारेण, रोमराजिलतालवालवलयेन, जघनचन्द्रमण्डलपरिवेषेण, मदनत्रिभुवनविजयप्रशस्तिवर्णावलोकनकनकपत्रेण, सकलहृदयबन्दीजननिवासगृहपरिखावलयेन, सकलजगल्लोचनलासकविहङ्गमावासकनकशलाकागुणेन, मेखलादाम्या परिकलितजघनस्थलाम्.....।**

**संस्कृतव्याख्या**–अतः परं स्वप्नदृष्टकन्यावर्णनम् अस्ति। जघनमदननगर-तोरस्त्रजा एतादृशेन मेखलादाम्ना काञ्चीगुणेन परिकलितं परिवृतं जघनस्थलं यस्या तामेति सम्बन्धः। मेखलादाम्नै विशिनष्टि–**जघनमदननगरतोरणस्त्रजा** जघनं कीटपुराभागम् एव मदननगरं कामदेवपुरं तस्य तोरणस्त्रजा बहिर्द्वारमालया। **मन्मथमहानिधिजघनकोशमन्दिरकनकप्राकारेण।** मन्मथः कामः एव महानिधिः यस्य तादृशं यत् जघनं तदेव कोशमन्दिरं रत्नगृहं तस्य कनकप्राकारेण स्वर्णनिर्मितसालेन। **रोमराजिजलतावालवलयेन** रोमराणिः रोमावलिः एव लता व्रततिः तस्या आलवालस्य आवापस्य वलयेन परिमण्डलेन। **जघनचन्द्रमण डलपरिवेषेण** जघनमेव चन्द्रमण्डलम् आह्लादकत्वादिधर्मसम्यात् तस्य परिवेषेण परिधिना। **मदनत्रिभुवनविजयप्रशस्तिवर्णावलोकनकनकपत्रेण** मदनस्य कामदेवस्य त्रिभुवनविजयेन लोकत्रयवशीकरणेन समुत्पन्नायाः प्रशस्तेः प्रशंसायाः सूचिकायाः वर्णावल्याः अक्षरपक्तेः तल्लेखनाय स्थितेन कनकपत्रेण स्वर्णमयपट्टेन। **सकलहृदयबन्दीजननिवासगृहपरिखावलयेन** सकलानां सर्वेषां मनुष्याणां हृदयानि एव बन्दीजनानां कारास्थितजनानां निवासगृहं वासमन्दिरं तस्य परिखावलयेन खातचक्रेण, सर्वेषामेव हृदयानि तत्रैव वसन्तीत्यर्थः। **सकलजगल्लोचनलासकविहङ्गमावासकनककशलाकागुणेन** सकलजगतां सर्वेषां मनुष्याणां लोचनानि नेत्राणि एव लासकविहङ्गमाः मयूरपक्षिणः तेषां आवासार्थं निवासाय कनकशलाकागुणेन स्वर्णमययष्टिरूपेण मेखलादाम्ना कञ्जीगुणेन **परिकलितजघनस्थलाम्** परिकलितं परिवृत्तं जघनस्थलं कटिपुरोभागः यस्याः ताम्....।

## ( कन्याकटिभागवर्णनम् )

**उन्नतपयोधरभारान्तरितमुखचन्द्रदर्शनाप्राप्तिखेदेनेव, गुरुतर-नितम्बबिम्बकुचकुम्भनिरुद्धोभयपार्श्वजनितायासेनेव, मम मूर्ध्नि स्थितयोरियत्प्रमाणयोः पयोधरकलशयोः कथं मय्येव पातो भविष्यतीति चिन्तयेव, गृहीतगुरुकलतत्रानुशयेनेव, विधातुरतिपीडयतो हस्तपरामर्शजनितपरिक्लेशेनेव, क्षीणतामुपगतेन मध्यभागेन अलङ्कृताम्....।**

**संस्कृतव्याख्या**–क्षीणतामुपगतेन, मध्यभागेनालङ्कृतामिति सम्बन्धः। मध्यभागस्य क्षीणत्वहेतुमुत्पेक्षते–**उन्नतेति। उन्नतपयोधरभारान्तरितमुख-चन्द्रदर्शनाप्राप्तिखेदेन इव** उन्नतौ उतुङ्गौ पयोधरौस्तनौ एव उन्नतपयोधरा ऊर्ध्वस्थितमेघाः तैः अन्तरितस्य व्यवहितस्य मुखचन्द्रस्य मुखरूपस्य चन्द्रस्य दर्शनाप्राप्त्या विलोकनाभावेन जनितः उत्पन्नः यः खेदः चेतसः क्षोभः तेन इव। **गुरुतरनितम्बबिम्बकुचकुम्भनिरुद्धोभयपार्श्वजनितायासेन इव** अधः स्थाने गुरुतरे अतिविशाले ये नितम्बबिम्बे नितम्बमण्डले अपरस्मिन्नूर्ध्वभागे गुरुतरौ अतिविशालौ यौ कुचकुम्बौ स्तनकलशौ ताभ्यां निरुद्धाभ्याम् आक्रान्ताभ्यां उभाभ्यां पार्श्वाभ्यां जनितः समुत्पादितः यः आयासः परिश्रमः तेन इव। **मम** कटिप्रदेशस्य **मूर्ध्नि** उपरि **स्थितयोः** विद्यमानयोः **इयत्प्रमाणयोः** अतिबृहतयोः **पयोधरकलशयोः** कुचकुम्भयोः **मयि** कटिप्रदेशे **पातः** पतनं भविष्यतीति **चिन्तया इव** मनःसन्तापेन इव। **गृहीतगुरुकलत्रानुशयेन** इव, गृहीतः पत्नीरूपेण यद्गुरुकलत्रं गुरुभार्यां तज्जायमानेन अनुशयेन पश्चत्तापेन इव **अतिपीडयतः** निर्माणकाले अतिक्लेशयतः **विधातुः** सृष्टिकर्तृणः ब्रह्मणा **हस्तपरामर्शजनितपरिक्लेशेन इव** हस्तपरामर्शेन जनितः उत्पन्नः यः परिक्लेशः तेन इव **क्षीणतां** तनुताम् **उपगतेन** प्राप्तेन **मध्यभागेन** कटिप्रदेशेन **अलङ्कृतां** शोभायमानां कन्याम्......।

## ( कन्याकुचवर्णनम् )

**अनुरागरत्नपूरितकनकमयपरुवकाभ्याम्, चूचुकमुद्रासनाथाभ्याम्, अतिगुरुपरिणाहतया पतनभयात् चूचुकच्छलेन विधिना गिरि-सारेणेव कीलिताभ्याम्, सकलावयवनिर्मितशेषलावण्यपुञ्जाभ्यामिव, हृदयतटाककमलमुकुलाभ्यामिव, हृच्छयविलासचातुरकविभ्रमाभ्याम्, रोमावलीलताफलभूताभ्याम्, कन्दर्पदर्पवर्धनचूर्णपूर्णकनककलशाभ्याम्िव, अशेषजनहृदयपतनादिव सञ्जातगौरवाभ्याम्, संसारतरुमहाफलाभ्याम्, हारलतामृणाललोभनीयचक्रवाकाभ्याम्, हारलतारोमराजिव्याजगङ्गा-यमुनासङ्गमप्रयागतटाभ्याम्, त्रिभुवनविजयपरिश्रमखिन्नस्य मकर-केतोर्विश्रमविजनावासगृहाभ्याम् पयोधराभ्यां समुद्भासमानम्.....।**

**संस्कृतव्याख्या**–पयोधराभ्यामुद्भासमानामिति पयोधरौ विशिनष्टि–**अनुरागेति। अनुरागरत्नपूरितकनकमयपरुवकाभ्याम्** अनुरागः स्नेहः एव रत्नानि तैः पूरितौ पूर्णौ कुचरूपौ यौ कनकमयौ स्वर्णनिर्मितौ परुवकौ समुद्गतौ ताभ्याम् इव, शब्दाभावादत्र गम्योत्प्रेक्षा। **चूचुकमुद्रासनाथाभ्यां** कुचयोः रत्नपूरितसम्पुटत्वात् तद्रक्षणाय चूचुके कुचाग्रभागौ एव मुद्रे जतुनिर्मितौ नामाक्षराद्यङ्कितौ चिह्नविशेषौ ताभ्यां सनाथाभ्यां युक्ताभ्यां मुद्राङ्किताभ्यामित्यर्थः। **अतिगुरुपरिणाहतया** अतिगुरुः अतिविशालः परिणाहः आभागः ययोः तयोः हेतुना। **पतनभयात्** अनयोः पतनमाशङ्क्य **विधिना** सृष्टिकर्तृणा ब्रह्मणाः **चूचुकच्छलेन** कुचाग्रव्याजेन **गिरिसारेण** लौहकीलेन **कीलिताभ्याम् इव** सम्यग्रूपेण संयोजिताभ्याम् इव। **सकलावयवनिर्मितशेषलावण्यपुञ्जाभ्याम् इव** सकलानां सर्वेषां हस्तपादादीनाम् अवयवानाम् अङ्गानां निर्मितेः निर्माणानन्तरं शेषम् अवशिष्टं यल्लावण्यं सौन्दर्यं तस्य पुञ्जाभ्यां राशीभ्याम् इव। **हृदयतटाककमलमुकुलाभ्याम् इव** हृदयमेव तटाकः सरोवरः तस्य कमलमुकुलाभ्याम् इव शोभमानाभ्याम्। **हृच्छयविलासचातुरकविभ्रमाभ्यां** हृच्छयस्य कामदेवस्य विलासाय यौ चातुरकौ वर्तुलाकारौ उपधानविशेषौ तयो इव विभ्रमः विलासः ययोः ताभ्याम्, **रोमावलीलताफलभूताभ्यां** रोमावली रोमपङ्क्तिरेव लता तस्याः फलभूताभ्याम्, **कन्दर्पदर्पवर्धनचूर्णपूर्णकनककलशाभ्याम् इव** कन्दर्पस्य मनोभवस्य दर्पं गर्वं वर्धयतीति कन्दर्पदर्पवर्धनं तादृशं यच्चूर्णं तेन पूर्णौ यौ कनककलशौ स्वर्णनिर्मितकुम्भौ ताभ्याम् इव। **अशेषजनहृदयपतनात् इव** अशेषाणां सकलानां जनानां लोकानां हृदयस्य मनसः पतनात् तत्रासञ्जादिव। **सञ्जातगौरवाभ्याम्** सञ्जातं समुत्पन्नं गौरवं विशालत्वं ययोः ताभ्याम् **संसारतरुमहाफलाभ्याम्** संसारः एव तरुः वृक्षः तस्य महाफलाभ्यां बृहत्फलाभ्याम् **हारलतामृणाललोभनीयचक्रवाकाभ्यां** हारलता एव मृणालं कमलदण्डः तस्य लोभनीयौ लुब्धौ कामुकौ इत्यर्थः यौ चक्रवाकौ कोकपक्षिविशेषौ ताभ्यामिव स्थिताभ्याम्। **हारलतारोमराजिव्याजगङ्गायमुनासङ्गमप्रयागतटाभ्याम्** हारलता रोमराजिरिति व्याजः मिषं ययोः तादृशे ये गङ्गायमुने तयोः सङ्गमः सङ्गमस्थानभूतः यः प्रयागः तन्नाम तीर्थविशेषः तस्य तटाभ्यां कूलाभ्याम् इव स्थिताभ्याम्, **त्रिभुवनविजयपरिश्रमखिन्नस्य** त्रिभुवनस्य त्रिलोकस्य विजयेन सञ्जातः यः परिश्रमः क्लन्तिः तेन खिन्नस्य

श्रान्तस्य **मकरकेतोः** मनोभवस्य, **विश्रमविजनावासगृहाभ्यां** विश्रमाय श्रमापनोदाय कल्पिते विजने निर्जने एकान्तभूते ये वासगृहे निवासगृहे ताभ्याम् इव स्थिताभ्याम् **पयोधराभ्यां** कुचयुगलाभ्यां समुद्भासमानां सुशोभमानां कन्याम् ......।

**( कन्याधरवर्णनम् )**

**मुखचन्द्रमण्डलसततसन्निहितसन्ध्यारागेण, द्विजमणिरक्षासिन्दूरमुद्रानु-कारिणा, निस्सरता हृदयानुरागेणेव रञ्जितेन, रागसागरविद्रुमशकलेनेव अधरपल्लवेनोपशोभमानाम्......।**

**संस्कृतव्याख्या**–अत्र वक्ष्यमाणेन अधरपल्लवेनोपशोभमानामिति सम्बन्धः। **मुखचन्द्रमण्डलसततसन्निहितसन्ध्यारागेण** मुखमेव चन्द्रमण्डलं तस्य सततं निरन्तरं सन्निहिता समीपवर्तिनी या सन्ध्या तस्याः रागेणः इव, गम्योत्प्रेक्षा। **द्विजमणिरक्षासिन्दूरमुद्रानुकारिणा** द्विजाः दन्ताः एव मणयः रत्नानि तेषां रक्षायै सुरक्षार्थं सिन्दूरेण कृता या मुद्रा लाक्षाचिह्नविशेषः तद्वद्विद्यमानेन, अधरस्य रागत्वात् सिन्दूरमुद्रोत्प्रेक्षा। **निस्सरता** बहिर्निर्गच्छता **हृदयानुरागेण इव** हृदयस्य अनुरागेण प्रेम्णा इव **रञ्जितेन** रक्तवर्णीकृतेन **रागसागरविद्रुमशकलेन इव** रागः एव सागरः समुद्र तस्य विद्रुमशकलेन प्रवालखण्डेन इव, **अधरपल्लवेन** अधरः एव पल्लवं किसलयं तेन **उपशोभमानाम्** अलंकृताम् कन्याम्......।

**( कन्यानेत्रवर्णनम् )**

**तरुणकेतकदलद्राघीयसा, पक्ष्मलचटुलालसेन, हृदयावासगृहाव-स्थितस्यहृच्छयविलासिनो गवाक्षशङ्कामुपजनयता, सरागेणापि निर्वाणं जनयता, गतिप्रसरनिरोधकश्रवणकृतकोपेनेवोपान्तलोहितेन, धवलयतेव जगदखिलम्, उत्फुल्लकमलकाननसनाथमिव गगनतलं कुर्वता, दुग्धाम्भोधिसहस्राणीवोद्वमता, सकुन्दकुसुमनीलोत्पलमाललक्ष्मीमुपह-सता नयनयुगलेन विभूषिताम्...।**

**संस्कृतव्याख्या**–अतः परं कन्यायाः नेत्रवर्णनम्। नयनयुगलेन विभूषितामिति सम्बन्धः। नेत्रयुगलं विशिनष्टि-**तरुणेति। तरुणकेतकदलद्राघीयसा** तरुणं प्राप्तयौवनं पूर्णताप्राप्तम् इत्यर्थः यत्केतकेदलं केतकीपत्रं तद्वद्द्राघीयसा

विशालेन। **पक्ष्मलचटुलालसेन** पक्ष्मलं पक्ष्मशोभासम्पन्नं चटुलं चञ्चलं अलसं मन्दञ्च तथोक्तेन। **हृदयावासगृहावस्थितस्य** हृदयमेव आवासगृहं निवासस्थानं तस्मिन् स्थितस्य विद्यमानस्य, **हृच्छयविलसिनः** हृच्छयः कामदेवः एव विलासी भोगिजनः तस्य **गवाक्षशङ्काम्** वातायनसन्देहः **उपजनयता** समुत्पादयता। **सरागेण अपि** रागः विषयेच्छाः प्रेम वा तेन सहितेन अपि निर्वाणम् मोक्षं **जनयता** समुत्पादयता स्वयं रागिणः मोक्षजनकत्वमिति विरोधः। रागो रक्तत्वं निर्वाणं सुखमिति परिहारः। **गतिप्रसारनिरोधकश्रवणकृतकोपेन इव** स्वस्य गतिप्रसरस्य वृद्धिविस्तारस्य निरोधके रोधनशीले ये श्रवणे कर्णौ तयोरुपरि कृतः कोपः क्रोधः येन तेन इव, **उपान्तलोहितेन** उपान्ते अपाङ्गप्रदेशे लोहिते रक्तवर्णेन, अत्र हेतूत्प्रेक्षा। **जगदखिलम्** सम्पूर्णं विश्वं **धवलतया इव** श्वेतं कृतया इव। **गगनतलम्** आकाशमण्डलम्, उत्फुल्लकमलकाननसनाथम् विकसितकमलवनयुक्तम् **कुर्वता इव**– सम्पादयता इव। **दुग्धाम्मोधिसहस्राणि** अतिशयशुभ्रतया दुग्धाम्मोधिसहस्राणि अनेकान् क्षीरसागरान् उद्वमता इव **उद्गिरयता इव,** सर्वत्रात्र क्रियोत्प्रेक्षा। **सकुन्दकुसुमनीलोत्पलमालालक्ष्मीम्** कुन्दकुसुमानि माध्यपुष्पाणि विशेषाणिश्वेतानि तैः सहिता या नीलोत्पलमाला नीलकमलमाला तस्याः लक्ष्मीः शोभाम्, **उपहसता** उपहासं कुर्वता तिरस्कुर्वता इत्यर्थः **नयनयुगलेन** नेत्रद्वयेन **विभूषिताम्** शोभायमानां कन्याम्......।

### ( कन्यानासिकाभ्रूलतावर्णनम् )

**दशनरत्नतुलादण्डेनेव, नयनामृतसिन्धुसेतुबन्धेनेव, यौवनमन्मथमत्तवारणयोर्वरण्डकेनेव नासावंशेन परिष्कृताम्। विलोचनकुवलयभ्रमपङ्क्तिभ्याम्, मुखमदनमन्दिरतोरणमालिकाभ्याम्, रागसागरवेणिकाभ्याम्, यौवननर्तकलासिकाभ्याम्, भ्रूलताभ्यां विराजिताम् ......।**

**संस्कृतव्याख्या**–अत्र नासावंशेन परिष्कृताम् इति सम्बन्धः–**दशनेति। दशनरत्नतुलादण्डेन इव** दशनानि दन्ताः एव रत्नानि तेषां तुलादण्डेन तोलनदण्डेन इव। **नयनामृतसिन्धुसेतुबन्धेन इव** नयनं नेत्रमेव अमृतसिन्धुः क्षीरसागरः तस्य सेतुबन्धेन इव। **यौवनमन्मथमत्तवारणयौः** यौवनमन्मथौ एव मत्तवारणौ मत्तकरिणौ तयोः **वरण्डकेन इव। नासावंशेन** नासारूपेण

नासिकारूपेण वंशेन वंशदण्डेन **परिष्कृताम्** शोभायमानाम्। अतः परं भ्रूलताभ्यां विराजितामिति सम्बन्धः—**विलोचनेति। विलोचनकुवलयभ्रमरपङ्क्तिभ्यां** विलोचनं नेत्रमेव कुवलयं नीलोत्पलं तस्य भ्रमरपङ्क्तिभ्यां भ्रमरावलीभ्याम्। **मुखमदनमन्दिरतोरणमालिकाभ्याम्** मुखमेव मदनमन्दिरं कामगृहं तस्य तोरणमालिकाभ्यां वन्दनमालाभ्याम्। **रागसागरवेणिकाभ्यां** रागः एव सागरः समुद्रः तस्य वेणिकाभ्यां प्रवाहाभ्याम् **यौवननर्तकलासिकाभ्यां** यौवनमेव नर्तकः तस्य लासिकाभ्यां नर्तकीभ्याम् **भ्रूलताभ्यां** भ्रूमल्लरीभ्याम् **विराजितां** सुशोभितां कन्याम्......।

**घनसमयाकाशलक्ष्मीमिव उल्लसच्चारुपयोधराम्, जयघोषणा-पन्नजनमूर्तिमिव तुलाकोटिप्रतिष्ठिताम्, सुयोधनधृतिमिव कर्णविश्रान्तलो-चनाम्, वामनलीलामिव दर्शितबलिविभङ्गाम्, वृश्चिकराशिरविस्थितिमिव अतिक्रान्तकन्यातुलाम्, उषामिव अनिरुद्धदर्शनसुखाम्, शचीमिव नन्दनेक्षणरुचिम्, पशुपतिताण्डवलीलामिव उल्लसच्चक्षुःश्रवसम् विन्ध्याटवीमिव उत्तुङ्गश्यामलकुचाम्, वानरसेनामिव सुग्रीवाङ्गदशोभिताम्, ......।**

**संस्कृतव्याख्या**—अतः परं कन्यामेव श्लेषेण वर्णयति-**घनसमयेति। घनसमयाकाशलक्ष्मीम् इव** घनसमये वर्षाकाले या आकालक्ष्मी गगनशोभा तादृशीम् इव **उल्लसच्चारुपयोधराम्** उल्लसन्तौ शोभायमानौ चारु सुन्दरौ पयोधरौ स्तनौ यस्याः ताम्, पक्षे—उल्लसन्तः शोभयन्तः चारवः मनोहराः पयोधराः मेघाः यस्याः ताम्। **जयघोषणापन्नजनमूर्तिम् इव** जयघोषणा जयजयकारध्वनिः तामापन्नः प्राप्तः यः जनः परीक्षितो मनुष्यः तस्य मूर्तिम् शरीरम् इव **तुलाकोटिप्रतिष्ठिताम्** तुलाकोटयोः नूपुरयोः प्रतिष्ठा स्थितिः यस्या ताम्, अथवा तुलायाः उपमानस्य कोटौ समुत्कर्षे प्रतिष्ठितां स्थिताम् विकल्पार्थोऽयं पक्षद्वये घटति। **सुयोधनधृतिम् इव** सुयोधनस्य धृतराष्ट्रपुत्रस्य धृतिं धैर्यम् इव **कर्णविश्रान्तलोचनाम्** कर्णयोः श्रवणयोः विश्रान्ते कर्णान्तायते लोचने नेत्रे यस्याः ताम्, पक्षे—कर्णे राधापुत्रे विश्रान्तं स्थितं तदधीनमित्यर्थः, लोचनं निरूपणं कर्त्तव्यविचारः यस्याः ताम्। **वामनलीलाम् इव** वामनरूपधारिणः विष्णोः लीलाम् इव **दर्शितवलिभङ्गाम्**

दर्शितः प्रदर्शितः प्रकटीकृताः वा त्रिवलीनां विभङ्गः कुटिलता विच्छित्तिः वा यया तादृशीम्, पक्षे–दर्शितः बलेः तन्नामकराक्षसस्य विभङ्गः नाशः यस्यां ताम्। **वृश्चिकराशिरविस्थितिम् इव** वृश्चिकराशौ राशिविशेषे या रविस्थितिः सूर्यसङ्क्रमः ताम् इव **अतिक्रान्तकन्यातुलाम्** अतिक्रान्ता कन्यातुला कन्यास्थितिः यया यौवनप्राप्ता इत्यर्थः ताम्, पक्षे–अतिक्रान्ते कन्यातुले वृश्चिकराशेः पूर्वस्थितौ राशी यस्यां ताम् **उषाम् इव** बाणासुरस्य कन्या अनिरुद्धपत्नी ताम् इव **अनिरुद्धदर्शनसुखाम्** अनिरुद्धम् अनिवारितं दर्शनसुखं यस्याः ताम्, पक्षे–अनिरुद्धस्य कृष्णपौत्रस्य स्वभर्तुः दर्शनेन सुखम् आनन्दं यस्याः ताम्। **शचीम् इव** इन्द्रपत्नीम् इन्द्राणीम् इव। **नन्दनेक्षणरुचिम्** नन्दना आनन्ददायका तादृशी इक्षणयोः नेत्रयोः रुचिः कान्तिः यस्याः ताम्, पक्षे–नन्दनस्य इन्द्रकाननस्य ईक्षणेः दर्शने रुचिः अभिलाषः यस्याः ताम्। **पशुपतिताण्डवलीलाम्** इव पशुपतेः शङ्करस्य ताण्डवलीला नृत्यविलासः ताम् इव **उल्लसच्चक्षुश्रवसम्** उल्लसत् शोभायमानं चक्षुः नेत्रे श्रवः कर्णो च यस्याः ताम्, पक्षे–उल्लसन्तः शोभायमानाः आनन्दिताः वा चक्षुः श्रवसः सर्पाः यस्यां ताम्। **विन्ध्याटवीम् इव उतुङ्गश्यामलकुचाम्** उत्तुङ्गौ समुन्नतो श्लामलौ कृष्णवर्णौ कुचौ स्तनाग्रौ यस्याः ताम्, पक्षे–उत्तुङ्गाः समुन्नताः श्यामाः तमालाः लकुचाः वृक्षविशेषाः यस्यां ताम्। **वानरसेनाम् इव** वानरवाहिनीम् इव **सुग्रीवाङ्गदशोभिताम्** शोभनया ग्रीवया शोभनाभ्याम् अङ्गदाभ्यां केयूराभ्याम् आभूषणविशेषाभ्याम् शोभिताम् अलङ्कृतां कन्याम् पक्षे सुग्रीवेन, अङ्गदेन च शोभिताम्......।

**भास्वराऽलङ्कारेण, श्वेतरोचिषा स्मितेन, लोहितेनाधरेण, सौम्येन दर्शनेन गुरुणा नितम्बबिम्बेन, सितेन हारेण, शनैश्चरेण पादेन, तमसा केशपाशेन, विकचेन लोचनोत्पलेन, ग्रहमयीमिव; संसारभित्तिचित्रलेखामिव त्रैलोक्यचित्तरङ्गस्य, रसायनसमृद्धिमिव यौवनमहायोगिनः, सङ्कल्पसिद्धिमिव शृङ्गारस्य, निधानमिव कौतुकस्य, विजयपताकामिव मकरध्वजस्य, आजिभूमिमिव मदनस्य, सङ्केतभूमिमिव लावण्यस्य, विहारस्थलीमिव सौन्दर्यस्य, एकायतनशालामिव सौभाग्यस्य, उत्पत्तिस्थानमिव कान्तेः, स्तम्भनचूर्णमिव इन्द्रियाणाम्, आकर्षण-**

**मन्त्रसिद्धिमिव मनसः, चक्षुर्बन्धनमहौषधिमिव मन्मथेन्द्रजालिनः त्रिभुवनविलोभनसृष्टिमिव प्रजापतेः, अष्टादशवर्षदेशीया कन्यामपश्यत्स्वप्ने।**

**संस्कृतव्याख्या**–ग्रहमयीमिवेति श्लेषेण कन्यां वर्णयति–भास्वतेति। **भास्वता** दीप्तिमता, पक्षे सूर्येण **अलङ्कारेण** आभूषणेन, **श्वेतरोचिषा** श्वेतं शुभ्रं रोचिः कान्तिः यस्य तेन, पक्षे चन्द्रमसा स्मितेन मन्दहासेन, **लोहितेन** रक्तवर्णेन पक्षे, भौमेन **अधरेण** अधरोष्ठेन, **सौम्येन** रम्येण, पक्षे बुधेन **दर्शनेन** विलोकनेन, **गुरुणा** विशालेन, पक्षे बृहस्पतिना, **नितम्बबिम्बेन** नितम्ब-मण्डलेन, **सितेन** शुभ्रेण, पक्षे शुक्रेण **हारेण** मुक्तास्त्रजा, **शनैश्चरेण** मन्दगतिना, पक्षे शनिग्रहेण **पादेन** चरणेन, **तमसा** कृष्णवर्णेन, पक्षे राहुणा **केशपाशेन** केशकलापेन, **विकचेन** विकसितेन पक्षे, केतुना **लोचनोत्पलेन** नेत्रकमलेन युक्ताम् एवं **ग्रहमयीम् इव** सूर्यादिनवग्रहयताम् इव। अत्र रत्नावल्यलङ्कारः। **त्रैलोक्यचित्तरङ्गस्य** त्रैलोक्यस्य लोकत्रसय चित्तमेव रङ्ग नाट्यालयः तस्य **संसारभित्तिचित्रलेखाम् इव** संसारः एव भित्तिः कुड्वं तस्याः चित्रलेखाम् आलेख्यलेखाम् इव, **यौवनमहायोगिनः** यौवनमेव महायोगी तस्य **रसायनसमृद्धिम् इव** रसायनं जराव्याधिविनाशकः औषधिविशेषः तस्य समृद्धिं सम्पदम् इव; **शृङ्गारस्य** शृगारसस्य **सङ्कल्पसिद्धिम् इव** सङ्कल्पः मानसं कर्म अध्यवसायः तस्य सिद्धिं पूर्णताम् इव, **कौतुकस्य** कुतूहलस्य **निधानम् इव** निधिम् इव, **मकरध्वजस्य** कामदेवस्य **विजयपताकाम् इव** विजयसूचिकां पताकां ध्वजाम् इव, **मदनस्य** कामस्य **आजिभूमिम् इव** युद्धस्थलीम् इव, **लावण्यस्य सङ्केतभूमिम् इव** सङ्केतस्थलीम् इव, **सौन्दर्यस्य विहारस्थलीम् इव** विहारभूमिम् इव, **सौभाग्यस्य** सुभगतायाः **एकायतनशालाम् इव** एका प्रधाना अद्वितीया वा आयतनशाला निवासगृहं ताम् इव; **कान्तेः** शोभायाः **उत्पत्तिस्थानम् इव** प्रभवस्थलम् इव, इन्द्रियाणाम् गोनां **स्तम्भनचूर्णम् इव** स्तम्भनाय व्याापारनिरोधाय चूर्णम् इव, **मनसः आकर्षणसिद्धिम् इव** आकर्षणम् उच्चाटनादिषु षट्सु कर्मसु एकं बलादानयनरूपं कर्म तस्य सिद्धिं प्राप्तिम् इव, **मन्मथेन्द्रजालिनः** मन्मथः कामदेवः एव इन्द्रजालिकः इन्द्रजालोपजीवी तस्य **चक्षुर्बन्धनमहौषधिम् इव** दर्शकानां चक्षुर्बन्धनी दृष्टिनिरोधकरी या महौषधिः ताम् इव, **प्रजापतेः** सृष्टिकर्तृणः ब्रह्मणः **त्रिभुवनविलोभनसृष्टिम्** इव त्रिभुवनस्य लोकत्रयस्य विलोभनाय आकर्षणार्थं या सृष्टिः रचना ताम् इव,

**अष्टादशवर्ष देशीयाम्** अष्टादशवर्षाणि यस्याः ताम् **कन्याम्** अनूढां रमणीम् **स्वप्ने** प्रभातकालिके स्वप्ने **अपश्यत्** पश्यति स्म इति सम्बन्धः।

**( कन्दर्पकेतुविरहवर्णनम् )**

**अथ तां प्रीतिविस्फारितेन चक्षुषा पिबन्निव जनितेर्ष्ययेव निद्रया चिरसेवितया स मुमुचे। अथ प्रबुद्धस्तु विषसरसीव दुर्जनवचसीव निमग्नमात्मानमवधारयितुं न शशाक। तथा हि-निर्लक्षमाकाशतले आलिङ्गनार्थं प्रसारितबाहुयुगलः, 'एह्येहि प्रियतमे! मा गच्छ, मा गच्छेति दिक्षु विदिक्षु च विलिखितामिव, उत्कीर्णामिव चक्षुषि, निखातामिव हृदये प्रियतमामाजुहाव। ततस्तत्रैव शय्यातले निलीनो निषिद्धाशेषपरिजनो दत्तकपाटः परिहृतताम्बूलादिसकलोपभोगस्तं दिवसमनयत्। तथैव निशामपि स्वप्नसमागमेच्छया कथमप्यनैषीत्। अथ तस्य प्रियसखो मकरन्दो नाम कथमपि लब्धप्रवेशदर्शनः कन्दर्पसायकप्रहारवशं कन्दर्पकेतुमुवाच–**

**संस्कृतव्याख्या–अथ** स्वप्नदर्शनानन्तरं तां कन्यां **प्रीतिविस्फारितेन** प्रेमप्रफुल्लितेन **चक्षुषा** दृष्ट्या **पिबन् इव** पानं कुर्वन् इव **सः** कन्दर्पकेतुः **जनितेर्ष्यया इव** समुत्पन्नेर्ष्यया इव **चिरसेवितया** चिरकालाद् असकृदुपभुक्तया **निद्रया मुमुचे** परित्यक्तः अभवत्। **अथ** तत्पश्चात् **प्रबुद्धः तु** स्वप्नाद् जागरितः **विषसरसि इव** विषसरोवरे इव **दुर्जनवचसि** दुर्जनानां दुष्टजनानां वचसि वचने कामभावनायमित्यर्थः, **निमग्नम् आत्मानं** स्वम् अवधारयितुं सावधानतया व्यवहारे प्रवर्तयितुं **न शशाक** समर्थो न अभवत्। तथा हि–**आलिङ्गनार्थं** प्रियतमां समालिङ्गितुं **आकाशतले** गगनतले **निर्लक्षं** लक्ष्यरहितं **प्रसरितबाहुयुगलः** प्रसारितं विस्तारितं बाहुयुगलं करद्वयं येन तादृशः सन्, **एह्येहि प्रियतमे** हे प्रयितमें एहि आगच्छ एहि आगच्छ **मा गच्छ मा गच्छ** मा याहि मा याहि, इति अनेन प्रकारेण **दिक्षु प्रदिक्षु च** प्रति दिशायां **विलिखिताम् इव** चित्रिताम् इव **चक्षुषि** नेत्रे **उत्कीर्णाम् इव** स्थापिताम् इव, **हृदये** अन्तःकरणे **निखाताम् इव** उट्टङ्किताम् इव **प्रियतमां** प्रेयसीं कन्यां वासवदत्ताम् **आजुहाव**–आकारयामास। ततः तत्पश्चात् तत्रैव तस्मिन् शयनकक्षे एव **शय्यातले** शय्यायाः उपरि, **निलीनः** स्थितः सन्

**निषिद्धाशेषपरिजनः** निषिद्धाः स्वसन्निकटमागमनाय निवारिताः अशेषाः सर्वे परिजनाः अनुचराः येन तादृशः सन्, **दत्तकपाटः** दत्तः बन्दीकृतः कपाटमरं येन तादृशः सन् **परिहृतताम्बूलादिसकलोपभोगः** परिहृतः परित्यक्तः ताम्बूलादयः ताम्बूलचर्वणादयः सकलः सर्वे: उपभोगः उपभोगपदार्थः येन तादृशः सन् **तं** पूर्वस्वप्नदर्शनरात्र्यनन्तरं **दिवसं** दिनम् **अनयत्** व्यतीतमकरोत् **तथैव** तेनैव प्रकारेण **निशाम् अपि** रात्रि अपि स्वप्नसमागमं स्वप्ने कन्यया सम्मेलनम् **इच्छया** अभिलाषेण **कथमपि** येनकेन प्रकारेण **अनैषीत्** व्यतीतमकरोत्। **अथ** तत्पश्चात् तस्य राजकुमारस्य **मकरन्दः नाम** तन्नामकः **प्रियसखः** प्रियवयस्यः **कथमपि** केनापि प्रकारेण **लब्धप्रवेशदर्शनः** लब्धे प्राप्ते प्रवेशः कन्दर्पकेतोः शयनकक्षे दर्शनं येन तादृशः **कन्दर्पसायकप्रहारपरवशं** कन्दर्पस्य कामदेवस्य सायकप्रहारेण परवशं पराधीनं यः तम् **कन्दर्पकेतुं** तन्नामकराजकुमारम् **उवाच** अकथयत्।

**( मकरन्दोपदेशवर्णनम् )**

**( तत्रदुर्जनस्वभाववर्णनम् )**

**सखे! किमिदमसाम्प्रतमसाधुजनोचितमध्वानमाश्रितोऽसि। तवैतच्चरितमालोक्य वितर्कदोलासु निवसन्ति सन्तः। खलाः पुनस्त्वदनुचितमनिष्टमाचरन्ति। अनिष्टोद्भावनरसोत्तरं हि भवति खलहृदयम्। को नामाऽस्य तत्त्वनिरूपणे समर्थः। तथाहि-भीमो नबकद्वेषी, आश्रयाशोऽपि मातरिश्वा, अतिकटुरपि महारसः, सर्षपस्नेह इव करयुगलालिततोऽपि शिरसा धृतोऽपि न कटुत्वं जहाति। तालफलरस इवापातमधुरः परिणामविरसस्तिक्तश्च। पादपराग इवावधूतोऽपि मूर्धानं कषाययति। विषतरुप्रसूनमिव यथा यथाऽनुभूयते तथा तथा मोहमेव द्रढयति। नीचदेशस्येव नवारिविरहोऽस्य जायते। निदाघदिवस इव बहुमत्सरस्सुमनसां सन्तापं वहहि। अन्धकार इव दोषानुबन्धचतुरः विश्वकर्मावलोपनोद्यतश्च। रुद्र इव विरूपाक्षः, विष्णुरिव चक्रधरः। शक्राश्व इवोच्चैःश्रवाः नदेशजप्रशंसी च। शरस्येव विभिन्नस्यापि सतः स्नेहं दर्शयतः तक्राट इव हृदयं विलोडयति।**

**संस्कृतव्याख्या**–कन्दर्पकेतवे मकरन्दस्य सदुपदेशं वर्णयति-**सख इति। सखे** हे प्रियवयस्य, **किं** किमर्थम् इदम् एतद् **असाम्प्रतम्** अनुचिरतम् **असाधुजनोचितम्** असाधुजनानां दुर्जनानाम् उचितं योग्यम् **अध्वानं** काममार्गम् **आश्रितोऽसि** समागतोऽसि। **तव** कन्दर्पकेतोः **एतद्** इदं **चरितम्** आचरणम् **आलोक्य** विलोक्य **सन्तः** सज्जनाः **वितर्कदोलासु** संशयदोलासु **निवसन्ति** वसन्ति। **खलाः** दुर्जना **पुनः** तु **त्वदनुचितं** त्वदीययोग्यतायाः अनुचितं प्रतिकूलम् **अनिष्टम्** अवाञ्छनीयम् **आचरन्ति** व्यवहरन्ति सर्वथा त्वामनुनिन्दन्तीत्यर्थः **खलहृदयं** खलानां दुष्टानां हृदयम् अन्तःकरणं **हि** निश्चितरूपेण **अनिष्टोद्भावनरसोत्तरं** अनिष्टस्य अवाञ्छितस्य उद्भावने समुत्पादने प्रचारणे वा यः रसः प्रीतिः सन्तुष्टिर्वा तस्मिन् उत्तरं प्रवीणं प्रधानं भवति। अस्य दुर्जनस्य **तत्त्वनिरूपणे** याथार्थ्यस्य निरूपणे सम्पादने **को नाम** जनः **समर्थः** सक्षमः, न कोऽपि सक्षमः इत्यर्थः। **तथाहि-भीमोः अपि** परपीडनात् भयङ्करः अपि पक्षे मध्यमः पाण्डवः भीमः अपि **नवकद्वेषी** बकस्य बकासुरस्य द्वेषी न इति विरोधः, नवः, सौम्यः कः आत्मा अन्तःकरणं वा येषां ते नवकाः सज्जनाः तान् द्वेषी द्वेषकरः **आश्रयाशः अपि** आश्रयं स्वाधारभूतं काष्ठादिकम् अश्नाति भक्षयतीति आश्रयाशः अग्निः अपि, पक्षे–आश्रयं स्वाधारभूतं जनम् अश्नाति नाशयतीति आश्रयाशः आश्रयविनाशकः। **मातरिश्वा** मातरि आकाशे श्वयति गच्छतीति मातरिश्वा वायुरिति विरोधः, पक्षे मातरि जनन्यां स्वपोषके इत्यर्थः श्वा श्वानः तद्वत् क्रूरः अनुचिताचरणः वा। **अतिकटुः अपि** अतितिक्तः अपि पक्षे अतिक्रूरः दूषितः वा **महारसः** अतिमधुरः, पक्षे महान् अरसः रलयोरभेदात् महान् अलसः वा। **सर्षपस्नेहः इव** सर्षपतैलम् इव। **करयुगलालितः अपि** करयुगेन हस्तद्वयेन लालितः पूजितः अपि, पक्षे–करयुगेन मर्दितः अपि, **शिरसा धृतः अपि** चरणयोः नमनेन शिरसा मस्तकेन धृतः अपि, पक्षे–शिरसि मस्तके धृतः धारितः अपि **कटुत्वं** क्रूरतां, पक्षे कटुरसत्वं **न जहाति** न त्यजति। **तालफलरसः इव** तद्ववत् **आपातमधुरः** आपाते आत्मीयत्वे मधुरः मृदुव्यवहारयुक्तः अपि, पक्षे आपाते पानसमये मधुरः मिष्टः अपि **परिणामविरसः** परिणामे अन्ते निरसः, पक्षे परिणामे अवसाने परिपाके सति मदजनकत्वात् विरसः **तिक्तश्च** तिक्तरस इव त्याज्यः अप्रियः इत्यर्थः, पक्षे तिक्तरससम्पन्नः। **पादपरागः इव** चरणधूलिः इव। **अवधूतः अपि** तिरस्कृतः अपि पक्षद्वयैतत् **मूर्धानं** बुद्धिं, पक्षे

मस्तकं **कषायति** पीडयति, पक्षे दूषयति। **विषतरुप्रसूनमिव** विषवृक्षपुष्पमिव **यथा यथा** येन येन प्रकारेण **अनुभूयते** परिचीयते, पक्षे उपभूज्यते **तथा तथा** तेन तेन प्रकारेण **मोहम् एव** अज्ञानमेव, पक्षे मूर्च्छामेव **द्रढयति** समुत्पादयति, पक्षे विस्तारयति। **नीचदेशस्य इव** निम्नस्थानस्य खड्डस्य इव **अस्य** दुर्जनस्य **नवारिविरहः** अरिविरहः शत्रुशून्यता न वा, पक्षे वारिविरहः जलाभावः न **जायते** भवति। **निदाघदिवसः इव** ग्रीष्मकालिकदिनम् इव **बहुमत्सरः** बहु मत्सरः इर्ष्या यस्य तादृशः, पक्षे बहवः मत्सराः माक्षिकाः यस्मिन् तादृशः **सुमनसां** सज्जनानां विदुषां वा, पक्षे सुमनसां पुष्पाणां **सन्तापं** कष्टं, पक्षे ग्लानतां **वहित** जनयति, पक्षे करोति। **अन्धकारः इव** तमः इव **दोषानुबन्धचतुरः** दोषाणाम् अनुबन्धे आरोपणे चतुरः कुशलः, पक्षे दोषा रात्रिः तस्या अनुबन्धे अनुवृतौ अनुसरणे वा चतुरः **विश्वकर्मावलोपनोद्यतः च** विश्वेषां सर्वेषामपि जनानां कर्माणि तेषामवलोपने नाशते उद्यतः तत्परः च यद्धा विश्वानि सकलानि यानि कर्माणि सन्ध्यावन्दनादीनि तेषाम् अवलोपने परित्यजने विलोपनकरणे वा उद्यतः, पक्षे विश्वकर्मणः सुर्यस्य अवलोपने आच्छादने उद्यतः। **रुद्रः इव** शङ्करः इव **विरूपाक्षः** विरूपः विपरीतः अक्षः ज्ञानं व्यवहारं वा यस्य तादृशः पक्षे विविधानि रविचन्द्रादिरूपाणि अक्षीणि नेत्राणि यस्य तादृशः। **विष्णुः इव चक्रधरः** चक्रम् अहङ्कारविशेषः कुटिलता वा तस्य धरः धारकः, पक्षे चक्रायुधधारी। **शक्राश्वः इव** शक्राश्व इन्द्रस्य अश्वः इव। **उच्चैश्रवाः** उच्चैः अत्यधिकं श्रवणं यस्य तादृशः परकीयालापश्रवणेऽतत्परः परकीयकार्य श्रवणे बधिरः इति वा, पक्षे उच्चैश्रवाः नामकइन्द्राश्वविशेषः। **नदेशजप्रशंसी च** देशे स्वजनपदे जाताः देशजाः तान् प्रशंसनाय शीलमस्येति देशजप्रशंसी तन्नभवतीति नदेशजप्रशंसी, पक्षे नदीनाम् ईशः नदेशः सागरः तस्माज्जातः नदेशजः प्रशंसनीयश्च। **विभिन्नस्य अपि** सङ्गतस्यानुवर्तमानस्य, पक्षे भेदितस्य **स्नेहंदर्शयतः** स्नेहं प्रेमाणं पक्षे धृतविन्दुं दर्शयतः प्रकट–यतः **सतः** सज्जनस्य **शरस्य इव** बाणस्य इव, पक्षे दध्याग्रभागस्य इव **हृदयम्** अन्तकरणं पक्षे मध्यभागं **तक्राटः इव** मन्थनदण्डः इव **विलोडयति** पीडयति, पक्षे मथयति।

**यक्षबलिरिव आत्मघोषमुखरो मण्डलभ्रमणकश्च, मातङ्ग इव स्ववशालोलमुखोऽधरीकृतदानश्च, वृषभ इव सुरभियानविकलः, कामीव**

**गोत्रस्खलनविधुरो वामाध्वानुरक्तश्च। जीर्णरोग इव कलेवरे वचसि मन्दिमानमावहति। वञ्चक इव रक्तः कटपले विभावरीरक्तश्च। परेत इव बन्धुतापदर्शनः। परशुरिव भद्रश्रियमपि खण्डयति। कुदाल इव दलितगोत्रः क्षमाभाजः प्राणिनश्च निकृन्तति। रतिकील इव जघन्यकर्मलग्नो ह्रेपयति साधून्। दुष्टशूर्पश्रुतिरिव काननरुचिरनुगतमपि यवसं सततं नानुमोदते। अबीजादेव जायन्ते, अकाण्डादेव प्ररोहन्ति खलव्यसनाङ्कुराः। दुरुच्छेदाश्च भवन्ति। असतां हृदि प्रविष्टो दोषलवः करालायते। सतां तु हृदि न प्रविशत्येव। यदि कथमपि प्रविशति तदा पारद इव क्षणमपि न तिष्ठति।**

**संस्कृतव्याख्या**–सः दुर्जनः **यक्षबलिः इव** यक्षमुद्दिश्य निहितः बलिः पिण्डः इव **आत्मघोषमुखरः** आत्मघोषेण आत्मप्रशंसाकथनेन मुखरः वाचालः, पक्षे आत्मघोषेण काकेन तच्छब्देन मुखरः शब्दायमानः **मण्डलभ्रमणकः च** मण्डले देशे इतस्ततः भ्रमतीति मण्डलभ्रमणकः च पक्षे मण्डलः कुक्कुरः तान् भ्रमरतीति मण्डलभ्रमणकः, पिण्डलोभेन कुक्कुराः बलिं पारितः परिभ्रमन्ति इति स्थितिः। **मातङ्गः इव** हस्ती इव **स्ववशालोलमुखः** स्ववशं स्वाधीनं आलोलं चञ्चलं मुखं यस्य तादृशः, पक्षे स्ववशायां निजहस्तिन्यां स्नेहप्रदर्शनाय आलोलं चञ्चलं मुखं यस्य तादृशः **अधरीकृतदानः च** अधरीकृतं दानम् अन्येभ्यः धनादिवितरणं येन तादृशः, पक्षे अधरीकृतम् अधस्तात्कृतं प्रस्रावितं इत्यर्थः दानं मदजलं येन तादृशः। **वृषभः इव सुरभियानविकलः** सुरभीणां सज्जनानां विपश्चितां वा यानेन आगमनेन अथवा सुरभीन् सज्जनान् प्रति यानेन गमनेन विकलः रहितः, पक्षे सुरभिं गां यानेन अनुगमनेन विकलः परिश्रान्तः। **कामी इव गोत्रस्खलनविधुरः** गोत्राद् वंशात् कुलाचारादित्यर्थः यत् स्खलनं प्रच्यवनं तत्परित्यागः इति भावः तेन विधुरः शून्यः, पक्षे–गोत्र नामग्रहणें यत्स्खेलनं तेन विधुरः व्यग्रः। **वामाध्वानुरक्तः च** वामे विपरीते अध्वनि मार्गे आचरणे अनुरक्तः संलग्नः च, पक्षे वामानां कामिनीनाम् अध्वनि मार्गे तत्प्रसादने इत्यर्थः अनुरक्तः संलग्नः च। **जीर्णरोगः इव** जीर्णः अतिकालात् व्याप्तः यः रोगः सः इव **कलेवरे** श्रेष्ठे उत्तमे सदुपदेशे वा, पक्षे शरीरे **वचसि** वचने **मन्दिमानम्** औदासिन्यं मूढत्वं वा, पक्षे कृशताम् **आवहति** धारयति, पक्षे उत्पादयति। **वञ्चकः इव जम्बुकः** कुक्कुरः वा तादृशः **कटपले रक्तः** उत्कोचे अनुरक्तः, पक्षे शवमांसे रक्तः। **विभावरीरक्तः च** विभावर्यां विवादे रक्तः संलग्नः, पक्षे

विभावर्यां रात्रौ रक्तः। **परेतः इव** मृतः जनः इव **बन्धुतापदर्शनः** बन्धूनां तापं कष्टदायकं दर्शनं यस्य तादृशः, तेषां कष्टं दुष्टवा् तत्प्रतीकारपराङ्मुखः इति भावः, पक्षे बन्धुभिः अपगतं दर्शनं यस्य तादृशम्। **परशुः इव भद्रश्रियम् अपि** भद्राणां सज्जनानां श्रियं लक्ष्मीं शोभां यशः वा **खण्डयति** विनाशयति। **कुदालः इव** भूदारणयन्त्रविशेषः इव **दलितगोत्रः** दलितं स्वाचरणेन विनाशितं गोत्रं स्वकुलः येन तादृशः, पक्षे दलिता खाता गोत्रा भूमिः येन तादृशः **क्षमामाणः च** क्षमायुक्तान् सज्जनान् पक्षे भूमिस्थानं, **प्राणिनः** जनान् पक्षे कीटादीन् जीवान् **निकृन्तति** क्लेश–यति, पक्षे छिन्नति। **रतिकीलः इव** कुक्कुरः इव **जघन्यकर्मलग्नः** जघन्ये नीचे कर्मणि कार्ये लग्नः तत्परः, पक्षे जघने भवं जघन्यं कर्म सुरतं तस्मिन् लग्नः तत्परः, **साधून्** सज्जनान् **ह्रेपयति** लज्जयति। **दुष्टशूर्पश्रुतिः इव** शूर्पवत् श्रुतिः कर्णः यस्य सः हस्ती, दुष्टः चासौ शूर्पश्रुतिः च इति दुष्टशूर्पश्रुतिः दुष्टहस्ती इव **काननरुचिः** का कुत्सिता आननरुचिः मुखकान्तिः यस्य तादृशः पक्षे कानने वने रुचिः अभिलाषः यस्य तादृशः, **अनुगतम् अपि** अनु पश्चात् गतं प्रातिलोम्येन पठितामित्यर्थः तादृशः, पक्षे प्राप्तम् अपि **सततं** यवसं सकारेण ततं विस्तृतं सकार युक्तं प्रतिलोम्येन पठितं यवसशब्दः **सवयसम्** मित्रम् अपि, पक्षे सततं निरन्तरं यवसं तृणम् **नानुमोदयते** नाभिनन्दति, पक्षे न भक्षयति। **खलव्यसनाङ्कुराः** खलैः दुर्जनैः जनिताः व्यसनानां व्यथानाम् अङ्कुराः प्ररोहाः। **अबीजादेव** बीजं कारणं विना एव, पक्षे बीजं विना एव **जायन्ते** उत्पद्यन्ते, पक्षे अङ्कुरयति **अकाण्डादेव** अवसरं विना एव, पक्षे स्कन्धं विना एव **प्ररोहन्ति** वर्धन्ते। **दुरुच्छेदाः च** उन्मूलयितुमशक्याः, पक्षे कर्तितुमशक्याः भवन्ति। **असताम्** दुर्जनानां **हृदि** अन्तःकरणे **प्रविष्टः** प्रवेशं गतः **दोषलवः** दोषलेशः **करालायते** विकरालत्वं भजन्ते। **सतां तु** सज्जनानां तु **हृदि** अन्तःकरणे **न प्रविशति एव** प्रवेशं न गच्छति एव **यदि** चेत् **कथमपि** केनापि प्रकारेण **प्रविशति** प्रविष्टं भवति **तदा** तस्मिन् काले **पारदः इव** तन्नामकद्रव्यविशेषः इव **क्षणमपि** क्षणमात्रमपि **न** तिष्ठति न स्थातुं शक्यते।

## ( साधुस्वभाववर्णनम् )

**मृगा इव विनोदविन्दोर्वशगा न भवन्ति साधवः। सुखं जना हि भवादृशाः शरत्समया इव हरन्ति मित्रमण्डलस्य। न च सचेतना**

**विसदृशमुपदिशन्ति। अचेतनानामपि मैत्री समुचितपक्षे निक्षिप्ता। तथाहि–माधुर्यशैत्यशुचित्वसन्तापशान्तिभिः पय इति शब्दसाम्याच्च मित्रतामुपगतस्य तत्सङ्गमादभिवर्धितस्य क्षीरस्य क्वाथे पुरतो ममैव क्षयो युक्त इति विचिन्त्येव वारिणा क्षीयते। तदिदमसाम्प्रतमाचरितम्। सखे! गृहाण साधुजनोचितमध्वानम्। साधवो हि दिङ्मोहादुत्पथप्रवृत्ता अपि पुनर्गृहीतसत्पथा भवन्ति।' इत्यादि वदति तस्मिन्मकरन्दे प्रियसखे, कथमपि स्मरशरप्रहारपरवशः कन्दर्पकेतुः परिमिताक्षरमुवाच–**

**संस्कृतव्याख्या–मृगाः इव** हरिणाः इव **साधवः** सज्जनाः **विनोदविन्दोः** विनोदस्य कौतुकस्य विन्दुः लेशः तस्य, पक्षे वीनां पक्षिणां नोदः प्रेरणं विनोदः तत्र विन्दुः ज्ञाता विनोदविन्दुः तस्य विनोदविन्दोः **वशगाः** अधीनाः परवशाः **न भवन्ति** च जायन्ते। **भवादृशाः** तव कन्दर्पकेतोः सदृशाः कामासक्तेन दूयमानाः कुपथप्रवृत्ताः वा जनाः **हि** निश्चितरूपेण **शरत्समया इव** शरत्कालः इव **मित्रमण्डलस्य** मित्रमण्डलस्य सुहृत्समूहस्य, पक्षे सूर्यमण्डलस्य **सुखं** हर्षं **हरन्ति** नाशयन्ति, पक्षे समुत्पादयन्ति। **न च सचेतनाः** केवलं सचेतनाः ज्ञानसम्पन्नाः एव न **विसदृशम्** अननुकूलम् **उपदिशन्ति** शिक्षयन्ति प्रत्युत **अचेतनानाम् अपि** जडानाम् अपि **मैत्री** मित्रता **समुचितपक्षे** योग्यश्रेण्याम् **निक्षिप्ता** विद्यते। तथा हि **माधुर्यशैत्यशुचित्वसन्तापशान्तिभिः** माधुर्यं मधुरता शैत्यं शीतलतता सन्तापशान्तिः तापशमनं मधुरताशीतलतातापशमनैः **पयः इति शब्दसाम्यात्** नामसाम्यात् **च मित्रताम्** मैत्रीम् **उपगतस्य** प्राप्तस्य **तत्सङ्गमात्** तस्य दुग्धस्य सङ्गमात् संयोगात् **अभिवर्धितस्य** बहुमूल्यातां प्राप्तस्य जलस्य, **क्षीरस्य** दुग्धस्य **क्वाथे** उष्णीकृते विनाशे इति भावः, **पुरतः** पूर्वं **मम एव** जलस्य एव **क्षयः** विनाशः **युक्तः** उचित **इति** अनेन प्रकारेण **विचिन्त्य एव** विचार्य एव **वारिणा** जलेन **क्षीयते** विनश्यते। **ततः** तस्मात् एतत् तव **आचरितम्** आचरणम् **असाम्प्रतम्** अनुचितम्। **सखे** हे मित्र कन्दर्पकेतु! **साधुजनोचितं** साधुजनानां सज्जनानाम् उचितम् आचरितम् **अध्वानं** मार्गं **गृहाण** अनुचरस्व। **हि** यतोहि **साधवः** सज्जनाः **दिङ्मोहात्** दिग्भ्रमात् कर्तव्याकर्त्तव्यविकेकाभावाद् **अपि पुनर्गृहीतसत्पथाः** पुनः गृहीतः स्वीकृतः सत्यथः सद्गन्तव्यमार्गः यैः तादृशाः भवन्ति। इत्यादि तस्तिन् पूर्वोक्ते **मकरन्दे** तन्नामककन्दर्पकेतुमित्रे **वदति** सति **स्मरशरप्रहारपरवशः** स्मरशरस्य कामबाणस्य ये प्रहाराः तैः

परवशः व्यथितः **कन्दर्पकेतुः** तन्नामकराजकुमारः **उवाचः** अकथयत् **प्रियसखे** हे प्रियमित्र मकरन्द......।

**वयस्य! दितिरिव शतमन्युसमाकुला भवत्यस्मादृशजनचित्तवृत्तिः। नायमुपदेशकालः। पच्यन्त इव मेऽङ्गानि। कृष्यन्त इवेन्द्रियाणि। भिद्यन्त इव मर्माणि। निस्सरन्तीव प्राणाः। उन्मूल्यन्त इव विवेकाः। नष्टेव स्मृतिः। अधुना तदलमनया कथया। यदि त्वं सहपांसुक्रीडासमदुःखसुखोऽसि तन्मया सममागम्यतामित्युक्त्वा परिजनालक्षित एव तेन सह पुरान्निर्जगाम।**

**संस्कृतव्याख्या—वयस्य** हे मित्र, **अस्मादृशजनचित्तवृत्तिः** अस्माकं दृशाः सदृशाः कामभावयुक्ताः ये जनाः लोकाः तेषां चित्तवृत्तिः अन्तःकरण व्यापारः **दितिः इव** दैत्यानां माता मरीचिपत्नी इव **शतमन्युसमाकुला** शतसङ्ख्याकाः ये मन्वयः शोकाः तैः समाकुला युक्ता, पक्षे शतं हस्तपादादीनि मन्यवः यज्ञाः च यस्य सः शतमन्युः इन्द्रः तेन समाकुला भवति जायते। **मे** मम **अङ्गानि** शरीरावयवा **पच्यन्ते इव** स्वमेव पक्वा भवन्ति इव, विशीर्यन्ते इति भावः। **इन्द्रियाणि** गावः **कृष्यन्ते इव** समाकृष्यन्ते इव तपन्ति इत्यर्थं **मर्माणि** जीवस्थानानि **भिद्यन्ते इव** विदीर्यन्ते इव **प्राणाः** प्राणवायवः **निस्सरन्ति इव** शरीराद् बहिरागच्छन्ति इव **विवेकाः** कर्त्तव्याकर्त्तव्यबुद्धयः **उन्मुल्यन्ते इव** समूलेन उत्पाट्यन्ते इव। **स्मृतिः** स्मरणशक्तिः **नष्टा इव** विनाशं प्राप्ता इव। **अधुना** सम्प्रति **अनया कथया अलम्** कथनमिदं व्यर्थम्। **यदि** चेत् **त्वं** मकरन्दः **सहपांसुक्रीडासमदुःखसुखः असि** सहपांसुक्रीडातः बाल्यकालखेलातः समदुःखसुखः समानरूपेण दुःखाना सुखाना च मित्रः असि **तत्** मया कन्दर्पकेतुना **समं** सह **आगम्यताम् इति उक्त्वा** कथयित्वा **परिजनालक्षितः एव** परिजनैः परिचारकैः अनालक्षितः अदृष्टः एव **तेन** मकरन्दे सह **पुरात्** स्वनगराद् गृहाद् वा **निर्जगाम्** बहिर्निगच्छत्।

**( विन्ध्याचलवर्णनम् )**

**ततोऽनेकनल्वशतमध्वानं गत्वा तेनागस्त्यवचनसंहृतब्रह्माण्डखण डगतशिखरसहस्त्रः, कन्दरान्तराललतागृहसुप्तप्रबुद्धविद्याधरमिथुनगीता-कर्णनसुखितचमरीगणमारणोत्सुकशबरकुलसम्बाधकच्छतटः, कटक-तटगतकरिकराकृष्टभग्नहरिचन्दनस्यन्दमानरसामोदहरगन्धवाहशिशिरित**

**शिलातलः, सुदूरपतनभग्नतालफलरसार्द्रकरतलास्वादनोत्सुकशाखा-मृगकदम्बकः, प्रलम्बमाननिर्झरापान्तोपविष्टजीवञ्जीवकमिथुनलेलिह्यमान विविध-फलरसामोदसुरभितपरिसरः सरभसकेसरिसहस्त्रखरनखरधारा विदारितमत्त मातङ्गकुम्भस्थलविगलितस्थूलमुक्ताफलशबलशिखरतया शिखरावलग्नं तारागणमिवोद्वहन्.......।**

**संस्कृतव्याख्या**–ततः तेन विन्ध्य नाम गिरिरदृश्यतेति सम्बन्धः। ततः गृहाद्गमनान्तरम् **अनेकनल्वशतम्** अनेकं नल्वं हस्तचतु:शतानि परिमाणं यस्य तादृशम् **अध्वानं** मार्गं **गत्वा** गमनं कृत्वा **तेन** मित्रयुगलेन विन्ध्य नाम गिरिः अदृश्यत्। सः गिरिः **अगस्त्यवचनसंहृतइब्रह्मण्ड-खण्डगतशिखरसहस्त्रः** अगस्त्यस्य तन्नामकस्य ऋषेः वचनेन कथनेन निर्देशेन इत्यर्थः संहृतं सङ्कोचितं ब्रह्माण्डखण्डगतं गगनमध्यवर्ति शिखरसहस्त्रं श्रृङ्गसहस्त्रं येन तादृशः **कन्दरान्तराललतागृहसुप्तप्रबुद्धविद्याधरमिथुनगीता-कर्णनसुखितचमरीगणमारणोत्सुकशबरकुलसम्बाधकच्छतटः** कन्दरणां दरीणाम् अन्तराले मध्यभागे लतागृहेषु लतानिकुञ्जेषु सुप्तप्रबुद्धानां शयनादुत्थितानां विद्याधरमिथुनानां देवयोनिविशेषयुगलानां गीतस्य गानस्य आकर्णनेन श्रवणेन सुखितस्य आनन्दसम्पन्नस्य चमरीगणस्य तन्नाम्नः मृगविशेषसमूहस्य मारणे हनने उत्सुकेन उत्कण्ठितेन शबरकुलेन पुलिन्दगणेन सम्बाधः सम्पन्नः व्याप्तः वा कच्छतटः जलप्रायप्रदेशः यस्य तादृशः। **कटकतटगतकरिकराकृष्टभग्नहरिचन्दनस्यन्दमानरसामोदहरगन्धवाहशिशिरितशिलातलः** कटकस्य पर्वतमध्यभागस्य तटगतानां तटस्थितानां करिणां हस्तीनां करैः शुण्डाभिः आकृष्टेन आकर्षणेन भग्नानां त्रुटितानां हरिचन्दनानां चन्दन-विशेषाणां स्यन्दमानस्य स्त्रवतः रसस्य निर्यासस्य आमोदहरेण गन्धहारिणा गन्धवाहेन पवनेन शिशिरितं शितलीकृतं शीलातलं यस्मिन् तादृशः। **सुदूरपतनभग्नतालफलरसार्द्रकरतलास्वादनोत्सुकशाखामृगकदम्बकः** सुदूरात् अत्युच्चप्रदेशात् पतनेन भग्नानां विदलितानां तालफलानां तृणराजफलानां रसेन आर्द्रयोः सिक्तयोः करतलयोः आस्वादे लेहने उत्सुकानामासक्तानां शाखामृगाणां वानराणां कदम्बकं समूहं यस्मिन् तादृशः। **प्रबम्बमाननिर्झरोपान्तोपविष्टजीवञ्जीवकमिथुनलेलिह्यमानविविधफलरसामोदसुरभितपरिसरः** प्रलम्बमानानां पर्वतात् प्रस्त्रवितानां निर्झराणां जलप्रवाहाराणां उपान्ते समीपे तटे उपविष्टानां स्थितानां

जीवञ्जीवकानां तन्नामकपक्षिविशेषाणां मिथुनैः युगलैः लेलिह्यमानानां बारं बारम् आस्वाद्यमानानां नानाफलानां विविधफलानां रसस्य आमोदेन सुगन्धेन सुरभितः सुगन्धितः परिसरः प्रान्तप्रदेशः यस्य तादृशः **सरभसकेसरिसहस्त्रखर-नखरधाराविदारितमत्तमातङ्गकुम्भस्थलविगलितस्थूलमुक्ताफलशबलशिखरतया** सरभसं सवेगं यथा स्यात्तथा केसरिसहस्त्राणाम् अनेकेषां सिंहानां खराभिः तीक्ष्णाभिः नखराणां कररुहाणां धाराभिः अग्रभागैः विदारितेभ्यः विभिन्देभ्यः मत्तमाङ्गानां मदस्त्राविहस्तीनां कुम्भस्थलेभ्यः कपोलेभ्यः विगलितैः निःसृतैः स्थूलमुक्ताफलैः बृहत्कायगजमौक्तिकैः शबलानि विचित्रवर्णानि शिखराणि गिरिशृङ्गाणि यस्य सः तस्य भावः तया **शिरावलबग्नं** शिखरेषु गिरिशृङ्गेषु अवलग्नं संलग्नं **तारागणं** नक्षत्रसमूहम् उद्वहन् इव धारयन् इव......।

**सुग्रीव इव ऋक्षगवयशरभकेसरिकुमुदपनससेव्यमानपादच्छायः, पशुपतिरिव नागनिश्वाससमुत्क्षिप्तभूतिः, जनार्दन इव विचित्रवनमालः, सहस्त्रकिरण इव सप्तपत्रस्यन्दनोपेतः, विरूपाक्ष इव सन्निहितगुहः शिवानुगतश्च, कामीव कान्तारोषरसानुगतः समदनश्च, श्रीपर्वत इव सन्निहितमल्लिकार्जुनः, नरवाहनदत्त इव प्रियङ्गुश्यामासनाथः, शिशुरिव कृतधात्रोधृतिः, वासरारम्भ इवारुणप्रभापाटलितपत्रवनराजिः, कृष्णपक्ष इव बहुलतागहनः, कर्ण इवानुभूतशतकोटिदानः, भीष्म इव शिखण्डिमुक्तैरर्धचन्द्रैराचिततनुः, कामसूत्रविन्यास इव मल्लनागघटितकान्तारसामोदः, हिरण्यकशिपुरिव शम्बरकुलाश्रयः.....।**

**संस्कृतव्याख्या**—सुग्रीवः इव बालिराक्षसानुजः राममित्रः इव **ऋक्षगवय-शरभकेसरकुमुदपनससेव्यमानपादच्छायः** ऋक्षैः भल्लूकैः गवयैः गोसदृशैः पशुविशेषैः शरभैः तन्नामकहरिणैः केसरिभिः सिंहैः कुमुदैः कैरवैः पनसैः तन्नामकैः वृक्षैः सेव्यमाना आश्रीयमाणा पादानां शिखराणां छाया अनातपः कान्तिर्वा यस्य तादृशः, पक्षे ऋक्षः जाम्बवान् गवयः शरभः केसरिः कुमुदः पनसः इत्यादिभिः वानरविशेषैः सेव्यमाना पादच्छाया चरणकान्तिः यस्य तादृशः। **पशुपतिः इव** शङ्कर इव **नागनिःश्वाससमुक्षिप्तभूतिः** नागानां हस्तीनां निःश्वासेन श्वासवायुना समुक्षिप्ता परितः विकीर्णा भूतिः गैरिकादिकणः यस्य तादृशः पक्षे अलङ्काररूपेण धृतानां नागानां सर्पाणां निःश्वासेन समुक्षिप्ता

इतस्ततः विस्तारिता भूतिः भस्म यस्य तादृशः। **जनार्दनः इव** विष्णुः इव **विचित्रवनमालः** विचित्रा विविधवर्णा वनमाला वनपक्तिः यस्य तादृशः, पक्षे विचित्रा वनमाला वैजयन्तीमाला यस्य तादृशः। **सहस्त्रकिरणः इव** सूर्यः इव **सप्तपत्रस्यन्दनोपेतः** सप्तपत्रैः सप्तच्छदैः स्यन्दनैः तिनिशवृक्षविशेषैः उपेतः सम्पन्नः, पक्षे सप्त सप्तखङ्ख्याकानि पत्राणि वाहनानि अश्वाः इत्यर्थः यस्मिन् तेन स्यन्दनेन रथेन उपेतः युक्तः। **विरूपाक्षः इव** शङ्कर इव **सन्निहितगुहः** सन्निहितः गुहः कन्दराः यस्य तादृशः, पक्षे सन्निहितः समीपस्थितः गुहः स्कन्दः कार्तिकेयः यस्य तादृशः। **शिवानुगतः च** शिवाभिः शृङ्गालैः अनुगतः सम्पन्नः च, पक्षे शिवया गिरिजया अनुगतः च। **कामी इव** कामाभिलाषी इव **कान्तारोषरसानुगतः** कान्तारं दुर्गममार्गं ऊषरं क्षारमृतिकायुक्तं स्थानं सानु शिखरं वनं वा गतः प्राप्तः, पक्षे कान्तायाः प्रियायाः रोषे कोपे रसेन प्रयादनेन अनुगतः अथवा कान्तानां प्रियतमानां रोषरसाभ्यां क्रोधप्रीतिभ्याम् अनुगतः **समदनः च** मदनेन धत्तूरेण युक्तः च, पक्षे कामयुक्तः च। **श्रीपर्वतः इव** पर्वतविशेषः इव **सन्निहितमल्लिकार्जुनः** सन्निहिता वर्तमाना मल्लिका मल्लीलता अर्जुनाः तन्नामकवृक्षाः यस्मिन् तादृशः, पक्षे सन्निहितः प्रतिष्ठापितः मल्लिकार्जुनः तन्नामकः शिवलिङ्गविशेषः यत्र तादृशः। **नरवाहनदत्तः इव** तन्नामकः उदयनपुत्रः इव **प्रियङ्गुश्यामासनाथः** प्रियंगुः फलिनीलता श्यामा सोमलता ताभ्यां सनाथः समन्वितः, पक्षे प्रियङ्गुश्यामा तन्नामा तत्पत्नी तया सनाथः युक्तः। **शिशुः इव कृतधात्रोधृतिः** कृता धात्र्या भूमेः धृतिः धारणं येन तादृशः पक्षे कृता जनिता धात्र्याः पालिकामातुः धृतिः सन्तोषः येन तादृशः अथवा कृता धात्र्या धृतिः धारणं यस्य तादृशः। **वासरारम्भः इव** दिनारम्भः प्रातःकालः इव **अरुणप्रभापाटलितपत्रवनराजिः** अरुणया लोहितवर्णया प्रभया गैरिकादिकान्त्या पाटलितानि रक्तीकृतानि पत्राणि पर्णानि यस्याः तादृशी वनराजिः वनपङ्क्तिः यस्य तादृशः, पक्षे अरुणस्य सूर्यस्य प्रभया कान्त्या पाटलितानि पत्राणि तेषां वनानाञ्च जङ्गलानां च राजिः समूहः यत्र तादृशः। **कृष्णपक्षः इव बहुलतागहनः** बह्वीभिः प्रभूताभिः वल्लिभिः गहनः घनः दुर्गमः वा पक्षे बहुलतया कृष्णतया गहनः। **कर्णः इव** तन्नामकः राधापुत्रः इव **अनुभूतशतकोटिदानः** अनुभूतं भुक्तं शतकोटिना वज्रेण दानं पक्षकर्त्तनं येन तादृशः अथवा अनुभूतं सम्पादितं शतकोटिभिः अनेक शृङ्गै दानं गगनकीलनं

येन तादृशः, पक्षे अनुभूतं कृतं शतकोटीनाम् अनेकसंख्यापरिमितधनानां दानं वितरणे येन तादृशः। **भीष्मः इव** गङ्गापुत्रः इव **शिखण्डिमुक्तैः** मयूरव्यक्तैः, पक्षे शिखण्डिना तन्नामकेन द्रुपदपुत्रेण मुक्तैः प्रक्षिप्तैः अर्धचन्द्रैः अर्धचन्द्राकारैः पिच्छैः, पक्षे अर्धचन्द्रैः तन्नामकबाणविशेषैः **अचिततनुः** आचिता परिव्याप्ता तनुः शरीरं यस्य तादृशः पक्षद्वयमेव। **कामसूत्रविन्यासः इव** कामसूत्रं कामशास्त्रं तस्य विन्यासः रचना इव **मल्लनागघटितकान्तारसामोदः** मल्लैः बलवद्भिः नागैः गजैः घटितः सङ्कुलः अत एव कान्तारे दुर्गममार्गे वने वा सामोदः मदवारिसहितः, पक्षे मल्लनागेन कामसूत्रकर्तृणा वात्स्यायनमुनिना घटितः सङ्कलितः कान्तानां कामिनीनां रसस्य शृङ्गारस्य आमोदः परिमलः उत्कर्ष वा यस्मिन् तादृशः। **हिरण्यकशिपुः इव** प्रह्लादपिता इव **शम्बरकुलाश्रयः** शम्बराणां तन्नामकमृगविशेषाणां कुलस्य वंशस्य समूहस्य वा आश्रयः आश्रयस्थानम्, पक्षे शम्बरस्य तन्नामक दैत्यविशेषस्य कुलं वंशः आश्रयः यस्य तादृशः......।

**गैरिकव्याजादुपरिरविरथमार्गमार्गणार्थमिवारुणेनोपास्यमानः, शिखरगतसूर्यचन्द्रमस्तया विस्तारितलोचनोऽगस्त्यमार्गमुद्वीक्षमाणः, कुलिशक्षतरन्ध्रस्त्रस्तान्त्रजाल इव जरदजगरभोगैः, कुम्भकर्ण इव दन्तान्तरालगतैर्वानरव्यूहैः, पिण्डालक्तकरागपल्लवितपदपङ्क्ति-सूचितसञ्चारशचीपतिपुरवारविलासिनीसङ्केतकेतकीमण्डपः, अकुलीनोऽपि संद्वशभूषितः, दर्षिताभयोऽपि मृत्युफलदायी, सप्रस्थोऽप्यपरिमाणः, सनदोऽपि निश्शब्दः, भीमोऽपि कीचकसुहृत्, पिहिताम्बरोऽपि विलसदंशुकः, विन्ध्यो नाम गिरिरदृश्यत।**

**संस्कृतव्याख्या–गैरिकव्याजात्** गिरौ जायमानः गैरिकः तस्य व्याजात् मिषाद् **उपरिरविरथमार्गमार्गणार्थम् इव** उपरि स्वोर्ध्वप्रदेशे रविरथस्य सूर्यस्यन्दनस्य यो मार्गः गमनपन्था तस्य मार्गणार्थम् अन्वेषणाय इव **अरुणेन** तन्नाम्ना सूर्यसारथिना गरुडाग्रजेन **उपास्यमानः** पूज्यमानः **शिखरगतसूर्यचन्दमस्तया** सूर्यः च चन्द्रमाः च सूर्यचन्द्रमसौ, शिखरं मूर्धनि स्थाने गतौ यस्य तस्य भावः तादृशया विस्तारितलोचनः विकासित नेत्रः सन् **अगस्त्यमार्गम्** तन्नामकर्षेः मार्गं पुनरागमपथम्

**उद्वीक्ष्यमाणः इव** विलोक्यमानः प्रतीक्ष्यमाणः इव **जरदजगरभोगैः** जरतां वृद्धानाम् अजगराणां सर्पाणां भोगैः शरीरैः **कुलिशक्षतरन्ध्रस्त्रस्तान्त्रजालः इव** कुलिशक्षतेन वज्रप्रहारेण उत्पन्नं यत् रन्ध्रं विवरं तस्मात् स्रस्तानि बहिरागतानि अन्त्रजालानि यस्य तादृशः इव। **दन्तान्तरालगतैः** दन्तानां शिखराणाम् अन्तरालं मध्यभागं तत्र गतैः प्राप्तैः पक्षे दन्तानां दशनानाम् अन्तरालं गतैः प्रविष्टैः **वानरव्यूहैः** वानरसमूहैः **कुम्भकर्णः इव** रावणानुजः इव। **पिण्डालक्तकरागपल्लवितपदपङ्क्तिसूचितसञ्चारशचीपतिपुरवारविलासिनीसङ्केतकेतकीमण्डपः** पिण्डीभूतः यः अलक्तकः यावकवृक्षः तस्य रागेण लौहित्येन पल्लविताभिः शोभायमानाभिः पदपङ्क्तिभिः चरणविन्यासरेखाभिः सूचितः प्रकटितः सञ्चारः येषां तादृशां इति मण्डपविशेषणं सूचितःसञ्चारो यासां तासां विलासिनी–विशेषणं वा, शचीपतिपुरस्य इन्द्रनगरस्य विलासिनीनामुर्वश्दीनामप्सरसां सङ्केताः कामिजनसङ्केतस्थानभूताः केतकीमण्डपाः यत्र तादृशः। अतः परं विरोधाभासेन विन्ध्याचलं वर्णयति–**अकुलीनः इति। अकुलीनः अपि** कुलस्य सद्वंशस्य अपत्यं कुलीनः, न कुलीनः अकुलीनः सद्वंशाप्रसूतः इति भावः तादृशः अपि, पक्षे कौ पृथिव्यां लीनः संलग्नः कुलीनः तादृशः न सः अकुलीनः अत्युच्चः तादृशः अपि **सद्वंशभूषितः** सताम् उत्तमानां वंशेन कुलेन भूषितः सुशोभितः, पक्षे सद्भिः श्रेष्ठैः वंशैः वेणुभिः भूषितः। **दर्शिताभयः अपि** दर्शितं प्रकटीकृतम् अभयं येन तादृशः अपि, पक्षे दर्शिता अभया हरीतकी येन तादृशः **मृत्युफलदायी** मृत्युफलं मरणमेव फलं दातुं शीलं यस्य तादृशः पक्षे मृत्युफलं कदलीफलं दातुं शीलं यस्य तादृशः। **सप्रस्थः अपि** प्रस्थः परिमाणविशेषः तेन सहितः अपि पक्षे, प्रस्थः शिखरः तेन सहितः, **अपरिमाणः** परिमणशून्यः, पक्षे अपरिमेयः। **सनदः अपि** नदेन ध्वनिना सहितः अपि, पक्षे नदैः शोणदिभिः प्रत्यक्स्रोताभिः सहितः **निःशब्दः** शब्दरहितः, पक्षे क्वचिन्निर्जनतया ध्वनिरहितः। **भीम अपि** मध्यमपाण्डवः भीमः अपि, पक्षे भयङ्करः अपि **कीचकसुहृत्** कीचकस्य विराट्श्यालस्य सुहृत् मित्रः, पक्षे कीचकानां वंशविशेषाणां वेणूनां सुहृत् आश्रयः। **पिहिताम्बरः अपि** पिहितम् आच्छादितं वस्त्ररूपेण अम्बरम् आकाशं येन तादृशः वस्त्रशून्यः दिगम्बरः चेत्यर्थः तादृशः अपि, पक्षे पिहितम् आच्छदितं व्याप्तम् अम्बरं आकाशं येन तादृशः, **विलसदंशुकः** विलसत् शोभायमानम् अंशुकं वस्त्रं यस्य तादृशः, पक्षे

विलसन्तः स्फुरन्तः अंशुका किरणाः यस्य तादृशः, **विन्ध्यः नाम** तन्नामकः **गिरिः** पर्वतः **अदृश्यत्** दृष्टिगतोऽभवत्।

**यश्च प्रवृद्धगुल्मतता रोगीव दृश्यमानबहुधातुविकारः, साधुरिव सानुग्रहप्रचारप्रकटितमहिमा, मीमांसान्याय इव पिहितदिगम्बरदर्शनः। यश्च हरिवंशैरिव पुष्कराक्षप्रादुर्भावरमणीयैः, राशिभिरिव मीनमकरकुलीरमिथुनसङ्गतैः, करणैरिव शकुनिनागभद्रबालवकुलोपेतैः, देवखातैरुपशोभितान्तः। यश्च छन्दोविचितिरिव कुसुमविचित्राभिः, वंशपत्रपतिताभिः सुकुमाराभिः पुष्पिताभिः प्रहर्षिणीभिः शिखरिणी-भिर्लताभिर्दर्शितानेकवृतविलासः।**

**संस्कृतव्याख्या–यश्च** विन्ध्यपर्वतः **प्रवृद्धगुल्मतया** प्रवृद्धाः वृद्धिं प्राप्ताः गुल्माः स्तबकाः यस्मिन् तस्य भावः तया, पक्षे प्रवृद्धः गुल्मः तन्नामकरोगविशेषः यस्य तस्य भावः तया **रोगी इव** रोगपीडित जनः इव **दृश्यमानबहुधातुविकारः** दृश्यमानाः दृष्टिगोचराः जाता बहूनाम् अनेकेषां गेर्वादीनां धातूनां विकारः रजांसि यस्मिन् तादृशः, पक्षे दृश्यमानः बहूनाम् वातपित्तादीनां धातूनां विकारः स्थितिः यस्मिन् तादृशः, **साधुः इव** सज्जनः इव **सानुग्रहप्रचारप्रकटितमहिमा** सानुषु शृङ्गेषु ग्रहाणां सूर्यादीनां प्रचारेण सञ्चरणेन प्रकटिता प्रत्यक्षीकृत महिमा औन्नत्यं यस्य तेन वा तादृशः, पक्षे सानुग्रहेण सानुक्रोशेन यः प्रचारः प्रकृष्टः आचारः व्यवहारः वा तेन प्रकटिता महिमा उत्कर्षः येन तादृशः। **मीमांसान्यायः इव** मीमांसाशास्त्रम् इव **पिहितदिगम्बरदर्शनः** पिहितम् आच्छादितं दिशाम् आशानाम् अम्बरस्य आकाशस्य च दर्शनं दृष्टिगोचरत्वं येन तादृशः, पक्षे पिहितं खण्डितं निराकृतं वा दिगम्बराणां दिगम्बरजैनसम्प्रदायानां दर्शनं शास्त्रं येन तादृशः आसीत्। **यश्च** विन्ध्याचलः **देवखातैः** प्राकृतिकैः जलाशयैः **उपशोभितान्तः** उपशोभितः अलङ्कृतः उपान्तः समीपप्रदेशः यस्य तादृशः विद्यते इत्यन्वयः। **हरिवंशैः इव** श्रीकृष्णकथाप्रधानैः महाभारतस्यांशविशेषैः इव **पुष्कराक्षप्रादुर्भावरमणीयैः** पुष्कराक्षाणां कमलबीजानां प्रादुर्भावेन समुत्पत्या रमणीयैः मनोरमैः, पक्षे पुष्कराक्षस्य कमलनेत्रस्य कृष्णस्य प्रादुर्भावेन उत्पत्तिवर्णनेन रमणीयैः मनोहरैः। **राशिभिः इव मीनमकरकुलीरमिथुनसङ्गतैः** मीनानां मत्स्यानां मकराणां नक्राणां कुलीराणां कर्कटानां च मिथुनैः युगलैः

सङ्गतैः समन्वितैः, पक्षे मीनादिनामकैः राशिविशेषैः सङ्गतैः। **करणैः इव शकुनिनागभद्रबालवकुलोपेतैः** शकुनिभिः खगैः नागैः हस्तिभिः सर्पैः वा भद्रेण मुस्तया वालेन ह्रीबेरेण वकुलेन केसरवृक्षेण उपेतैः समन्वितैः, पक्षे शकुनिः नागं भद्रं बालव इति करणविशेषं तेषां कुलेन समूहेन उपेतैः जलाशययुक्तः आसीत्। **यश्च** विन्ध्यपर्वतः **छन्दोविचितिः इव** छन्दशास्त्रम् इव **कुसुविचित्राभि** कुसुमैः पुष्पैः विचित्राभिः शोभायमानाभिः पक्षे तन्नामकछन्दोभिः **वंशपत्रपतिताभिः** वंशपत्रेषु वेणुपर्णेषु पतिताभिः प्ररुढाभिः, पक्षे वंशपत्रपतिता छन्दोभिः **सुकुमाराभिः** सुकोमलाभिः, पक्षे सुकुमारानामकैः छन्दोभिः **पुष्पिताभिः** कुसुमिताभिः, पक्षे पुष्पिताछन्दोभिः **प्रहर्षिणीभिः** प्रहर्षयन्ति पश्यतां चेतः प्रकृष्टेन आनन्दयन्ति इति ताभिः, पक्षे प्रहर्षिणी–छन्दोभिः **शिखरिणीभिः** शिखरमग्रभागं यासां तादृशैः, पक्षे शिखरिणीनाम–छन्दोभिः **लताभिः** वल्लीभिः **दर्शितानेकवृत्तविलासः** दर्शितः प्रकटीकृतः अनेकवृत्तविलासः अनेकविधविलासः तेन तादृशः, पक्षे दर्शितः अनेकवृत्तविलासः अनेकछन्दोविलासः येन तादृशः।

## ( रेवावर्णनम् )

**यश्च समदकलहंससारसरसितोद्भ्रान्तभाकूटविकटकुञ्जकूर्चव्याधूत–कमलषण्डगलितमकरन्दबिन्दुसन्दोहसुरभितसलिलया, सायन्तनसमयम–ज्जत्पुलिन्दराजसुन्दरीनिम्ननाभिमण्डलपीतप्रतिहतरयसलिलया, मदमुख–रराजहंसकुलकोलाहलमुखरतिकूलपुलिनया, तटनिकटस्थितमत्तमातङ्ग–गण्डस्थलविगलन्मदधाराबिन्दुप्रकरस्तबकितसलिलया, तीरप्ररूढकेतकी–काननपतितधूलिनिकुरम्बसञ्जातसितसैकतसुखोपविष्टतरुणसुरमिथुन–निधुवनलीलापरिमलसाक्षिकूलोपवनया, तटावटविघटिताम्भोजषण्ड–मण्डपावस्थितजलदेवतावगाह्यमानपयसा, तीरप्ररूढवेतसलताभ्यन्तरली–नदात्यूहव्यूहमदकलकुहकेलीकुहकुहारावकौतुकाकृष्टसुरमिथुनसंस्तूय–मानकूलोपवनोपभोगया, उपकूलसञ्जातनलनिकुञ्जपुञ्जितकुलाय–कुक्कुटघटाघटितघूत्कारभैरवतीरया आतपसेवासमुत्सुकजलमानुषी–मृदितसुकुमारतरपुलिनया, उपवनपवनान्दोलिततरलतरतरङ्गया, नलिनीनिकुञ्जपुञ्जनिविष्टदुष्टबकोटककुटुम्बिनीनिरीक्ष्यमाणवृद्धशफरया**

**पोताधानलब्धकोयष्टिकस्तम्भनभीमवेतसवनलतया, तरङ्गमालासन्तरदुद्दण्डबालदर्शनधावदतिचपलराजिलराजिराजितोपकूलसलिलया, खञ्जरीटमिथुननिधुवनदर्शनोपजातनिधिग्रहणकौतुककिरातशतखन्यमानस्थपुटिततीरया, क्रुद्धयेव दर्शितमुखभङ्गया, मत्तयेव स्खलद्गत्या, दिनारम्भलक्ष्म्येव वर्धमानवेलया, भारतसमरभूम्येव नृत्यत्कबन्धया, प्रावृषेव विजृम्भमाणशतपत्रपिहितविषधरया, धनकामयेव कृतभूभृत्सेवाया, रेवया प्रियतमयेव प्रसारिततरङ्गहस्तयोपगूढः।**

**संस्कृतव्याख्या—**यः च विन्ध्यपर्वतः रेवया नर्मदया नद्या उपगूढः। अतः परं रेवानदीं वर्णयति **समदेति। समदकलहंससारसरसितोभ्रान्तभाकूटविकटकुञ्जकूर्चव्याधूतकमलषण्डगलितमकरन्दबिन्दुसन्दोहसुरभितसलिलया** समदानां मत्तानां कलहंसानां राजहंसानां पुष्करनामकपक्षीणां रसितेन ध्वनिना उद्भ्रान्तानां चकितानां भाकूटानां मत्स्यविशेषाणां विकटेन विशालेन कुञ्जकुर्चेन हनुप्रदेशस्थितेन श्यश्रुसमूहेन व्याधूतेभ्यः कमलषण्डेभ्यः मृणालेभ्यः गलितैः पतितैः मकरन्दबिन्दूनां परागकणानां सन्दोहेन समूहेन सुरभितं सुगन्धितं सलिलं जलं यस्याः तादृशया **सायन्तसमयमज्जत्पुलिन्दराजसुन्दरीनिम्ननाभिमण्डलपीतप्रतिहतरयसलिलया** सायन्तनः सायंकालिकः यः समयः तस्मिन् सायङ्काले इत्यर्थः मज्जन्तीनाम् अवगाह्यन्तीनां पुलिन्दराजस्य शबरनरेशस्य सुन्दरीणां रमणीनां निम्नेन गभीरेण नाभिमण्डलेन पीतं पानं कृतम् अत एव प्रतिहतः कुण्ठितः प्रतिबद्ध वा रयः वेगाः यस्य तादृशः सलिलं जलं यस्याः तादृशया। **मदमुखरराजहंसकोलाहलमुखरितकूलपुलिनया** मदेन हर्षातिशयेन मुखराणां वाचालानां राजहंसानां कुलस्य समूहस्य कोलाहलेन कलरवेण मुखरितं ध्वनिमानं कूलपुलिनं तटबालुकामयस्थानं यस्याः तादृशया। **तटनिकटस्थितमत्तमातङ्गगण्डस्थलविगलन्मदधाराबिन्दुप्रकरस्तबकितसलिलया** तटस्य निकटे समीपे स्थितानां मत्तमातङ्गानां मदजलयुक्तानां हस्तीनां गण्डस्थलेभ्यः कपोलेभ्यः विगलन्त्याः स्रवन्त्याः मदधाराया मदजललेखायाः बिन्दुप्रकरेण बिन्दुसमूहेन स्तबकितं सञ्जातगुच्छं सलिलं जलं यस्याः तादृशया। **तीरप्ररूढकेतकीकाननपतितधूलीनिकुरम्बसञ्जातसितसैकतसुखोपविष्टतरुणसुरमिथुननिधुवनलीलापरिमलसाक्षिकुलोपवनया** तीरे

तटे समुत्पन्नं यत् केतकीकाननं केतकीवनं तस्मात् पतितायाः धूल्याः परागस्य निकुरम्बेन समूहेन सञ्जाते समुपस्थिते सिते धवले सैकते बालुकायुक्तप्रदेशे सुखोपविष्टानां तरुणसुरमिथुनानां युवकदेवयुगलानां निधुवनलीलायाः सुरतक्रीडायाः परिमलस्य विमर्दस्य साक्षि साक्षाद्दर्शकभूतं कूलोपवनं तटोद्यानं यस्याः तादृशया। **तटावटविघटिताम्भोजषण्डमण्डपावस्थितजलदेवतावगाह्यमानपयसा** तटावटस्थं तीरखातस्थितं विघटितं विकसितं यद् अम्भोजषण्डं कमलवनं तदेव मण्डपः तस्मिन् अवस्थिताभिः जलदेवताभिः अवगाह्यमानं स्नानाय प्रविश्यमानं पयः जलं यस्याः तादृशया। **तीरप्ररूढवेतसलताभ्यन्तलीनदात्यूहव्यूहमदकल कुहकेलीकुहकुहारावकौतुकाकृष्टसुरमिथुनसंस्तूयमानकुलोपवनोपभोगया** तीरप्ररूढानां तटोत्पन्नानां वेतसलतानां वानीरवृक्षाणां अभ्यन्तरे मध्ये निलीनस्य उपगूहितस्य दात्यूहव्यूहस्य कालकण्टकनामकपक्षिविशेषसमूहस्य मदकलेन मदध्वनिना अव्यक्तमधुरे केलिकुहकुहारावे सुरतकालोत्पन्नकुहुकुहु-इति ध्वनौ कौतुकेन कौतूहलेन आकृष्टम् आकर्षितं यत् सुरमिथुनं देवयुगलं तेन संस्तूयमानः प्रशस्यमानः कूलोपवनस्य तटोद्यानस्य उपभोगः उपयोगः यस्याः तादृशया। **उपकूलेसञ्जातनलनिकुञ्जपुञ्जितकुलायकुक्कुटघटाघटितघूत्कार-भैरवतीरया** उपकूलस्य तटसमीपं स ञ्जातेषु नलनिकुञ्जेषु नडनामकतृण-विशेषलतागृहेषु पुञ्जितेषु समुदायरूपेण निर्मितेषु कुलायेषु नीडेषु विद्यमानानां कुक्कुटानां घटया समूहेन घटितेन घूत्कारेण घूघूध्वनिना भैरवं भयङ्करं तीरं तटस्थानं यस्याः तादृशया। **आतपसेवासमुत्सुकजलमानुषीमृदितसुकुमारतरपु-लिनया** आतपसेवायां धर्म-सेवने समुत्सुकाभिः उत्कण्ठिताभिः जलमानुषीभिः जलमानुषस्त्रीभिः मृदितं मर्दितं सुकुमारतरम् अत्यधिकं सुकोमलं पुलिनं तटं यस्याः तादृशया। **उपवनपवनान्दोलिततरलतरतरङ्गया** उपवनस्य पवनेन वायुना आन्दोलिताः प्रकम्पायमानाः अत एव तरलतराः अतिशयेन चञ्चलाः तरङ्गाः लहरयः यस्याः तादृशया **नलिनीनिकुञ्जपुञ्जनिविष्टदुष्टवकोटककुटुम्बिनी-निरीक्ष्यमाणवृद्धशफरया** नलिनीनां कमलिनीनां निकुञ्जपुञ्जेषु लतागृहसमूहेषु निविष्टाभिः स्थिताभिः दुष्टाभिः वकोटककुटुम्बिनीभिः वकस्त्रीभि निरीक्ष्य-माणाः खादितुं दृश्यमानाः वृद्धाः जरासम्पन्नाः शफराः मत्स्यविशेषाः यस्यां तादृशया। **पोताधानलुब्धकोयष्टिकस्तम्भनभीमवेतसवनलतया** पोताधाने क्षुद्राण्डमत्स्यसमूहे लुब्धा मक्षयितुं अभिलाषिणः ये कोयष्टिकाः दीर्घग्रीवपक्षिविशेषाः

तेषां स्तम्भनेन निश्चलावस्थानेन भीमाः भयङ्कराः वेतसलताः वानीरलताः यस्यां तादृशया। **तरङ्गमालासन्तरदुद्दण्डबालदर्शनधावदतिचपलराजिलराजिराजितोपकूल-सलिलया** तरङ्गमालासु वीचिश्रेणीषु सन्तरतां प्लवमानानाम् उद्दण्डबालानां मत्स्यविशेषाणां दर्शनेन धावतां सवेगम् इतस्ततः गच्छतां अत एव अतिचपलानाम् अत्यन्तचञ्चलानां राजिलानां तन्नामककमत्स्यविशेषाणां राजिभिः समूहैः राजितं शोभायमानं उपकूलसलिलं तटवर्तिजलं यस्याः तादृश्या। **खञ्जरीटमिथुननिधुव-नदर्शनोपजातनिधिग्रहणकौतुककिरातशतखन्यमानस्थपुटिततीरया** खञ्जरीटानां खञ्जननामकपक्षिविशेषाणां मिथुनानां युगलानां निधुवनदर्शनेन सुरतक्रीडदर्शनेन उपजातं समुत्पन्नं निधिग्रहणस्य द्रव्यप्राप्तस्य कौतुकम् अभिलाषः येषां तैः किरातशतैः अनेकवनवासिजातिविशेषैः खन्यमानम् विदार्यमाणं स्थपुटितम् विषमीकृतं तीरं तटं यस्याः तादृश्या। **क्रुद्धया इव** कोपितया नायिकया इव **दर्शितमुखभङ्ग्या** दर्शितः मुखे उद्गमस्थाने भङ्गः कुटिलेन गमनं यया तादृशया पक्षे दर्शितः प्रकटितः मुखभङ्गः कोपप्रदर्शनरूपः मुखविकारः यया तादृश्या **मत्तया इव** मद्यपानेन उत्पन्नमदेन सम्पन्ना या तया इव। **स्खलद्गत्या** स्खलन्ती यत्र-तत्र प्रस्तरेषु निरुद्धा गतिः प्रवाहः यस्याः तादृश्या, पक्षे स्खलद्गतिः भङ्गगतिः यस्याः तादृशया **दिनारम्भलक्ष्म्या इव** दिनारम्भः प्रातःकालः तस्य लक्ष्मी शोभा यस्याः तया इव। **वर्धमानवेलया** वर्धमाना विस्तारं गच्छन्ती वेला कूलं यस्या तादृशया पक्षे वर्धमाना वेला समयं यस्याः तादृश्या। **भारतसमरभूम्या इव** भारतस्य महाभारतस्य समरभूमिः युद्धस्थली तया इव। **नृत्यत्कबन्धया** नृत्यन् नृत्यं कुर्वन् इव प्रवहन् कबन्धः सलिलं यस्या तादृशया पक्षे नृत्यन्तः कबन्धाः ग्रीवारहितशरीरानि यत्र तादृशया। **प्रावृषा इव** वर्षाकालेन इव **विजृम्भमाणशतपत्रपिहितविषधरया** विजृम्भमाणैः प्रफुल्लमानैः शतपत्रैः कमलैः पिहितस्य आच्छादिस्य विषधारा जलधारा यस्याः तादृशया अथवा विजृम्भमाणैः हर्षाधिक्येन शोभायमानैः पिच्छादिना वर्धमानैः वा शतपत्रैः मयूरैः पिहिताः आच्छादिताः आक्रान्ता वा विषधराः सर्पाः यस्या तादृशया, पक्षे विजृम्भमाणैः उद्गच्छद्भिः शतपत्रैः दार्वाघाटैः पक्षिविशेषैः पिहिताः आच्छादिताः मेघाः यस्यां तया। **धनकामया इव** धने धनप्राप्तौ कामः अभिलाषः यस्याः तया इव। **कृतभूभृत्सेवया** कृता सम्पादिता भूभृतां पर्वतानां स्वतरङ्गैः चरणक्षालनरूपा सेवा यया तादृशया, पक्षे

कृता भूभृतां राज्ञां सेवा यया तादृशया। **प्रियतमया इव** प्रियतमा प्रेयसी तया इव **प्रसारिततरङ्गहस्तया** प्रसारितौ समालिङ्गनाय प्रलम्बितौ तरङ्गरूपौ हस्तौ यया तादृशया **रेवया** नर्मदया तन्नामकनद्या **उपगूढः** सन्निहितः आसीत्।

**यश्च–हरिखरनखरविदारितकुम्भस्थलविकलवारणध्वानैः।**

**अद्यापि कुम्भसम्भवमाह्वयतीवोच्चतालभुजः॥**

**अन्वय–**अद्यपि उच्चतालभुजः हरिखरनखरविदारितकुम्भस्थलविकल–वारणध्वानैः कुम्भसम्भवम् आह्वयति इव।

**संस्कृतव्याख्या–उच्चतालभुजः** = उच्चः विशालः तालः तन्नामकवृक्षः भुजः यस्य सः विन्ध्यपर्वतः **हरिखरनखरविदारितकुम्भस्थलविकलवारण–ध्वानैः** हरीणां सिंहानां खरैः तीक्ष्णैः नखरैः नखाग्रै विदारितानि छिन्नानि कुम्भस्थलानि कपोलस्थलानि येषां ते अत एव विकलाः व्याकुला ये वारणाः हस्तिनः तेषां ध्वानैः अव्यक्तैः उच्चचिग्घाडरवैः कुम्भसम्भवं कुम्भः एव सम्भवं उत्पत्तिस्थानं यस्य तादृशं कुम्भजम् अगत्यं **आह्वयति इव** आकारयतीव। अत्रोत्प्रेक्षालङ्कारः।

**( गजोपरिसिंहाक्रमणवर्णनम् )**

**तत्रान्तरे मकरन्दस्तमुवाच–**

**पश्योदञ्चदवाञ्चदञ्चितवपुःपूर्वार्धपश्चार्धभाक्**

**स्तब्धोत्तानितपृष्ठनिष्ठितमनाग्भुग्नाग्रलाङ्गूलभृत्॥**

**दंष्ट्राकोटिविशङ्कटास्यकुहरः कुर्वन् सटामुत्कटा–**

**मुत्कर्णः कुरुते क्रमं करिपतौ क्रूराकृतिः केसरी॥**

**अन्वय–**पश्य, उदञ्चदवाञ्चदञ्चिवपुःपूर्वार्धपश्चार्धभाक्, स्तब्धोत्तानित–पृष्ठनिष्ठितमनाभुग्भुग्नाग्रलाङ्गूलभृत्, दंष्ट्राकोटिविशङ्कटास्यकुहरः उत्कर्णः क्रूराकृतिः केसरी सटाम् उत्कटां कुर्वन् करिपतौ क्रमं कुरुते।

**संस्कृतव्याख्या–**मकरन्दः गजराजोपरि सिंहाक्रमणं स्वाभाविकरूपेण वर्णयति **पश्येति**। हे मित्र कन्दर्पकेतुः **पश्य** त्वं विलोकय अयं पुरोविद्यमानः **उदञ्चदवाञ्चदञ्चितवपुःपूर्वार्धपश्चार्धभाक्** उदञ्चन् उन्नमन् अवाञ्चन्

अवनमन् अञ्चितः शोभायमानः च वपुषः शरीरस्य यः पूर्वार्धः पूर्वार्धभागः पश्चार्धभाक् अपरार्ध भागः च। **स्तब्धोत्तानितपृष्ठनिष्ठितमनाग्भुग्नाग्रलाङ्गुल-भृत्** स्तब्धं निञ्चलीकृतम् उत्तानितं उन्नमितं पृष्ठनिष्ठितं पृष्ठभागे स्थितं मनाक् किञ्चिन्मात्रं भुग्नाग्रं कुटिलाग्रभागं च लाङ्गूलं पुच्छं विभर्तीति तादृशः, **दंष्ट्राकोटिविशङ्कटास्यकुहरः** दंष्ट्राकोटिभिः दन्ताग्रैः विशङ्कटं भयङ्करं विशालं वा आस्यकुहरं मुखविवरं यस्याः तादृशः, **क्रूराकृतिः** कूरः भीषणः आकृतिः स्वरूपः यस्य तादृशः भीषणाकारः **केसरी** सिंहः **सटां** केसरम् **उत्कटाम्** उक्षिप्तां **कुर्वन् करिपतौ** गजराजे **क्रमं** पादविक्षेपम् आक्रमणं वा **कुरुते** कर्तुं तत्परः अस्ति। अत्र गजराजोपरि सिंहाक्रमणस्य स्वाभाविकतया वर्णनात् स्वभावोक्तिरलङ्कारः। शार्दूलविक्रीडितं छन्दश्च।

**अपि च–**

**उत्कण्ठोऽयमकाण्डचण्डिमपटुः स्फारस्फुरत्केसरः,**
**क्रूराकारकरालवक्त्रकुहरः स्तब्धोर्ध्वलाङ्गूलभृत्,**
**चित्रे चापि न शक्यतेऽभि ( वि ) लिखितुं सर्वाङ्गसङ्कोचभाक्,**
**फीट्कुर्वद्गिरिकुञ्जकुञ्जबृहत्कुम्भस्थलस्थो हरिः॥**

**अन्वय–**उत्कण्ठः अकाण्डचण्डिमपटुः स्फारस्फुरत्केसरः क्रूराकारकराल-वक्त्रकुहरः स्तब्धोर्ध्वलाङ्गूलभृत् सर्वाङ्गसङ्कोचभाक् फिट्कुर्वद्गिरि-कुञ्जकुञ्जरबृहत्कुम्भस्थलस्थः अयं हरिः चित्रे चापि अभिलिखितुं न शक्यते।

**संस्कृतव्याख्या–**आक्रमितुं गजमस्तकोपरि स्थितस्य सिंहस्य स्वाभाविकं वर्णनं करोत्यत्र **उत्कण्ठेति–उत्कण्ठः** उत् ऊर्ध्वं कण्ठः ग्रीवा यस्य तादृशः **अकाण्डचण्डिमपटुः** अकाण्डे अनवसरे यः चण्डिना उग्रत्वं तेन पटुः कुशलः **स्फारस्फुरत्केसरः** स्फारं बहु यथास्यात्तथा स्फारा अधिका स्फुरन्तः दीप्यमानाः केसराः सटाः यस्य तादृशः **क्रूराकारकरालवक्त्रकुहरः** क्रूरः कुटिलः आकारः आकृतिः यस्य तादृशं भयोत्पादकं करालं विशालं वक्त्रकुहरं मुख्यविवरं यस्य सः **स्तब्धोर्ध्वलाङ्गूलभृत्** स्तब्धं निश्चलं ऊर्ध्वम् उपरि उत्क्षिप्तं लाङ्गूलं पुच्छं विभर्तीति तादृशः सर्वाङ्गसङ्कोचभाक् सर्वेषाम् अङ्गानाम् अवयवानां सङ्कोचम् सकुञ्चनं भजतीति तादृशः **फीट्कुर्वद्गिरिकुञ्जकुञ्जरबृहत्कुम्भस्थलस्थः**

फिट्कुर्वन् पीडया फिडिति ध्वनिं कुर्वन् चिग्घाडमानं गिरिकुञ्जे पर्वतगह्वरे स्थितः यः कुञ्जरः गजः तस्य बृहति विशाले कुम्भस्थले मस्तके तिष्ठतीति तादृशः **अयं** पुरोदृश्यमानः **हरिः** सिंहः **चित्रे** आलेख्ये चापि **अभिलिखितुं** चित्रितुं **न शक्यते।**

**( जम्बूवृक्षच्छायावर्णनम् )**

**अनन्तरं नीचदेशनद्येव न्यग्रोधोपचितया, उत्तरगोग्रहणसमरभूम्येव विजृम्भमाणबृहन्नलया, कुरुदेशढक्कयेव घनसारसार्थवाहिन्या, विदग्धमधुगोष्ठ्येव नानाविटपीतासवया, नलकूबरचित्तवृत्त्येव सततधृतरम्भया, मत्तमातङ्गगत्येव घण्टारवावेदितमार्गया, सदीश्वरसेवयेव अदूरोद्गतबहुफलया, विराटलक्ष्म्येव आनन्दितकीचकशतया, विन्ध्याटव्या कतिपयपदमध्वानं गत्वा कामिन इव मदनशलाकाङ्कितस्य, विकर्तनस्येव स्निग्धच्छायस्य, वैकुण्ठस्येव लक्ष्मीभृत्, यात्रोद्यतनृपतेरिव घनपत्रशोभितस्य, वेदस्येव भूरिशाखालङ्कृतस्य, गाणिक्यस्येव अनेकपल्लवोज्ज्वलस्य, जम्बूतरोरधश्छायायां विशश्राम।**

**संस्कृतव्याख्या**–अनन्तरम् एतादृश्या विन्ध्याटव्या कतिपयपदमध्वानं गत्वा कस्यचित्तरोः अधःछायायां विशश्रामेत्यन्वयः। विन्ध्याटवीं वर्णयति–**अनन्तरमिति। नीचदेशनद्या इव** निम्नस्थाने प्रवहन्त्या नद्या इव **न्यग्रोधोपचितया** न्यग्रोधैः वटवृक्षैः उपचिता व्याप्ता तया, पक्षे न्यग्रोधेन अधः प्रदेशावरोधेन उपचिता वृद्धा तया। **उत्तरगोग्रहणसमरभूम्या इव** उत्तरेण विराटपुत्रेण गवां सुयोधनादपहृतानां ग्रहण प्रत्यानयनं तस्य समरः युद्धं तस्या भूम्या स्थल्या इव **विजृम्भमा-णबृहन्नलया** विजृम्भमाणाः प्रवर्धमानाः बृहन्तः नलाः तन्नामकतृणविशेषाः यस्यां तादृश्या, पक्षे विणृम्भमाणः पराक्रमेण द्योतमानः बृहन्नलः अर्जुनः यस्या तया। **कुरुदेशढक्कया इव** कुरुदेशे कुरुक्षेत्रे विद्यमान् ढक्का कर्पूराकरभूता कुल्या तया इव **घनसारसार्थवाहिन्या** घनः महान् सारो धनं यस्य स घनसारः महाधनसम्पन्नः सार्थः वणिक्समूहः तं वहतीति तथोक्तया, पक्षे घनसारः कर्पूरस्तस्य सार्थं समूहं वहतीति तादृश्या। **विदग्धमधुगोष्ठ्या इव** विदग्धानां नागरकाणां मधुगोष्ठी मधुपानसभा तया इव **नानाविटपीतासवया** नानाविटपीषु अनेकेषु वृक्षेषु इतः समुत्पन्नः आसवः पुष्परसः यस्याः तया पक्षे नानाविटैः

अनेकैः विटैः पीतः आसवः मद्यविशेषः यस्या तया। **नलकूबरचित्तवृत्या इव** कुबेरपुत्रस्य नलकूबरस्य चित्तवृत्तिः मनोवृत्तिः तया इव। **सततधृतरम्भया** सततं धृता रम्भा कदल्यः वेणवः यया तया, पक्षे सततं धृता रम्भा अप्सरोविशेषः यया तया। **मत्तमातङ्गगत्या इव** मत्तस्य मातङ्गस्य कुञ्जरस्य या गतिः तया इव **घण्टारवावेदितमार्गया** घण्टारवाभिः शंणपुष्पिकाभिः आच्छादित्वात् आवेदितः अज्ञातः मार्गः पन्था मृगसमूहः वा यस्यां तादृशया, पक्षे घण्टानां रवेण ध्वनिना आवेदितः सूचितः मार्गः गजगमनपन्था यस्याः तया। **सदीश्वरसेवया इव** सदीश्वरस्य सज्जनस्य स्वामिनः सेवया इव **अदूरोद्गतबहुफलया** अदूरं समीपं उद्गतानि समुत्पन्नानि बहूनि फलानि यस्याः तया, पक्षे अदूरम् अचिरादेव किञ्चित्कालसेवानन्तरमेव उद्गतानि प्राप्तानि सिद्धानि वा फलानि प्रयोजनानि यस्याः तया। **विराटलक्ष्म्या इव** विराटस्य लक्ष्मीः तया इव **आनन्दितकीचकशतया** आनन्दितं वर्धितं कीचकानां वेणुविशेषाणां शतं यया तया, पक्षे आनन्दितं स्वोपभोगेन सन्तर्पितं कीचकानां विराटश्यालकानां शतं यया तादृशया, **विन्ध्याटव्या** विन्ध्यवनेन **कतिपयपदं** किञ्चिद्दूरम् **अध्वानं** मार्गं **गत्वा कामिनः इव मदनशलाकाङ्कितस्य** मदनशलाकया शारिकया अङ्कितस्य शोभायमानस्य, पक्षे मदनशलाकया कामवर्धकौषधिना अङ्कितस्य सम्पन्नस्य। **विकर्तनस्य इव** सूर्यस्य इव **स्निग्धछायस्य** स्निग्धा मसृणा शीतला छाया यस्य तादृशस्य पक्षे, स्निग्धा स्नेहयुक्ता छाया तन्नामकसूर्यपत्नी यस्याः तादृशस्य **वैकुण्ठस्य इव** विष्णु इव **लक्ष्मीभृतः** शोभाधारकस्य, पक्षे लक्ष्मीं श्रियं विभर्ति स्वहृदये धरतीति यः तस्य। **यात्रोद्यतनृपतेः इव** यात्रायै दिग्विजयाय उद्यतस्य तत्परस्य नृपतेः राज्ञः इव **घन-पत्रशोभितस्य** घनैः निविडैः पत्रैः पर्णैः शोभितस्य शोभायमानस्य, पक्षे घनैः दृढै पत्रैः अश्वादिवाहनैः शोभितस्य सम्पन्नस्य। **वेदस्य इव** रुतिः इव **भूरिशाखालङ्कृतस्य** भूरिभिः शाखाभिः स्वकन्धोपकन्धैः अलङ्कृतस्य सम्पन्नस्य, पक्षे अनेकैः शाकलादिभिः शाखाभिः अलङ्कृतस्य शोभितस्य **गाणिक्यस्य इव** गणिकानां वेश्यानां समूहः गाणिक्यं तस्य इव **अनेकपल्लवोज्ज्वलस्य** अनैकैः बहुभिः पल्लवैः पर्णैः उज्ज्वलस्य शोभायमानस्य, पक्षे अनेकै पल्लवैः विटैः शोभायमानस्य **जम्बुतरोः** जम्बुवृक्षस्य **अधश्छायायां** विशश्राम विश्राममकरोत्।

## ( कन्दर्पकेतुशयनवर्णनम् )

**अत्रान्तरे भगवानपि मरीचिमालो आतपक्लान्तवनमहिषलोचनपाटलमण्डलश्चरमाचलमारुरोह। ततो मकरन्दः फलमूलान्यादाय कथं कथमपि तमभिनन्दिताहारमकार्षीत्। स्वयमपि तदुपभुक्तशेषमकरोदशनम्। अथ तामेव प्रियतमां हृदयफलके सङ्कल्पतूलिकया लिखितामिवावलोकयन्निस्पन्दकरणग्रामः कन्दर्पकेतुर्मकरन्दविरचिते पल्लवशयने सुष्वाप।**

**संस्कृतव्याख्या**–अत्रान्तरे तस्मिन् काले **भगवान् मरीचिमालः** सूर्यः अपि **आतपक्लान्तवनमहिषलोचनपाटलमण्डलः** आतपेन धर्मेण क्लान्तस्य खिन्नस्य वनमहिषस्य अरण्यसैरिभस्य लोचनवत् नेत्रवत् पाटलं रक्तं मण्डलं बिम्बं यस्य तादृशः **चरमाचलम्** अस्ताचलम् **आरुरोह** आरोहणम् अकरोत्। **ततः** तत्पश्चात् **मकरन्दः** तन्नामकः कन्दर्पकेतुसुहृत् **फलमूलानि** फलानि मूलानि च **आदाय** नीत्वा **कथं कथमपि** येनकेनप्रकारेण **तम्** पूर्वोक्तं कन्दर्पकेतुम् **अभिनन्दिताहारम्** अभिनन्दितः भुक्तः आहारः येन तादृशः **अकार्षीत** अकरोत् **स्वयमपि तदुपभुक्तशेषं** तेन कन्दर्पकेतुना उपभुक्तशेषं उपभुक्तादवशिष्टम् **अकरोत्। अथ** तदनन्तरं **तामेव** स्वप्नदृष्टामेव **प्रियतमां** प्रेयसीं **हृदयफलके** हृदयपटले हृदरूपे चित्रपटले **सङ्कल्पतूलिकया** सङ्कल्पः मानसी भावना एव तूलिका चित्रलेखनी तया **लिखिताम् इव** चित्रिताम् इव **अवलोकयन्** विलोकयन् **निष्पन्नकरणग्रामः** निश्चलेन्द्रियसमूहं यस्य तादृशः। **कन्दर्पकेतुः** तन्नामकराजकुमारः **मकरन्दविरचिते** मकरन्देन सम्पादिते **पल्लवशयने** पर्णासने **सुष्वाप** सुशयनम् अकरोत्।

## ( शुकसारिकयोः वार्तालापवर्णनम् )

**अथ याममात्रावखण्डितायां यामवत्यां तत्र जम्बूतरुशिखरे मिथः कलहायमानयोः शुकशारिकयोः कलकलं रुत्वा कन्दर्पकेतुर्मकरन्दमुवाच–'वयस्य शृणुमस्तावदनयोरालापम्' इति। ततो जम्बूनिकुञ्जस्थिता शारिका काचिच्चिरादागतं शुकं प्रकोपतरलाक्षरमुवाच–'कितव! शारिकान्तरमन्विष्य समागतोऽसि। कथमन्यथा रात्रिरियती तव' इति। अथ तच्छ्रुत्वा शुकस्तामवादीत्–'भद्रे! मुञ्च कोपम्। अपूर्वाद्य बृहत्कथा मया श्रुता**

**प्रत्यक्षीकृता च तेनायं कालातिपातः।' इति। अथ समुपजातकुतूहलया शारिकया मुहुर्मुहुरनुबध्मानः कथां कथयितुमारेभे।**

**संस्कृतव्याख्या**–अथ शयनानन्तरं **याममात्रावखण्डितायां** याममात्रेण एकेन प्रहरेण अवखण्डितायां समाप्तौ **यामवत्यां** रात्रौ **तत्र** तस्मिन् **जम्बूतरुशिखरे** जम्बूवृक्षाग्रभागे **मिथः** परस्परं **कलहायमानयोः** कलहं कुर्वतोः **शुकशारिकयोः** शुकस्य शारिकायाश्च तयोः **कलकलं** कलरवं **रुत्वा** आकर्ण्य **कन्दर्पकेतुः** तन्नामकराजकुमारः **मकरन्दं** स्वमित्रम् **उवाच** अकथयत्। **वयस्य** हे मित्र **अनयोः** शुकशारिकयोः **आलापं** वार्तालापं **शृणु** श्रवणं कुरु। **ततः** तदनन्तरं **जम्बुनिकुञ्जस्थिता** जम्बुवृक्षाणां निकुञ्जे स्थिता विद्यमाना **शारिका कचिच्चिरायतं** अल्पमात्रविलम्बेन आयातं **शुकं प्रकोपतराक्षरं** अत्यन्तक्रुद्धंशब्दम् **उवाच** अकथयत्- **कितव** हे धूर्त! **शरिकान्तरम्** अन्यां शारिकाम् **अन्विष्य** स्वपत्नीरूपेण उपभुज्य **समागतः असि** अत्रागतः असि। **अन्यथा कथं** किमर्थम् **इयती रात्रिः** एतत्परिमाणा निशा कुत्र विलम्बिता। **अथ** अनन्तरं **तत् रुत्वा** शरिकाकथनम् आकर्ण्य शुकः **तां** शारिकाम् **उवाच** अकथयत्-**भद्रे** हे कल्याणि **मुञ्च कोपं** प्रणयकोपं त्यज। **अद्य** अस्मिन् दिवसे **अपूर्वा** विचित्रा **बृहत्कथा** मया शुकेन **रुता** आकर्णिता **प्रत्यक्षीकृत्ता।** दृष्टा च **तेन** तस्मात्कारणाद् **अयम्** एषः **कालातिपातः** बिलम्बोऽभवत्। **अथ** तत्पश्चात् **समुपनातकुतूहलया** समुपजातं समुत्पन्नं कुतूहलं श्रवणोत्सुकता यस्याः तादृश्या **शारिकया** मुहुर्मुहुः वारं-वारम् **अनुबध्यमानः** आग्रहपूर्वकेण प्रार्थयमानः शुक्रः कथां कथितुं वक्तुम् **आरेभे** आरम्भमकरोत्।

## इकाई-द्वितीय

### ( शुककथितकथावर्णनम् )

### ( तत्र कुसुमपुरनगरवर्णनम् )

**अस्ति मन्दरगिरिशृङ्गैरिव प्रशस्तसुधाधवलैः बृहत्कथालम्बैरिव सालभञ्जिकोपशोभितैः, वृत्तैरिव समाणवकक्रीडितैः, करियूथैरिव समत्तवारणैः, सुग्रीवसैन्यैरिव सगवाक्षैः, बलिभवनैरिव सुतलसन्निवेशैः, वेश्मभिरुद्भासितम्.....।**

**संस्कृतव्याख्या–**अस्ति कुसुमपुर नाम नगरम् इत्यन्वयः। तन्नगरम् एतादृशैः वेश्मभिरुद्भासितामिति वेश्मानि प्रथमं वर्णयति– **मन्दरगिरिशृङ्गैः इव** मन्दरगिरेः मन्दरनामकस्य पर्वतविशेषस्य शृङ्गैः शिखरैः इव **प्रशस्तसुधाधवलैः** प्रशस्तया सुधया सुधानामकद्रव्यविशेषेण लेपेन धवलैः शुभ्रैः, पक्षे प्रशस्तया सुधया अमृतलेपेन धवलैः। **बृहत्कथालम्बैः इव** बृहत्कथायाः गुणाढ्यकृत–कथाविषयकग्रन्थविशेषास्यः लम्बैः ग्रन्थावान्तरविभागरूपैः लम्भकैः इव **सालभञ्जिकोपशोभितैः** सालभञ्जिकाभिः प्रस्तरस्तम्भादिषु उत्कीर्णाभिः पाञ्चालिकाभिः उपशोभितैः अलङ्कृतैः **वृत्तैः इव** छनदोभिः इव **समाण–वकक्रीडितैः** माणवकानां वेदाध्यायिनां शिशूनां वा क्रीडितैः क्रीडायुक्तैः, पक्षे माणवकक्रीडितं नाम छन्दविशेषः तेन युक्तैः। **करियूथैः इव** गजसमूहैः इव **समत्तवारणैः** मत्तवारणानि महाप्रासानां वराण्डा नागदन्तका द्वाराजि वा तैः सह विद्यमानैः, पक्षे मत्तवारजाः मदजलस्राविणाः हस्तिनः यत्र तादृशैः। **सुग्रीवसैन्यैः इव** सुग्रीवस्य सैन्यैः इव **सगवाक्षैः** वातायनसहितैः, पक्षे गवाक्षनामक वानरसेनापतिविशेषः तत्सहितैः। **बलिभवनैः इव** बलिः तन्नामकः वामनरूपधारिणा विष्णुना छलितः राक्षसविशेषः तस्य भवनैः प्रासादैः इव **सुतलसन्निवेशैः** सुतैः पुत्रैः सन्तः सुशोभिताः निवेशाः स्थानानि द्वाराणि वा येषां तादृशैः पक्षे सुतले सुतलनामके पाताले सन्निवेशः स्थितिः येषां तादृशैः **वेश्मभिः** भवनैः **उद्भासितं** सुशोभितम्....।

**( कुसुमपुरनिवासिजनवर्णनम् )**

**धनदेनापि प्रचेतसा, गोपालेनापि रामेण, प्रियंवदेनापि पुष्पकेतुना, भरतेनापि लक्ष्मणेन, तिथिपरेणाप्यतिथिसत्कारप्रवणेन, असङ्ख्येनापि सङ्ख्यावता अमर्मभेदिनाऽपि वीरतरेण, अपतितेनापि नानासवासक्तेन, सुदर्शनेनाप्यचक्रेण, अजातमदेनापि सुप्रतीकेन, हंसेनाप्यपक्षपातिना, अविदितस्नेहक्षयेणापि कुलप्रदीपेन, अग्रन्थिनापि वंशपोतेन, अग्रहेणापि काव्यजीवज्ञेन, निदाघदिवसेनेव वृषवर्धितरुचिना, माघविरामदिवसेनेव तपस्यारम्भिणा, नभस्वतेव सत्पथगामिना विवस्वतेन गोपतिना, महेश्वरेणेव चन्द्रं दधता निवासिजनेनानुगतम्.....।**

**संस्कृतव्याख्या**–अतः परं धनदेनापि निवासिनमेनानुगतमिति तत्र निवासिजनं विरोधाभासेन वर्णयति। **धनदेन अपि** धनं ददातीति धनदः दानशीलः तेन, पक्षे धनदेव कुबेरेण अपि **प्रचेतसा** प्रकृष्टमुत्तमं सदाशयं चेतः मनः यस्य तादृशेन, पक्षे वरुणेन। **गोपालेन अपि** गां वाचं पालयति निर्वाहयतीति गोपालः सत्यवाक् तादृशेन अपि, पक्षे कृष्णेव अपि **रामेण** सर्वसन्तोषप्रदः तादृशेन, पक्षे दशरथपुत्रेण। **प्रियंवदेन अपि** प्रियंवादिना अपि पक्षे, प्रियंवदः नाम गन्धर्वविशेषः तादृशेन अपि **पुष्पकेतुना** पुष्पेण पुष्पालङ्कारेण केतुः द्युतिः यस्य तादृशेन, पक्षे कामदेवेन। **भरतेन अपि** भरणपोषणेन अपि, पक्षे रामानुजेन अपि **लक्ष्मणेन** लक्ष्मीसम्पन्नेन, पक्षे सुमित्रापुत्रेण। **तिथिपरेण** तिथिः पर्वादौ विहितं कर्म परं प्रधानं यस्य तादृशेन अपि, पक्षे ज्योतिषशास्त्रकुलशेन अपि। **अतिथिसत्कारपरेण** अतिथीनां अभ्यागतानां सत्कारे स्वागते प्रवणेन तल्लीनेन, पक्षे तिथिविहितकर्मणः सत्कारे प्रवणः युक्तः न तेन। **असङ्ख्येन अपि** न विद्यते सङ्ख्यं युद्धं यस्य तादृशेन अपि, पक्षे नगण्येन अपि **संख्यावता** संख्या ज्ञानं बुद्धिः वा यस्य तादृशेन पक्षे, सङ्ख्यायुक्तेन। **अमर्मभेदिना अपि** मर्म परेषां रहस्यं न भिनत्तीति तादृशेन अपि पक्षे, मर्म शत्रूणां हृदयस्थलं न भिनत्तीति तादृशेन अपि **वीरत्तरेण** अतिवीरत्वसम्पनेन। **अपतितेन अपि** पतितः पातकी नास्तिकः, अपतितः आस्तिकः तादृशेन अपि, पक्षे भूमौ अपतितेन अपि। **नानासवासक्तेन** विविधसोमयागेषु आसक्तेन, पक्षे विविधमद्यपानेषु आसक्तेन संलग्नेन। **सदर्शनेन अपि** सुष्ठु दर्शनं यस्य तादृशेन अपि तत्परेण, पक्षे

विष्णोः अस्त्ररूपेण सुदर्शनेन अपि **अचक्रेण** अहंकाररहितेन, पक्षे चक्ररहितेन। **अजातमदेन अपि** अनुत्पन्नाहङ्कारेण अपि, पक्षे अनुत्पन्नमदजलेन **सुप्रतीकेन** सुष्ठुशरीराङ्गेण, पक्षे सुप्रतीकः तन्नाम दिग्गजः तेन। **हंसेन** हंसेन अपि विशुद्धेन अपि, पक्षे हंसनामकपक्षिविशेषेण **अपक्षपातिना** सर्वजनेषु समरूपेण, पक्षे पङ्ख–रहितेन। **अविदितस्नेहक्षयेण अपि** न विदितः स्नेहक्षयः प्रेमनाशः यस्य तादृशेन अपि, पक्षे न विदितः स्नेहक्षयः तैलनाशः यस्य तादृशेन अपि **कुलप्रदीपेन** कुलस्य वंशस्य प्रदीपः प्रकाशकः तादृशेन, पक्षे कुलस्य गृहस्य प्रदीपः दीपकः तेन। **अग्रन्थिना अपि** ग्रन्थिः कुटिलता तद्विहीनेन शुद्धान्तःकरणेन अपि, पक्षे पर्वरहितेन अपि **वंशपोतेन** सद्वंशोत्पन्नेन, पक्षे वंशाङ्कुरेण। **अग्रहेण अपि** ग्रहः यस्मिन्कस्मिन् वस्तूनि आग्रहः तद्रहितेन अपि, पक्षे नक्षत्रभिन्नेन अपि **काव्यजीवज्ञेन** काव्यमर्मज्ञेन, पक्षे काव्यः शुक्रः जीवः बृहस्पतिः ज्ञः बुधः तेषां समाहारः काव्यजीवज्ञं तेन। **निदाघदिवसेन इव** ग्रीष्मकालिकदिनेन इव **वृषवर्धितरुचिना** वृषे धर्मे वर्धिता वृद्धिंगता रुचिः इच्छा यस्य तादृशेन, पक्षे वृषेण वृषभराशिना वर्धिता रुचिः शोभा यस्य तादृशेन। **माघविरामदिवसेन इव** माघस्य माघमासस्य विरामदिवसेन समाप्तिदिनेन इव **तपस्यारम्भिणा** तपस्यां तपश्चर्याम् आरभितुं शीलं यस्य तादृशेन, पक्षे तपस्यं फाल्गुनमासम् आरभते इति तपस्यारम्भणी तादृशेन। **नभस्वता इव** वायुना इव **सत्पथगामिना** सतां सज्जनानां पथा मार्गेण गच्छतीति सत्पपथगामी तादृशेन, पक्षे सतां नक्षत्राणां पथा तेन गामिना। **विवस्वता इव** सूर्येण इव **गोपतिना** गवां वाचां भूमिनां वा धेनूनां वा पतिना स्वामिना पक्षे गवां मयूखानां पतिना स्वामिना। **महेश्वरेण इव** शङ्करेण इव **चन्द्रं** चन्द्रं सुवर्णं, पक्षे चन्द्रमसं **दधता** धारयता। **निवासिगणेन** पुरवासिना अनुगतम् परिव्याप्तम् नगरम् अस्ति।

### ( नगरवेश्यावर्णनम् )

**घनापगमेनेव दर्शितखण्डाभ्रेण, वेलातटेनेव प्रवालमण्डनेन, देवाङ्गनाजनेनेव इन्द्राणीपरिचयविदग्धेन, गजेन्द्रेणेव पल्लववर्धितरुचिना, कोकिलेनेव परपुष्टेन, भ्रमरेणेव कुसुमेषुलालितेन, जलोकसेव रक्ताकृष्टि–निपुणेन, यायजूकेनेव सुरतार्थिना, महानटबाहुनेव बद्धभुजङ्गाङ्केन, गरुडेनेव विलासिहृदयतापकारिणा बन्धकेनेव शूलानामुपरिगतेन, वेश्याजनेनाधिष्ठितं कुसुमपुरं नाम नगरम्।**

**संस्कृतव्याख्या**–इतः परं वेश्याजनेनाधिष्ठितमित्यन्वयः। वेश्याजनं वर्णयति–**घनापगमेनेति। घनापगमेन इव** घनानां मेघानाम् अपगमः अभावः यस्मिन् सः शरत्कालः तेन इव **दर्शितखण्डाभ्रमेण** दर्शितं प्रकटितं खण्डाभ्रं दन्तक्षतविशेषः येन तादृशेन, पक्षे दर्शितं खण्डभूतं शकलीभूतं अभ्रः मेघः येन तादृशेन। **वेलातटेन इव** वेलायाः समुद्रस्य तटेन कूलेन इव **प्रवाल–मण्डनेन** प्रकृष्टाः श्रेष्ठाः प्रलम्बमानाः बालाः केशाः एव मण्डनं भूषणं यस्य तादृशेन, पक्षे प्रवालः विद्रुमः मण्डनं यस्य तादृशेन। **देवाङ्गनाजनेन इव** देवर–मणीलोकेन इव **इन्द्राणीपरिचयविदग्धेन** इन्द्राणी तन्नामकसुरतबन्धविशेषः तस्याः परिचये सम्पादने विदग्धः निपुणः तादृशेन, पक्षे इन्द्राण्याः इन्द्रपत्न्याः परिचयात् साहचर्यात् विदग्धेन चतुरेण। **गजेन्द्रेण इव** गजराजेन इव **पल्लववर्धितरुचिना** पल्लवैः विटैः कामासक्तैः वा वर्धिता वृद्धिंप्राप्ता रुचिः दीप्तिः यस्य तादृशेन अथवा पल्लवेन अलक्तकेन वर्धिता रुचिः शोभा यस्य तादृशेन पक्षे पल्लवैः पत्रैः वर्धितः वृद्धिंगतः रुचिः सञ्जातशोभः तादृशेन। **कोकिलेन इव** परभृतेन इव, **परपुष्टेन** परम् अत्यधिकं पुष्टेन धनसम्पन्नेन सुस्वास्थ्येन वा, पक्षे परैः अन्यैः काकैरित्यर्थः पुष्टः पोरषितः तादृशेन। **भ्रमरेण इव** मधुकरेण इव **कुसुमेषुलालितेन** कुसुमेषुणा पुष्पधन्वना कामेन लालितेन विलासितेन पक्षे कुसुमेषु पुष्पेषु तेन लालितेन स्नेहयुता। **जलोकसा इव** तन्नामकप्राणि–विशेषेण इव **रक्ताकृष्टिनिपुणेन** रक्तेभ्यः अनुरागयुक्तेभ्यः कामिभ्यः वा या आकृष्टिः आकर्षणं वशीकरणं तस्मिन् निपुणेन कुशलेन, पक्षे रक्तस्य या आकृष्टिः पानं तस्मिन् निपुणेन। **यायजूकेन इव** यज्ञिकेन इव **सुरतार्थिना** सुरतं कामक्रीडां अर्थयते कामयते सः सुरतार्थी तादृशेन, पक्षे सुरतां देवत्वं तदर्थिना। **महानटबाहुना इव** महानटस्य शङ्करस्य बाहुना करेण इव **बद्धभुजङ्गाङ्केन** वद्धः कृतः भुजङ्गैः कामुकैः अङ्कः क्रोडः यस्य तादृशेन कामुकाक्रोडपतितेन, पक्षे बद्धाः कृता भुजङ्गाः सर्पाः एव अङ्कः भुषणं येन तादृशेन। **गरुडेन इव** विष्णुवाहनेन इव **विलासिहृदयताप–कारिणा** विलासिनां कामुकानां हृदयतापं मनक्षोभं करोति समुत्पादयति इति तादृश्या अथवा विलासिनां हृदयतापं हृणोति अपगमयतीति तादृशया, पक्षे विलासिनां सर्पाणां हृदयतापं करोति जनयतीति तादृश्या। **बन्धकेन इव** बन्धकनामकासुरेण इव **शूलानां** स्थानान्तरे स्थितानां गणिकानां, पक्षे शूलं

नामायुधविशेषं तत्र **उपरिगतेन** श्रेष्ठेन, पक्षे अग्रे स्थापितेन। **वेश्याजनेन** गणिकावृन्देन **अधिष्ठिकतं** शोभायमानं **कुसुमपुरं नाम** तन्नामकं नगरं विद्यते।

**( कात्यायनीवर्णनम् )**

**यत्र च सुरासुरमौलिमालालाक्षितचरणारविन्दा, शुम्भनिशुम्भमहासुर-बलमहावनदावज्वाला, महिषासुरगिरिवरवज्रधारा, प्रणयकलहप्रणतगङ्गा-धरजटाजूटकोटिस्खलितजाह्नवीजलधाराधौतपादपद्मा, भगवती कात्यायनी चण्डाभिधाना स्वयं निवसति।**

**संस्कृतव्याख्या–यत्र** यस्मिन् कुसुमपुरे **सुरासुरमौलिमालालाक्षितचर-णारविन्दा** सुराणां देवानाम् असुराणां दानवानां मौलिमालाभिः शिरस्थपुष्पमालाभिः किरीटपङ्क्तिभिः मस्तकश्रेणीभिर्वा लाक्षिते पूजिते चरणारविन्दे चरणरूपे कमले यस्याः तादृशी, **शुम्भनिशुम्भमहासुरबलमहावनदावज्वाला** शुम्भनिशुम्भौ तन्नामकौ महासुरौ महादानवौ तयोः बलं शक्तिः सैन्यं तदेव महावनं महदरण्यं तस्य दावानलज्वाला वनाग्निशिखारूपा **महिषासुरगिरिवरवज्रधारा** महिषासुरः तन्नामकः राक्षसः एव गिरिवरः पर्वतश्रेष्ठः तस्य वज्रधारा अशन्यग्रप्रदेशः। **प्रणयकहलप्रणतगङ्गाधरजटाजूटकोटिस्खलितजाह्नवीजलधाराधौतपाद-पद्मा** प्रयणकलहे प्रणतः चरणपतितः यः गङ्गाधरः शङ्करः तस्य जटजूटः जटाबन्धः तस्य कोट्या अग्रभागात् स्खलिता निस्सरिता या जाह्नवी गङ्गा तस्याः जलधारया जलप्रवाहेण धौतं प्रच्छालितं पादपद्मं चरणारविन्दं यस्याः सा **भगवती कात्यायनी** भगवती पार्वती **चण्डाभिधाना** चण्डा इति अभिधानः नाम यस्याः तादृशी **स्वयं निवसति** निवासं करोति।

**( गङ्गावर्णनम् )**

**यस्य च परिसरे सुरासुरमज्जनगलितकुसुममुकुटरजोराजिपरिमलवाहिनी, पितामहकमण्डलुविनिर्गतधर्मद्रवधारा, धरातलसगरसुतशतसुरनगरसमारोह-णपुण्यरज्जुनिश्रेणिका, ऐरावतकपोलकषणकम्पिततटगतहरिचन्दनस्यन्द-मानरससुरभितसलिला, सलीलसुरसुन्दरीनितम्बबिम्बादृतितरलिततरङ्गा, स्नानावतीर्णसप्तर्षिमण्डलविमलजटाटवीपरिमलपुण्यवेणिः, एणतिलकमु-कुटविकटजटाजूटकुहरभ्रान्तिजनितसंस्कारेवाद्यापि कुटिलावर्ता, धरणीव**

**सार्वभौमकरस्पर्शोपभोगक्षमा, जलदकालसरसीव गन्धपरिभ्रमद्भ्रमरमाला-नुमीयमानजलमूलमग्नकुमुदपुण्डरीका, छन्दोविचितिरिव मालिनीसनाथा, ग्रहपङ्क्तिरिव सूर्यात्मजोपशोभिता सराजहंसा च, शरत्कालदिनश्रीरिव उज्ज्वलत्कोकनदा प्रबुद्धपुण्डरीकाक्षा च, हृतान्धतमसापि तमसान्विता, वीचिकलिताप्यवीचिदुर्गमा, भगवती भागीरथी वहति।**

**संस्कृतव्याख्या**–कुसुमपुरस्य परिसरे समीपे **भगवती भागीरथी** वहतीत्यन्वय:। अत: परं भागीरथीं वर्णयति **यस्येति। यस्य** पूर्वोक्तनगरस्य कुसुमपुरस्य **परिसरे** समीपे **सुरासुरमज्जनगलितकुसुममुकुटरजोराजिपरिमलवाहिनी** सुराणां देवानाम् असुराणां दैत्यानां च मज्जने स्नानकाले गलिता अध:पतिता या कुसुममुकुटेभ्य: पुष्पनिर्मितकिरीटेभ्य: रजसां परागाणां राजि: पङ्क्ति: तस्या परिमलं सुगन्धं वोढुं शीलं यस्या: तादृशी **पितामहकमण्डलु-विनिर्गतधर्मद्रवधारा** पितामहस्य ब्रह्मण: कमण्डुलत: जलधार-णपात्रविशेषात् विनिर्गत: नि:सृत: यो धर्म: स एव द्रव: जलं तस्य धारा यस्या: तादृशी। **धरातलसगरसुतशतसुरनगरसमारोहरणपुण्यरज्जुनि-श्रेणिका** धरातले पाताले पतितानां सगरसुतशतानां षष्ठिसहस्त्रसगरपुत्राणां सुरनगरे स्वर्गे समारोहणार्था पुण्या पवित्रा रज्जुनिश्रेणिका रज्जुनिर्मितसोपानपंक्ति: **ऐरावतकपोलकषणकम्पिततटगतहरिचन्दनस्यन्दमानरससुरभितसलिला** ऐरावतस्य इन्द्रगजस्य कपोलकषणेन गण्डस्थलकर्षणेन कम्पितं दोलायमानं यत् तटगतं तटस्थितं हरिचन्दनं तन्नामकं देवचन्दनं तस्य स्यन्दमान: च्यवमान: य: रस: निर्वास तेन सुरभितं सुगन्धितं सलिलं जलं यस्या: तादृशी **सलीलसुरसुन्दरीनितम्बबिम्बाहृतितरलिततरङ्गा** सलीलं विलासपूर्वकं सुरसुन्दीणं देवाङ्गनानां नितम्बबिम्बं नितम्बमण्डलं तस्य आहत्या आघातेन तरलिता: चञ्चलीकृता तरङ्गा वीचय: यस्या: तादृशी **स्नानावतीर्णसप्तर्षि-मण्डलविमलजटाटवीपरिमलपुण्यवेणि:** स्नानार्थं मज्जनार्थम् अवतीर्ण: जले प्रविष्ट: य: सप्तर्षिमण्डल: सप्तर्षियूथ: तस्य विमलाया: निर्मलाया: जटाटव्या: जटाबन्धन्स्य केशसमूहस्य परिमलेन सुगन्धेन पुण्या पवित्रा वेणी प्रवाह: यस्या: तादृशी **एणतिलकमुकुटविकटजटाजूटकुहरभ्रान्तिजनितसंस्कारा इव** एण: हरिण: तिलकविशेषं यस्य स: हरिणाङ्क: चन्द्र: स: मुकुटे यस्य

सः चन्द्रमौलिः शङ्करः तस्य विकटे विशाले जटाजूटकुहरे कपर्दगह्वरे भ्रान्त्या चक्राकारभ्रमणेन जनितः समुत्पादितः संस्कारः वासना यस्याः सा तथा जाता **अद्यापि** साम्प्रतमपि **कुटिलावर्ता** कुटिलाः वक्राः आवर्ताः जलानां भ्रमाः यस्याः तादृशी। **धरणी इव** पृथ्वी इव **सार्वभौमकरस्पर्शोपभोगक्षमा** सार्वभौमस्य तन्नामकस्य दिग्गजस्य ऐरावतस्य वा करस्पर्शः शुण्डास्पर्शः तद्रूपस्य उपभोगस्य अनुभवस्य क्षमा योग्या, पक्षे सार्वभौमः चक्रवर्ती राजा तस्य करस्पर्शः अन्यैः भूपालैः दीयमानैः राजग्राह्यभागः तस्य उपभोगस्य क्षमा उचिता। **जलदकालसरसी इव** जलदकालस्य वर्षाकालस्य सरसी सरः इव **गन्धपरिभ्रमद्भ्रमरमालानुमीयमानजलमूलमग्नकुमुदपुण्डरीका** गन्धेन मदगन्धवासनया परिभ्रमन्ती इतस्ततः परिचरन्ती या भ्रमरमाला मधुकरपङ्क्तिः तया अनुमीयमानः तर्क्यमाणः जलमूले जलमध्ये मग्नः निमग्नः कुमुदः पुण्डरीकः दिग्गजः वा यस्यां तादृशी, पक्षे कुमुदानि कैरवाणि पुण्डरीकानि कमलानि यस्यां तादृशी **छन्दोविचितिः इव** छन्दोविचितिः छन्दःशास्त्रम् इव **मालिनीसनाथा** मालिनी नामिका नदी तया सनाथा युक्ता, पक्षे मालिनीनाम छन्दो विशेषः तया सनाथा। **ग्रहपङ्क्तिः इव** ग्रहाणां सूर्यादीनां पङ्क्तिः माला इव **सूर्यात्मजोपशोभिता** सूर्यात्मजया यमुनया नद्या उपशोभिता शोभायमाना, पक्षे सूर्यात्मजेन शनिना उपशोभितेन **सराजहंसा च** राजहंसेन सहिता च, पक्षे राज्ञा चन्द्रेण हंसेन सूर्येण चोपशोभिता **शरत्कालदिनश्रीः इव** शरत्कालीनदिवसशोभा इव **उज्ज्वलत्कोकनदा** उज्ज्वलन्ति विकसन्ति कोकनदानि रक्तकमलानि यस्यां तादृशी उभयपक्षे समानमेतत्। **प्रबुद्धपुण्डरीकाक्षा** च प्रबुद्धं विकसितं पुण्डरीकं श्वेतकमलं तदेव अक्षि यस्याः तादृशी पक्षे प्रबुद्धः योगनिद्रायाः जागरितः पुण्डरीकाक्षः विष्णुः यस्यां तादृशी। **हतान्धतमसा अपि** अन्धः तमः अन्धतमसं गाढान्धकारः, हतं अन्धतमसं यया सा अन्धकारविनाशिका, पक्षे अन्धतमसम् अन्धतामिस्रनामनरकविशेषः, हतं विनाशितम् अन्धतामिस्रं यया सा **तमसान्विता** तमसा अन्धकारेण अन्विता युक्ता, पक्षे तमसा तन्नामिकया नद्या अन्विता समन्विता। **वीचिकलिता अपि** वीचिभिः तरङ्गैः कलिता व्याप्ता अपि, पक्षे वीचिः तन्नामकः नरकविशेषः तेन कलिता व्याप्ता अपि **अवीचिदुर्गमा** वीचिभिः दुर्गमा न भवति, पक्षे वीचिः नरकविशेषा दुर्गमा न भवति। एतादृशी **भगवतीभागीरथी** गङ्गा **वहति** प्रवहति।

**( कुसुमपुरस्य पादपवर्णनम् )**

**यच्च दिशि दिशि सन्तानकतरुकुसुमनिकरमिव शिखरावलग्नं तारागणमिव कुसुमनिकरमुद्वहद्भिः, उत्तम्भितजलदैः, अनूरुकशाभिघात-परवशरविरथतुरगग्रासविषमिताग्रपल्लवैः, चन्द्रचमूरुचरणसङ्क्रान्तामृत-कणनिकरसेकसञ्जातबहुलसुकुमारनवकिसलयसहस्रदर्शिताकालसन्ध्या-कालविभ्रमैः, भरतचरितैरिव सदारामाश्रितैः, महावीरैरिव नारिकेलिधरैः, असंस्कृततरुणैरिव अतिदूरप्रसारिताक्षैः, तपस्विभिरिव जपासक्तैः, प्रसाधितैरिव कृतमालोपशोभितैः, मातङ्गकुम्भस्थलविदारणोत्सुकसिंहैरिव उत्फुल्लकेसरैः, सारिष्टैरपि चिरजीविभिः, मुनियुतैरपि मदनाधिष्ठितैः, उपवनपादपैरुपशोभितम्। अदितिजठरमिव अनेकदेवकुलाध्यासितम्। पातालमिव महाबलिशोभितं भुजङ्गाधिष्ठितं च। ससुरालयमपि पवित्रम्, भोगियुक्तमप्यनुपद्रवम्।**

**संस्कृतव्याख्या**—यत् च नगरम् उपवनपादपैः उपशोभितमित्यन्वयः। **दिशि दिशि** सर्वतः **सन्तानकतरुकुसुमनिकरम् इव** सन्तानकतरोः कल्पवृक्षस्य कुसुमनिकरं पुष्पसमूहम् इव **शिखरावलग्नं** शिखरसंसक्तं **तारागणं** नक्षत्रसमूहम् **उद्वहद्भिः** धारयद्भिः **उत्तम्भितमेघैः** उत्तम्भिताः स्वोपरि धारिता जलदाः मेघाः यैः तादृशैः **अनूरुकशाभिघातपरवशरविरथतुरगग्रासविषमिताग्रपल्लवैः** अनूरुः सूर्यसारथिः तन्नामकः गरुडाग्रजः तस्य कशया ताडिन्या अभिघातेन प्रहारेण परवशानां परतन्त्राणां रविरथतुरगाणां सूर्यरथाश्वानां ग्रासेन भक्षणेन विषमिताः विषमीकृताः अग्रपल्लवाः शिखरपत्राणि येषां तादृशैः। **चन्द्रचमूरुचर-णसङ्क्रान्तामृतकणनिकरसेकसञ्जातबहुसुकुमारनवकिसलयसहस्रदर्शिता-कालसन्धयाकालविभ्रमैः** चन्द्रचमूरोः चन्द्रकलङ्कस्य चरणेन सञ्चरणेन पादेन वा सङ्क्रान्तानां क्षोभितानाम् अमृतानां निकरैः कणैः सेकेन सिञ्चनेन सञ्जातानि समुत्पन्नानि बहुलसुकुमाराणि अत्यन्तकोमलानि किसलयानि नूतनपल्लवानि तेषां सहस्रेण समूहेन दर्शिताः प्रदर्शिताः आकाले असमये यः सन्ध्याकालः सायङ्कालः तस्य विभ्रमैः सन्देहैः। **भरतचरितैः इव** कैकयिपुत्रचरितैः इव **सदारामाश्रितैः** सदा निरन्तरम् आरामः उपवनं तम् आश्रितैः, पक्षे सदा रामं कौशल्यानन्दनम् आश्रितैः, **महावीरैः इव** महाबलसम्पन्नैः इव अथवा महद्भिः

अवीरैः कातरैः इव **नारिकेलिधरैः** नारिकेलवृक्षविशेषसम्पन्नैः, पक्षे नारीणां रमणीनां केलिः क्रीडा ताभिः विहरितैः। **असंस्कृततरुणैः इव** असंस्कृतैः कामकलायाम् अशिक्षितैः तरुणैः इव **अतिदूरप्रसारिताक्षैः** अतिदूरं अत्यन्त्यूर्ध्वं बहुस्थाने वा प्रसारिता: विस्तारिता: अक्षा: विभीदकनामकवृक्षविशेषा: येषु तैः, पक्षे अतिदूरम् अत्यधिकं प्रसारितानि विस्तारितानि अक्षीणि नेत्राणि इन्द्रियाणि वा यैः तादृशैः **तपस्विभिः इव** तपसि रतैः अध्ययनशीलैः वा इव **जपासक्तैः** जपाभिः जवानामकवृक्षैः तत्पुष्पैर्वा आसक्तैः सम्पन्नैः पक्षे जपे अध्ययने आसक्तैः सलग्नैः **प्रसाधितैः** इव अलङ्कृतैः इव, **कृतमालोपशोभितैः** कृतमालैः कृतमालनामकवृक्षविशेषैः उपशोभितैः। अलङ्कृतैः, पक्षे कृतया ग्रथितया मालया उपशोभितैः **मातङ्गकुम्भस्थलविदारणोत्सुकसिंहैः इव** मातङ्गानां वारणानां कुम्भस्थलस्य कपोलप्रदेशस्य विदारणाय उत्पाटनाय उत्सुकैः उत्कण्ठितैः सिंहैः इव **उत्फुल्लकेसरैः** उत्फुल्ला: विकसिता: केसरा: बकुलवृक्षविशेषा: येषां तैः, पक्षे उत्फुल्ला ऊर्ध्वंगता: केसरा: सटा: येषां तैः। **सारिष्टैः अपि** अरिष्टानि मरणसूचकचिह्नानि तैः सहितैः अपि पक्षे अरिष्टः काकनामकवृक्षविशेषः तैः सहितैः **चिरञ्जीविभिः** चिरञ्जीविभिः पक्षद्वयैतत्। **मुनियुतैः अपि** मुनयः ऋषयः तैः युतैः सम्पन्नैः अपि, पक्षे मुनिनामकवृक्षविशेषः तैः सहितैः **मदनाधिष्ठितैः** मदनेन कामेन अधिष्ठितैः सम्पन्नैः, पक्षे मदनः वृतनामकवृक्षविशेषः तैः अधिष्ठितैः **उपवनपादपैः** उद्यानवृक्षैः **उपशोभितं** सुशोभितं नगरमस्ति। तच्च नगरम् **अदितिजठरम् इव** अदितेः देवमातुः कश्यपपत्न्याः जठरम् उदरम् इव **अनेकदेवकुलाध्यासितम्** अनेकैः देवकुलैः देवमन्दिरैः अध्यासिम् अधिष्ठितम् पक्षे अनेकैः देवकुलैः देववंशैः अध्यासितम् **पातालमिव महाबलिशोभितम्** महाशूरैः सम्पन्नम्, पक्षे महता महानुभावेन वलिना विरोचनसुतेन शोभितं शोभायमानं, **भुजङ्गाधिष्ठितं च** भुजङ्गैः कामिभिः अधिष्ठितम् समन्वितं, पक्षे भुजङ्गैः सर्पैः अधिष्ठितम्। **ससुरालयमपि** मद्यपानगृहयुक्तमपि, पक्षे देवालयसहितम् **पवित्रं** परिशुद्धम्। **भोगियुक्तमपि** सर्पयुक्तमपि, पक्षे भोगिना राज्ञा युक्तम् **अनुपद्रवम्** उपद्रवरहितम् नगरम् अस्ति।

### (शृङ्गारशेखरवर्णनम्)

**तत्र सुरतरभसखिन्नप्रसुप्तसीमन्तिनीरत्नताटङ्कमुद्राङ्कितबाहुदण्डः, प्रचण्डप्रतिपक्षलक्ष्मीकेशपासकुसुममालामोदसुरभितकरकमलः,**

**प्रशस्तकेदार इव बहुधान्यकार्यसम्पादकः, पार्थ इव सुभद्रान्वितः सभीमसेनश्च, कृष्ण इव सत्यभामोपेतः सबलश्च, शृङ्गारशेखरो नाम राजा प्रतिवसति स्म। यो बलभित्, पावकः, धर्मराट्, निर्ऋतिः, प्रचेताः, सदागतिः धनदः, शङ्कर इत्यष्टमूर्तिरप्यनष्टमूर्तिः।**

**संस्कृतव्याख्या–तत्र** तस्मिन् कुसुमपुरे शृङ्गारशेखरः नाम राजा प्रतिवसति स्मेति सम्बन्धः। सः राजा **सुरतरभसखिन्नप्रसुप्तसीमन्तिनीरत्नताटङ्कमुद्रा-ङ्कितबाहुदण्डः** सुरते कामक्रीडायां यः रभसः वेगः तेन खिन्नानां श्रान्तानां अत एव सुप्तानां निद्रितानां सीमन्तिनीनां रमणीनां रत्नताटङ्कानां रत्ननिर्मित-कर्णाभूषणानां मुद्राभिः चिह्नैः अङ्कितः चिह्नितः बाहुदण्डः भुजदण्डः यस्य तादृशः **प्रचण्डप्रतिपक्षलक्ष्मीकेशपाशकुसुममालामोदसुरभितकरकमलः** प्रचण्डानां बलमर्दितानां प्रतिपक्षीणाम् अरीनां लक्ष्याः राजश्रियः केशपाशस्य केश समूहस्य कुसुममालानां पुष्पदाम्नाम् आमोदेन सुगन्धेन सुरभितः सुगन्धितः करकमलं हस्तारविन्दं यस्य तादृशः। **प्रशस्तकेदारः इव** प्रशस्तः उत्तमः यः केदारः क्षेत्रं सः इव। **बहुधान्यकार्यसम्पादकः** बहुधा प्रायेण अन्येषां जनानां प्रजानामित्यर्थः कार्याणि प्रयोजनानि सम्पादयति निष्पादयति इति तादृशः, पक्षे बहूनि अनेक प्रकाराणि धान्यानि ब्रीह्याद्यन्नानि एव कार्याणि सम्पादयती समुत्पादयतीति तादृशः। **पार्थः इव** अर्जुनः इव **सुभद्रान्वितः** सुभद्राणि सुमङ्गलानि तैः अन्वितः सम्पन्नः, पक्षे सुभद्रया तन्नामिकया कृष्णभगिन्या समुपेतः। **सभीमसेनः** भीमया भीषणया सेनया सहितः, पक्षे स्वानुजेन भीमसेनेन सहितः च। **कृष्णः इव** वासुदेवः इव **सत्यभामोपेतः** सत्येन यथार्थेन भया कान्त्या मया लक्ष्म्या उपेतः सम्पन्नः, पक्षे सत्यभामया तन्नामिकया स्वपत्न्या उपेतः **सबलः च** बलेन सामर्थ्येन सहितः च, पक्षे बलरामेन स्वाग्रजेन सहितः **यः** शृङ्गारशेखरः **बलभित्** बलं शत्रुसैन्यं भिनति विनाशयति इति तादृशः, पक्षे इन्द्रः। **पावकः** पवित्रयिता, पक्षे अग्निः। **धर्मराट्** धर्मेण राजते शोभते इति तादृशः, पक्षे यमः। **निर्ऋतिः** निरुपद्रवः, पक्षे निऋतिः नामक दिग्पालः। **प्रचेता** प्रकृष्टं महानुभावं चेतः मनः यस्य तादृशः, पक्षे वरुणः। **सदागतिः** सतां सज्जनानाम् आगतिः आश्रयस्थानम्, पक्षे वायुः **धनदः** धनं ददातीति तादृशः, पक्षे कुबेरः। **शङ्करः** शं कल्याणं करोतीति शङ्करः, पक्षे महादेवः इति अष्टमूर्तिः

अष्टौ मूर्तयः रूपाणि यस्य तादृशः अपि। **अनष्टमूर्तिः** न विद्यन्ते अष्टौ मूर्तयः यस्य तादृशः, पक्षे अनष्टा नाशमप्राप्ता शोभना मूर्तिः शरीरं यस्य तथोक्तः।

**सुराणां पाताऽसौ स पुनरतिपुण्यैकहृदयो**

**ग्रहस्तस्यास्थाने गुरुरुचितमार्गे स निरतः।**

**करस्तस्यात्यर्थं वहति शतकोटिप्रणयितां**

**स सर्वस्वं दाता तृणमिव सुरेन्द्रं विजयते॥**

**अन्वय–**असौ सुराणां पाता, सः पुनः अतिपुण्यहृदयः, ग्रहः गुरुः, तस्यास्थाने सः उचितमार्गे निरतः, तस्य करः शतकोटिप्रणयितां वहति सः सर्वस्वं तृणम् इव दाता (एवं) सुरेन्द्रं विजयते।

**संस्कृतव्याख्या–असौ** इन्द्रः **सुराणां** मदिराणां वास्तविकोऽर्थः देवानां **पाता** पानकर्त्ता वास्तविकोऽर्थः रक्षकः। **सः** शृङ्गारशेखरः **पुनः** किन्तु **अतिपुण्यहृदयः** अतिपुण्ये यागादौ अतिपवित्रे कर्माणि हृदयं अन्तकरणं यस्य तादृशः निरतः संलग्नः। **तस्य** इन्द्रस्य **ग्रहः** आग्रहः वास्तविकोऽर्थः सूर्यादिषु श्रेष्ठः ग्रहः **गुरुः** अत्यधिकं वास्तविकोऽर्थः बृहस्पतिः **आस्थाने** सम्यग्रूपेण अनुचितमार्गे परदाराभिगमने अनुचित कार्ये वास्तविकोऽर्थः सभामण्डपे। परं च **सः** शृङ्गारशेखरः **उचितमार्गे** सदाचरणे **निरतः** संलग्नः। **तस्य** इन्द्रस्य **करः** हस्तः **शतकोटिप्रणयितां** शतकोटीनां धनानां प्रणयितां याचकताम् वास्तविकोऽर्थ; शतकोटौ वज्रायुधे प्रणयितां स्नेहं **अत्यर्थम्** अत्यधिकं वहतिं धारयति। परञ्च सः शृङ्गार शेखरः **तृणम् इव** तुच्छवस्तु इव **सर्वस्वं** स्वकीयं यत्किञ्चिदपि विद्यते तत्सर्वं **दाता** ददातीति दाता प्रदानकर्त्ता वर्तते, एवं सः **सुरेन्द्रं** देवेन्द्रं **विजयते** तिरस्करोति। सुरेन्द्रं विजयते इति वाक्यार्थं प्रति पूर्ववाक्यार्थानां हेतुत्वेन वर्णनादत्र काव्यलिङ्गमलङ्कारः। तल्लक्षणं यथा–'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्' इति। अत्र शिखरिणी छन्दः। तल्लक्षणं यथा–रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी।

**(शृङ्गारशेखस्य युद्धवर्णनम्)**

**जीवाकृष्टिं च चक्रे मृधभुवि धनुषः शत्रुरासीद्गतासु-**

**र्लक्षाप्तिर्मार्गणानामभवदरिबले तद्यशस्तेन लब्धम्।**

**मुक्ता तेन क्षमेति त्वरितमरिबलैरुत्तमाङ्गैः प्रतिष्ठा**

**पञ्चत्वं द्वेषिसैन्यैर्गतमवनिपतिर्नाप सङ्ख्यान्तरं सः।**

**अन्वय**–मृधभुवि सः धनुषः जीवाकृष्टिं चक्रे, शत्रुः उद्गतासुः आसीत्। अरिबले मार्गणानाम् लक्षाप्तिः अभवत्, तेन तद् यशः लब्धम्। तेन क्षमा मुक्ता। इति त्वरितम् अरिबलैः उत्तमाङ्गैः प्रतिष्ठा मुक्ता द्वेषिसैन्यैः पञ्चत्वं गतम्, सः अवनिपतिः सङ्ख्यान्तरं न आप।

**संस्कृतव्याख्या**–श्लोकेऽस्मिन् राज्ञः युद्धपराक्रमं वर्णयति-**जीवेति। मृधभुवि** युद्धस्थले **सः** शृङ्गारशेखरः **धनुषः** बाणासनस्य **जीवाकृष्टिं** प्रत्यञ्चाकर्षणं **चक्रे** अकरोत् **शत्रुः** अरिः **उद्गतासुः** निष्प्राणः हताशः वा **आसीत् अरिबले** शत्रुसैन्ये **मार्गणानां** बाणानां लक्षाप्तिः लक्षस्य लक्ष्यस्य वेध्यस्य आप्ति प्राप्तिः **अभवत् तद्यशः** तेषां शत्रूणां यशः कीर्तिः **लब्धः** प्राप्तम्। **तेन** राज्ञा शृङ्गारशेखरेण **क्षमा** क्षान्तिः मुक्ता परित्यक्ता **त्वरितम्** शीघ्रमेव **अरिबलैः** शत्रुसैन्यैः **उत्तमाङ्गैः** मस्तकैः **प्रतिष्ठा** स्वस्थितिः कबन्धेन संयोजनं **मुक्ता** परित्यता कबन्धात् पृथगभवदिति भावः। **द्वेषिसैन्यैः** शत्रुबलैः **पञ्चत्वं** मृत्युं **गतं** प्राप्तम्। एवं **सः अवनिपतिः** राजा शृङ्गारशेखरः **सङ्ख्यान्तरं** अन्यं युद्धं **न आप** न प्राप्तवान् अन्येषां योद्धानामभावात्। अत्रासङ्गतिरलङ्कारः। तल्लक्षणं यथा–विरुद्धं भिन्नदेशत्वं कार्यहेतोरसङ्गतिः। स्रग्धरा छन्दः। तल्लक्षणं यथा–भ्रम्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयम्।

**(नगरव्यवस्थावर्णनम्)**

**यत्र राजनि राजनीतिचतुरे, चतुरम्बुधिमेखलां शासति वसुमतीम्पितृकार्येषु वृषोत्सर्गः, शशिनः कन्यातुलारोहणम्, योगेषु शूलव्याघातचिन्ता, दक्षिण-वामकरणं दिङ्निश्चयेषु, दानच्छेदः करिकपोलेषु, शरभेदो दधिषु, शृङ्खलाबन्धो वर्णग्रथनासु, उत्प्रेक्षाक्षेपः काव्यालङ्कारेषु, लक्षदानच्युतिः सायकानां, क्विपां सर्वविनाशः, कोषसङ्कोचः कमलाकरेषु, न जनेषु....।**

**संस्कृतव्याख्या**–**यत्र** यस्मिन्नगरे **चतुरम्बुधिमुखलां** चत्वारः अम्बुधयः समुद्राः एव मेखला काञ्ची यस्याः तादृशीं चतुःसमुद्रपर्यन्तामित्यर्थः, **वसुमतीं** पृथ्वीं **राजनीतिचतुरे** राजनीतिकुशले **राजनि** नृपतौ शृङ्गारशेखरे **शासति**

परिपालयति सति तस्य शासने इत्यर्थः। अनेन प्रकारेण व्यवस्थितम् आसीत् इति सम्बन्धः। **पितृकार्येषु** पितृविषयककर्मसु **वृषोत्सर्गः** वृषस्य वृषभस्य उत्सर्गः मोचनं स्वातन्त्रेण विचरणाय परित्यागः, न तु जनेषु वृषस्य धर्मस्य उत्सर्गः अतिक्रमणमासीत्। **शशिनः** चन्द्रमसः **कन्यातुलारोहणं** कन्या तुला च राशिद्वयं तयोः आरोहण गमनं सङ्क्रमणमिति यावत्, जनेषु कन्यानां कुमारीणां तुलारोहणं घटारोहणं कन्याविषये तुलारोहणं नासीत् अथवा कन्यारोहणं कन्यासङ्गमनं तुलारोहणं दण्डेन तुलारोहणरूपं दण्डविशेषः नासीत्। **योगेषु** योगविषयककर्मसु **शूलव्याघातचिन्ता** शूलव्याघातौ तन्नामकौ योगविशेषौ तयो चिन्ता चिन्तनम्, न तु जनेषु महापराधाभावात् शूलेन शूलायुधारोहणेन व्याघातस्य व्यापादनस्य चिन्ता आसीत्। **दिङ्निश्चयेषु** दिशां निर्धारणेषु **दक्षिणवामकरणं** एषा दक्षिणा एषा वामा उत्तरा इति। विभाजनम्, न तु जनेषु दक्षिणानां सज्जनानां वामकरणं विरुद्धाचरणम् अथवा दक्षिणस्य वामस्य च हस्तादिकस्य अङ्गविशेषस्य दण्डरूपेण करणं कर्त्तनम् आसीत्। **करिकपोलेषु** हस्तिगण्डमण्डलेषु **दानच्छेदः** दानस्य मदजलस्य छेदः अभावः, न तु जनेषु दानस्य धनप्रदानस्य छेदः परित्यागः आसीत्। **दधिषु शरभेदः** शरस्य दध्यग्रस्य भेदः मथनम्, जनेषु शरेण बाणेन भेदः हननम् न आसीत्। **वर्णग्रन्थनासु** वर्णरचनासु पद्यरचनासु वा **शृङ्खलाबन्धः** तन्नामकः काव्यशास्त्रप्रसिद्धः वर्णावृत्तिरूपः रचनाविशेषः, न तु जनेषु शृङ्खलया निगडेन बन्धः बन्धनम् आसीत्। **काव्यालङ्कारेषु** काव्येषु प्रतिपादिता ये अलङ्काराः तेषु उत्प्रेक्षाक्षेपः उत्प्रेक्षा आक्षेपश्च तन्नामकम् अलङ्कारविशेषद्वयम्, न तु जनेषु उत्प्रेक्षया अनवधानतया आक्षेपः निन्दा आसीत्। **सायकानां** बाणानां **लक्षदानचुतिः** लक्षस्य दानं खण्डनं मारणं वा तस्मात् च्युतिः भ्रंशः, न तु जनेषु लक्षस्य लक्षसङ्ख्यापरिमितस्य धनस्य दाने त्यागे च्युतिः च्यवनम् अभावो वा आसीत्। **क्विपां** क्विप्प्रत्यानां **सर्वविनाशः** सम्पूर्णलोपः न तु जनानां पूर्णरूपेण विनाशः अधोगतिः मरणं वा आसीत्। **कमलाकरेषु** कमलसमूहेषु **कोषसङ्कोचः** कोशानां कुड्मलानां सङ्कोचः सङ्कोचनम्, **न** तु जनेषु प्रजासु कोशस्य धनराशेः सङ्कोचः स्वल्पीभावः आसीत्। अत्र सर्वत्र परिसङ्ख्यालङ्कारः। तल्लक्षणं यथा–'प्रश्नादप्रश्नतो वापि कथिताद्वस्तुनो भवेत्। तादृगन्यव्यपो-हश्चेच्छाब्द आर्थोऽथवा तदा। परिसङ्ख्या---' इति।

**जातिविहीनता मालासु न कुलेषु, शृङ्गारहानिः जरत्करिषु न जनेषु, दुर्वर्णयोगः कटकादिषु न कामिनीकान्तिषु, गान्धारविच्छेदो रागेषु न पौरवनितासु, मूर्च्छाधिगमो गानेषु न प्रजासु, खर्माभावो नीचसेवकेषु न परिजनेषु, मलिनाम्बरत्वं निशासु न जनेषु, चलरागता गीतेषु न विदग्धेषु, वृषहानिः निधुवनलीलासु न पौरेषु, भङ्गुरत्वं रागविकृतिषु न चित्तेषु, अनङ्गता कामदेवे न परिजने, मारागमो यौवनोदयेषु न प्रकृतिषु, द्विजाघातः सुरतेषु न प्रजासु, रसनाबन्धो रतिकलहेषु न दानानुमतिषु, अधररागता तरुणीषु न परिजनेषु, कर्तनमलकेषु न पुरन्ध्रीषु, निस्त्रिंशत्वमसिषु न मनस्सु करवालनाशो योधेषु न जनपदेषु, पुरमेवं व्यवस्थितम्।**

**संस्कृतव्याख्या–मालासु** पुष्पमालासु एव **जातिविहीनता** मालतीपुष्पराहित्यं पक्षे ब्राह्मणत्वाद्यपकर्ष, **न कुलेषु** वंशेषु न आसीत्। **जरत्करिषु** वृद्धहतिषु **शृङ्गारहानिः** शृङ्गारस्य गजभुषणस्य हानिः परिधानाभावः, पक्षे प्रसाधनस्य–शृङ्गाररसस्य वा हानिः शून्यता **न जनेषु** प्रजासु नासीत्। **कटकादिषु** कर्णफुलादिषु अलङ्कारेषु **दुर्वर्णयोगः** दुर्वर्णस्य रजतस्य योगः संसर्गः, पक्षे दुर्वर्णस्य कुत्सिवर्णस्य योगः, न **कामिनीकान्तिषु** रमणीसौन्दर्येषु नासीत्। **रागेषु** गीतस्वरेषु **गान्धारविच्छेदः** गान्धारस्य रागविशेषस्य विच्छेदः अभावः, पक्षे गान्धारस्य सिन्दूरस्य विच्छेदः अभावः **न पौरवनितासु** नागररमणीषु नासीत्। **गानेषु** गीतिषु **मूर्च्छाधिगमः** मूर्च्छायाः स्वरारोहावरोहस्य अधिगमः प्राप्तिः पक्षे मूर्च्छाधिगमः संज्ञाशून्यता, **न प्रजासु** जनेषु नासीत्। **नीचसेवकेषु** निकृष्टभृत्येषु **खर्माभावः** खर्मस्य राजभवनपरम्परायाः अभावः हीनत्वं, पक्षे खर्मस्य पौरुषस्य क्षौमस्य अभावः राहित्यम्, **न परिजनेषु** कुटुम्बजनेषु नासीत्। **निशासु** रात्रिषु **मलिनाम्बरत्वं** मलिनम् अन्धकारयुक्तम् अम्बरं आकाशं यासु ताः मलिनाम्बराः तासां भावः पक्षे मलिनं अम्बरं वस्त्रं येषां तेषां भावः, **न जनेषु** प्रजासु नासीत्। **गीतेषु** गानेषु **चलरागता** चलः कम्पितनामकः स्वरविशेषः रागः येषां तेषां भावः चलरागता, पक्षे अस्थिरानुरागता **न विदग्धेषु** दाक्षिण्यसम्पन्नेषु नासीत्। **निधुवनलीलासु** कामक्रीडासु **वृषहानिः** वीर्यक्षरणं, पक्षे धर्महानिः, **न पौरेषु** पुरनिवासिषु नासीत्। **रागविकृतिषु** मालवादिरागविकारेषु **भङ्गुरत्वं** वक्रगतिविशेषः, पक्षे कौटिल्यम्, न **चित्तेषु** जनानाम् अन्तःकरणेषु नासीत्।

**कामदेवे** पुष्पबाणे **अनङ्गता** शरीररहितता पक्षे अप्रसाधनता अलिङ्गता अपौरुषत्वं वा **न परिजने** परिजनसमूहे नासीत्। **यौवनोदयेषु** यौवनस्य तारुण्यस्य उदयेषु उद्गमेषु **मारागमः** मारस्य कामदेवस्य उदयः प्रादुर्भावः, पक्षे मारस्य शत्रोः उदयः आविर्भावः **न प्रकृतिषु** प्रजासु नासीत्। **सुरतेषु** कामक्रीडासु **द्विजाघातः** द्विजैः दन्तैः आघातः प्रहारः दन्तक्षतः इति भावः, पक्षे द्विजानां ब्राह्मणानां आघातः हननम्, **न प्रजासु** जनेषु नासीत्। **रतिकलहेषु** कामकोपेषु **रसनाबन्धः** रसनयाः कञ्चया बन्धः बन्धनम्, पक्षे रसनायाः जिह्वायाः बन्धः बन्धनं मौनालम्बनम् इत्यर्थः, **न दानानुमतिषु** दानस्य धनवितरणस्य अनुमतिषु स्वीकृतिषु नासीत्। **तरुणीषु** युवतीषु **अधररागता** अधरे ओष्ठो रागता लालिमा यासां ताः तासां भावः अधररागता, पक्षे अधरः निकृष्टः रागः अनुरागः येषां तेषां भावः अनुरागाभावत्वम् इत्यर्थः, **न परिजनेषु** प्रजासु नासीत्। **अलकेषु** केशेषु **कर्तनं** केशच्छेदनं पक्षे अनुरागच्छेदनम् **न पुरन्ध्रीषु** ललनासु नासीत्। **असिषु** खड्गेषु **निस्त्रिंशत्वम्** निर्गताः त्रिंशतोऽङ्गुल्यिभ्यः निस्त्रिंशाः तेषां भावः, पक्षे क्रूरत्वं कृपणत्वञ्च, **न मनस्सु** अन्तःकरणेषु नासीत्। **योधेषु** भटेषु **करवालनाशः** करवालेन खड्गेन नाशः मरणं, पक्षे करस्य राजग्राह्यभागस्य बालानां शिशूनाञ्च नाशः **न जनपदेषु** नगरनिवासिषु नासीत्।

## (अनङ्गवतीवर्णनम्)

**तस्य चाभूदेवंविधस्य राज्ञो महिषी दिग्गजमदरेखेवानन्दितालिगणा, पार्वतीव सुकुमारा चन्द्रलेखालङ्कृता च, वनराजिरिव नवमालिकोद्भासिता सचित्रका च, अप्सरःसंहतिरिव संहतसुकेशी समञ्जुघोषा च, सर्वान्तः-पुरप्रधानभूता अनङ्गवती नाम।**

**संस्कृतव्याख्या**—एवं विधस्य तस्य राज्ञः अनङ्गवती नाम महिषी अभूदित्यन्वयः। **एवंविधस्य** एतादृशस्य **तस्य** पूर्वोक्तस्य राज्ञः नृपतेः शृङ्गारशेखरस्य **दिग्गजमदरेखा इव** दिग्गजानां दिक्कारिणां मदरेखा मदजलपंक्तिः इव **आनन्दितालिगणा** आनन्दितः आह्लादितः आलिगणः सखीसमुदायः यया तादृशी, पक्षे आनन्दितः अलिगणाः भ्रमरराजिः यया तादृशी। **पार्वती इव** शङ्करपत्नी गिरिजा इव **सुकुमारा** सुकोमला, पक्षे कार्तिकेयसहिता **चन्द्रलेखालङ्कृताच** चन्द्रलेखया नखक्षविशेषेण अलङ्कृता सुशोभिता च

पक्षे चन्द्रलेखया चन्द्रकलया सुशोभिता च। **वनराजिः इव** वनपंक्ति इव **नवमालिकोद्भासिता** नवमालिकया नूतनमालया उद्भासिता शोभिता, पक्षे नवमालिकया ज्योत्स्नानामकलताविशेषेण उद्भासिता अलङ्कृता **सचित्रका च** चित्रकेन तिलकेन संहिता च, पक्षे चित्रकेनचित्रकनामकवृक्ष विशेषेण संहिता च। **अप्सरः संहतिः इव** अप्सरः समुदायः इव **संहतसुकेशी** संहताः सुसंश्लिष्टाः केशाः यस्याः तादृशी पक्षद्वये समानम् **समञ्जुघोषा च** मञ्जुघोषेण मधुरध्वनिना सहिता च, पक्षद्वये समानम्। **सर्वान्तःपुरप्रधानभूता** सर्वाषाम् सकलानाम् अन्तःपुरीणां अवरोधजनानं प्रधानभूता प्रमुखभूता **अनङ्गवती नाम** तन्नामिका **महिषी** साम्राज्ञी **अभूता विद्यते।**

**( वासवदत्तावर्णनम् )**

**तयोश्च मध्यमोपान्ते वयसि वर्तमानयोः कथमपि दैववशात्, त्रिभुवनविलोभनीयाकृतिः, पुलोमतनयेवानन्दितसहस्रनेत्रा, मेरुगिरिमेखलेव सुजातरूपा, शरन्निशेव उल्लसत्तारका, सत्परिषदिव अच्छिद्रद्विजपङ्क्तिभूषिता, राक्षसकुललक्ष्मीरिव माल्यवत्सुकेशशोभिता, तनयाऽभूद्वासवदत्ता नाम। अथ सा रावणभुजवन इव उल्लसिगोत्रे, विन्ध्याचल इव मदनालङ्कृते, पारावार इव सञ्जातलावण्ये, नन्दनवन इव सदाकल्पतरुणाभिनन्दिते, पवन इव सुमनोहरे, परिणाममुपयात्यपि यौवने परिणयपराङ्मुखी तस्थौ।**

**संस्कृतव्याख्या–मध्यमोपान्ते** मध्यमस्य मध्यवयसः उपान्ते अन्तिमभागे यौवनावसाने इत्यर्थः **वर्तमानयोः** विद्यमानयोः **तयोः** द्वयोः कथमपि येन केनापि प्रकारेण **दैववशात्** सौभाग्यात् **त्रिभुवनविलोभनीयाकृतिः** त्रिभुवनस्य लोकत्रयस्य विलोभनीया स्पृहणीया आकृतिः आकारः सौन्दर्य यस्याः तादृशीः **पुलोमतनया इव** पुलोमजा इन्द्राणी इव **आनन्दितसहस्रनेत्रा** आनन्दितानि आह्लादितानि प्रहर्षितानि वा पश्यतां सहस्राणि असङ्ख्यानि नेत्राणि अक्षीणि यया तादृशी पक्षे आनन्दितः प्रहर्षितः सहस्रनेत्रः इन्द्रः यया तादृशी। **मेरुगिरिमेखला इव** मेरुगिरेः सुमेरपर्वतस्य मेखला कटकप्रदेशः इव **सुजातरूपा** सुजातं सुसम्पन्नं रूपं सौन्दर्यं यस्याः तादृशी, पक्षे शोभनं जातरूपं सुवर्णं यस्यां तादृशी, **शरन्निशा इव** शरत्कालीनरात्रिः इव **उल्लसत्तारका** उल्लसन्त्यः शोभायमानाः

तारका: कनीनिका यस्यां तादृशी, पक्षे उल्लसितानि सुशोभितानि तारका: नक्षत्राणि यस्यां तादृशी। **सत्परिषत् इव** सत्तां सज्जनानां परिषत् सङ्गोष्ठी इव **अच्छिद्रद्विजपङ्क्तिभूषिता** अच्छिद्रा: विवररहिता या द्विजानां दन्तानां पङ्क्ति तया भूषिता सुशोभिता, पक्षे अच्छिद्राणां दोषरहितानां द्विजानां ब्राह्मणानां पंक्तय: समूह: ताभि: भूषिता। **राक्षसकुललक्ष्मी: इव** राक्षसकुलस्य राक्षसवंशस्य लक्ष्मी इव **माल्यवत्सुकेशशोभिता** मालायै: हितानि माल्यानि पुष्पाणि तै: सुकेशै: शोभनै कुन्तलै: च शोभिता अलङ्कृता, पक्षे माल्यवान् सुकेश: नामक राक्षस: ताभ्यां शोभिता। **वासवदत्ता नाम** तन्नामिका **तनया** कन्या **अभूत्** अभवत्। **अथ** अनन्तरं काले व्यतीते **सा** वासवदत्ता **रावणभुजवने इव** रावणस्य दशग्रीवस्य भुजवनं बाहुसमूहं तस्मिन् इव **उल्लसितगोत्रे** उल्लसितं विकासितं गोत्रं ज्ञानं वा येन तस्मिन् अथवा उल्लसितं गोत्रं कुलं येन तस्मिन्निव, पक्षे उल्लासित: उत्थापित: गोत्र कैलाशपर्वत: येन तादृशे। **विन्ध्याचले** इव विन्ध्यपर्वते इव **मदनालङ्कृते** मदनेन कामेन अलङ्कृते शोभायमाने, पक्षे मदनेन तन्नामकवृक्षेण अलङ्कृते। **पारावारे इव** समुद्रे इव **सञ्जातलावण्ये** सञ्जातं समुत्पन्नं लावण्यं सौन्दर्यं यस्मिन् तादृशे, पक्षे संजातं लावण्यं क्षारत्वं यस्मिन् तादृशे। **नन्दनवने इव** नन्दनकानने इव **सदाकल्पतरुणाभिनन्दिते** सत् उत्तम: आकल्प: वेश: येषां तादृशै: तरुणै: युवकै: अभिनिन्दिते प्रशंसिते, पक्षे सदा निरन्तरं कल्पतरुणा कल्पवृक्षेण अभिनन्दिते शोभासम्पन्ने। **पवने इव** वायौ इव **सुमनोहरे** अत्यन्तरमणीये पक्षे सुमनस: पुष्पाणि हरतीति तादृशे **परिणामं** पूर्णताम् **उपयाति अपि** प्राप्तेऽपि **यौवने** युवावस्थायां **परिणयपराङ्मुखी** परिणये विवाहे पराङ्मुखी विमुखी नि:स्पृहा **तस्थौ** स्थितवती।

### (वसन्तवर्णनम्)

**अथैकदा विजृम्भमाणसहकारकोरकनिकुरम्बनिपतितमधुकरमालामदकलहुङ्कारजनितपथिकजनसञ्ज्वर:, कोमलमलयमारुतोद्धूतचूतप्रसवर-सास्वादकषायकण्ठकलकण्ठकुहूरुतभरितसकलदिङ्मुख:, विकचकमल-षण्डनिलीयमानमत्तहंसकुलकोलाहलमुखरितसकलसरोवर: परभृतखर-नखरत्रोटिकोटिपाटितपाटलीकुड्मलवृन्तविवरविनिर्गतमधुधारासारशी-**

**करनिकरसमालब्धदक्षिणासमीरणमारवारणव्रणितपथिकवधूहृदयतटः मधुमदमुदितकामिनीमुखकमलगण्डूषशीधुसेकपुलकितबकुलः, मदनरसपरवशविलासिनीतुलाकोटिविकटचटुलचरणारविन्दमन्दप्रहारहृष्टकङ्कोलितरुशतः, प्रतिदिशमश्लीलप्रायंवैहासिकगीयमानगीतश्रवणोत्सुकषिङ्गजनसमारब्धचर्चरीतालाकर्णनमुह्यदनेकपथिकः,....।**

**संस्कृतव्याख्या**–अथैकदा वसन्तकाल आजगाम इत्यन्वयः। **अथ** तदनन्तरम् **एकदा** एकस्मिन् काले **विजृम्भमाणसहकारकोरकनिकुरम्बनिपतितमधुकरमालामदकलहुङ्कारजनितपथिकजनसञ्ज्वरः** विजृम्भमाणानां विकसितानां सहकारकोरकाणाम् आम्रकलिकानां निकुरम्बेषु समूहेषु निपतितानाम् इतस्ततः आगत्योपविष्टानां मधुकरमालानां भ्रमरपङ्क्तीनां मदकलेन हर्षातिशयेन यः अव्यक्तमधुरः हुङ्कारध्वनिः तेन जनितः प्रादुर्भूतः यः पथिकजनानां सञ्ज्वरः सन्तापः यस्मिन् तादृशः। **कोमलमलयमारुतोद्धूतचूतप्रसवरसास्वादकषायकलकण्ठकुहुरुतभरितसकलदिङ्मुखः** कोमलेन मन्देन मलयमारुता मलयपवनेन उद्धूतानां प्रकम्पितानां चूतप्रसवानाम् आम्रपुष्पाणां रसस्य परागकणस्य आस्वादेन पानेन कषायः मधुरः कण्ठः ध्वनिः येषां तेषां कलकण्ठानां कोकिलानां कुहूरुतेन कुहुध्वनिना भरितानि पूर्णानि सकलानां सर्वाषां दिशाम् आशानां मुखानि येन यस्मिन् वा तादृशः। **विकचकमलषण्डनिलीयमानमत्तहंसकुलकोलाहलमुखरितसकलसरोवरः** विकचानां विकसितानां कमलानां जलजानां षण्डेषु वनेषु निलीयमानानां समुपविष्टानां मत्तानां मदयुक्तानां कलहंसानां कादम्बकानां कुलस्य समूहस्य कोलाहलेन कलरवेण मुखरिताः ध्वनिताः सकला सर्वे सरोवराः सरांसि यस्मिन् तादृशः। **परभृतखरनखरत्रोटिकोटिपाटितपाटलीकुड्मलवृन्तविवरविनिर्गतमधुधारासारशीकरनिकरसमालब्धदक्षिणसमीरणमारवारणव्रणितपथिकवधूहृदयतटः** परभृतानां कोकिलानां खराः तीक्ष्णाः ये नखराः नखाः त्रोटिः चञ्चुः च येषां कोट्या अग्रभागेन पाटितानां विदारितानां पाटलीकुड्मलानां रक्तवर्णकलिकानां वृन्तयोः विवरात् छिद्रात् विनिर्गतैः निःसृतैः मधुराणां मिष्टानां मधुधारासाराणां परागकणप्रवाहाणां शीकरनिकरैः कणसमूहैः समालब्धः सम्यक् प्रकारेण अनुलिप्तः दक्षिणसमीरणः दक्षिणपवनः सः एव मारवारणः कामगजः तेन व्रणितं क्षतकृतं शूण्डाग्रभागेनाविशीर्णं पथिकवधूनां पान्थरमणीनां

विरहिणीनामित्यर्थः हृदयम् अन्तःकरणम् एव तटं तीरप्रदेशं यस्मिन् तादृशः। **मधुमदमुदितकामिनीमुखकमलगण्डूषशीधुसेकपुलकितवकुलः** मधुनः मद्यस्य मदेन हर्षेण मुदितानाम् आह्लादितानां कामिनीनां रमणीनां मुखकमलानाम् आननारविन्दानां गण्डूषशीधूनां पर्याप्तासवानां पुलकिताः विकसिताः बकुलाः केसरवृक्षाः यस्मिन् तादृशः। **मदनरसपरवशविलासिनीतुलाकोटिविकट-चटुलचरणारविन्दमन्दप्रहारहृष्टकङ्केलितरुशतः** मदनरसेन कामरसेन कामावेशेन वा परवशाः पराधीनाः विलासिन्यः कामिन्यः तासां तुलाकोटिभिः नूपुरैः विकटानि मनोहराणि चटुलानि चपलानि यानि चरणारविन्दानि पादकमलानि तेषां मन्दैः अतिकोमलैः प्रहारैः ताडनैः हृष्टानि विकसितानि तरूणां वृक्षाणां शतानि यस्मिन् तादृशः। **प्रतिदिशम्** परितः **अश्लीलप्रायवैहासिकगीयमानगीत-श्रवणोत्सुषिङ्गजनसमारब्धचर्चरीतालाकर्णनमुह्यदनेकपथिकः** अश्लीलप्रायाणि ग्राम्योक्तिबहुलानि यानि वैहासिकैः विदूषकैः गीयमानानि गीतानि तेषां श्रवणे रुतिगोचरीकरणे उत्सुकैः उत्कण्ठितैः षिङ्गजनैः विटैः समारब्धस्य प्रारम्भीकृतस्य चर्चरीतालस्य तन्नामकतालविशेषस्य आकर्णनेन श्रवणेन मुह्यन्तः मूर्च्छां लाब्धमाणाः अनेके पथिकाः पान्थाः यस्मिन् तादृशः वसन्तः आजगाम......।

**दुर्जन इव सतामरसः, दुष्कुल इव जातिहीनः, रावण इवापीतलोहित पलाशशतसेवितः, महाश्रृङ्गारीव सुगन्धवहः, सुराजेव समृद्धकुवलयः, वास्तुक इव विवर्धितसुखाशः, सत्कविकाव्यबन्ध इव अनवद्धतुहिनपातः, सत्पुरुष इव दोषानुबन्धरहितः, कैवर्त्त इव बद्धराजीवोत्पलसालः, समृद्धकासारशकुनिसार्थ इव निन्दितमरुबकः, शुक्र इवेन्द्राणीरुचिरः, महावीर इवाधरीकृतदमनकः षिङ्ग इवाम्लानसुभगो वसन्तकाल आजगाम।**

**संस्कृतव्याख्या**—सः वसन्तकालः **दुर्जनः इव** असज्जनः इव **सतामरसः** तामरसैः कमलैः सहितः, पक्षे सतां सज्जनानाम् अरसः अहृद्यः। दुष्कुलः इव= दुष्टं कुलं यस्य तादृशः इव **जातिहीनः** जात्याः हीनः च्युतः, पक्षे जातिभिः मालतीपुष्पैः हीनः **रावण इव** दशाननः इव **आपीतलोहितपलाशशतसेवितः** आपीतानाम् ईषद्गौरवर्णानां पिङ्गलवर्णानां लोहितानां ईषद्रक्तवर्णानां पलाशानां किंशुकवृक्षाणां शतैः सेवितः सम्पन्नः पक्षे पलं मांसम् अश्नन्ति भक्षयन्तीति

पलाशाः राक्षसाः पले मांसे आशा इच्छा यस्य वा, आपीतं सम्यग्रूपेण पानं कृतं रुधिरं यैः हृते आपीतलोहिताः तेषां पलाशानां राक्षसानां शतैः सेवितः सम्पन्नः **महाशृङ्गारी इव** महाप्रसाधकः इव **सुगन्धवहः** सुगन्धं सुरभितं विविधपुष्पसमन्वितं वहति चलतीति तादृशः पक्षद्वयेऽर्थोऽयं समानम्। **सुराजा इव** शोभनः प्रशस्तः राजा नृपतिः तादृशः **समृद्धकुवलयः** समृद्धानि पूर्णतां प्राप्तानि प्रचुराणि वा कुवलयानि कुमुदानि यस्मिन् तादृशः, पक्षे समृद्धं धनादिसम्पूर्णं कोः भूम्याः वलयं मण्डलं यस्मिन् तादृशः **वास्तुकः इव** ऋतुविज्ञाता इव **विवर्धितसुखाशः** विवर्धिता वृद्धिम् आनीता सुखस्य शीतोष्णजनितदुःखराहित्यस्य आशा येन तादृशः अथवा विवर्धिता सुखानां पुण्यात्मनाम् आशा सुखाभिलाषः वा येन तादृशः (पक्षद्वयेऽर्थोऽयं समानः)। **सत्कविकाव्यबन्धः इव** सत्कवेः महाकवेः काव्यबन्धः काव्यसौन्दर्यः काव्यरचनापद्धतिः वा तादृशः **अनवद्धतुहिनिपातः** अनवद्धः न प्रतिहतः तुहिनस्य चन्द्रस्य पातः पतनं प्रकाशः इत्यर्थः, यस्मिन् तादृशः पक्षे तु हि 'न' अनवद्धाः अप्रयुक्ताः पादपूरणार्थं प्रयुक्ता निरर्थकाः निपाताः निपातसंज्ञकपदाः यस्मिन् तादृशः। **सत्पुरुषः इव** सज्जनः इव **दोषानुबन्धरहितः** दोषायाः रात्रेः अनुबन्धेन अनुगमनेन दैर्ध्येण इत्यर्थः रहित विहीनः, पक्षे दोषाणाम् अवगुणानाम् अनुबन्धेन सम्बन्धेन रहितः निर्दोषः इति भावः। **कैवर्तः इव** धीवरः इव **बद्धराजीवोत्पलसालः** बद्धानि प्राप्तानि विकसितानि वा उत्पलानि कमलानि सालानि पुष्पविशेषाणि यस्मिन् तादृशः, पक्षे बद्धाः जालेन गृहीताः राजीवाः उत्पलाः सालाः च तत्तन्नाममत्स्यविशेषाः येन तादृशः **समृद्धकासारशकुनिसार्थः इव** समृद्धे जलपूर्णे कासारे सरोवरे ये शकुनयः पक्षिणः तेषां सार्थः समूहः इव **निन्दितमरुवकः** निन्दितः तिरस्कृतः मरुवकः सुगन्धोषधिविशेषः येन तादृशः, पक्षे निन्दिताः उपहासिताः मरौ मरुभूमौ स्थिताः वकाः तन्नामकपक्षिविशेषाः येन तादृशः। **शुक्रः इव** इन्द्रः इव **इन्द्राणीरुचिरः** इन्द्राण्या तन्नामकलताविशेषया रुचिरः मनोहरः, पक्षे इन्द्राणी पुलोमजा इन्द्रपत्नी तस्यै रुचिरः प्रियः। **महावीरः इव** महद्बलसम्पन्नः इव **अधरीकृतदमनकः** अधरीकृतः दमनकः कुन्दवृक्षः तत्पुष्पमित्यर्थः येन तादृशः, पक्षे अधरीकृताः तिरस्कृताः पराजिताः वा दमनकाः शत्रुवीराः येन तादृशः। **षिङ्गः इव** कामुकः इव **अम्लानसुभगः** अम्लानैः तन्नामकैः ओषधिविशेषैः सुभगः मनोहरः, पक्षे अम्लानः नित्यप्रसन्नः सुभगः मनोहरः

सौभाग्यवान् अथवा अम्लानां नित्योज्ज्वलानां गणिकानां सुभगः मनोहरः। **वसन्तकालः** वसन्तर्तुः **आजगाम** आगतः।

**अतिदूरप्रवृद्धेन मधुना जगति न को वा न विक्रियते, यदतिमुक्तको मुनिरपि विचकास। कुसुमशरस्य नवचूतप्रसवशरमूले निलीयमानामधुकरावलिर्नामाक्षरपङ्क्तिरिव रेजे। वृन्तविनिर्गतविकच विचिकिलकलिकाविवरेमञ्जुगुञ्जन्मधुकरो मकरकेतोस्त्रिभुवनविजय-प्रयाणशङ्खध्वनिमिव चकार। नवयावकपङ्कपल्लवितसनूपुरतरुणी-चरणप्रहारानुरागवशान्नवकिसलयच्छलेन तमिव रागमुद्वहदशोकः, मधुरमधुपरिपूरितकामिनीमुखकमलगण्डूषसेकादिव तद्रसगन्धमात्मकुसुमेषु बिभ्रद्बकुलतरू रराज।**

**संस्कृतव्याख्या—अतिदूरप्रवृद्धेन** अत्यन्तं प्रवृद्धेन वृद्धिं प्राप्तेन **मधुना** वसन्तेन **जगति** चराचरे **को वा न** कः जनः न विद्यते यः **न विक्रियते** विकारं स्वरूपमन्यथाभावं न प्राप्नोति, सर्वे चित्तविकारमाप्नुवन्तीत्यर्थः। **यत्** यतः **अतिमुक्तकः** अत्यन्तं जीवन्मुक्तः **अपि मुनिः** तपस्यारतः यतिः **विचकास** विषयभोगोत्कण्ठारूपं मनोविकारम् अलभत्। **नवचूतप्रसवशरमूले** नवः नूतनः यः चूतप्रसवः आम्रपुष्पं सः एव शरः बाणः कामस्येति योजनीयं तस्य मूले मूलस्थाने **निलीययमाना** प्रविशन्ती मधुकरावलिः मधुकराणां भ्रमणानां अवलिः पङ्क्तिः **कुसुमशरस्य** कामदेवस्य **नामाक्षरपंक्तिः इव** कामाभिधेयप्रतिपादकवर्णापनां श्रेणिः इव **रेजे** सुशुभे। **वृन्तविनिर्गतविकचवि-चिकिलकलिकाविवरे** वृन्तात् प्रसवबन्धनात् विनिर्गता बहिर्निष्क्रान्ताः विकचाः ईषन्मात्रविकसिताः विचिकिलकलिकाः मल्लीनामकवृक्षकोरकाः तासां विवरे छिद्रे मञ्जुगुञ्जन् मञ्जु मधुरं गुञ्जन् ध्वनिमानः मधुकरः भ्रमरः **मकरकेतोः** कामदेवस्य **त्रिभुवनविजयप्रयाणशङ्खध्वनिः इव** त्रिभुवनस्य लोकत्रयस्य विजयाय वशीकरणाय यत्प्रयाणं प्रस्थानं तस्य सूचकः यः शङ्खध्वनिः कम्बुरवः तं **चकार** कृतवान्। **अशोकः** तन्नामकवृक्षः **नवयावकपङ्कपल्लवितसनूपुरतरुणीचरणप्रहारानुरागवशात्** नवेन नूतनेन यावकपङ्केन लाक्षारसेन पल्लविताः रक्तीभूताः सनूपुराः समञ्जीराः ये तरुणीचरणाः कामिनीपादाः तेषां प्रहाराय ताडनाय यो अनुरागः स्नेहः तस्य

वशात् कारणात् **नवकिसलयच्छलेन** नूतनपल्लवव्याजेन **तं रागं** रक्तिम्नम् **उद्वहत्** इव धारयत् इव। **मधुरमधुपरिपूरितकामिनीमुखकमलगण्डूषसेकात्** इव मधुरेण सुस्वादुयुक्तेन मधुना मदिरया परिपूरित पूर्णरूपेण भरितं यत्कामिनीनां रमणीनां मुखकमलं मुखारविन्दं तस्य गण्डूषः मुखपरिपूरितं मधुः तस्य सेकात् सिञ्चनात् इव, **तत्सगन्धं** तस्य मधुरसस्य गन्धम् **आत्मकुसुमेषु स्वपुष्पेषु विभ्रद्वकुलः** विभ्रन् धारयन् वकुलः केसरवृक्षः **रराज** शुशुभे।

**अन्तरान्तरानिपतितमधुकरनिकरकिर्मीरः कङ्केलिगुच्छोऽर्धनिर्वाण-मनोभवचिताचक्रानुकारी पथिकजनहृदयदाहमुवाह। विकचविचिकिल-राजिरलिकुलशबला कलितेन्द्रनीला मुक्तावलीव मधुश्रियो रुरुचे। विरहिणां हृदयमथनाय कुसुमशरस्य शरशाणचक्रमिव नागकेसरकुसुममशोभत। पथिकजनहृदयमत्स्यं ग्रहीतुं मकरकेतोः पलाव पाटलिपुष्पमदृश्यत्।**

**संस्कृतव्याख्या–अन्तरान्तरा** मध्येमध्ये **निपतितमधुकरनिकरकिर्मीरः** निपतितानां उत्प्लवमानानां मधुकराणां भ्रमराणां निकरेण समूहेन किर्मीरः कर्बुरितः **कङ्केलिगुच्छः** अशोकवृक्षस्तबकः **अर्धनिर्वाणमनोभवचिता-चक्रानुकारी** अर्धनिर्वाणम् अर्धदग्धोपशान्तं मनोभवस्य कामदेवस्य चिताचक्रं वर्तुलाकाररचितं तदनुकर्तुं शीलं यस्य तादृशः **पक्षिकजनहृदयदाहम्** पथिकजनानां प्रियावियुक्तपान्थानां हृदयदाहं मनःसन्तापम् **उवाह** चकार। **विकचविचिकिलराजिः** विकचानां विकसितानां विचिकिलानां तन्नामकपुष्पविशेषाणां राजिः पङ्क्तिः **मधुश्रियः** वसन्तलक्ष्म्याः **कलितेन्द्रनीला** इन्द्रनीलमणिजटिता **मुक्तावली इव** मौक्तिकमाला इव **रुरुचे** शुशुभे। **नागकेसरकुसुमं** नागकेसरपुष्पं **विरहिणां** वियोगिजनानां **हृदयमथनाय** हृदयस्य अन्तःकरणस्य मथनाय विलोडनाय सन्तापाय इत्यर्थः **कुसुमशरस्य** कामदेवस्य **शरशाणचक्रम् इव** शरस्य बाणस्य शाणचक्रम् उत्तेजनाय घर्षण-प्रस्तरखण्डम् इव **अशोभत्** सुशोभितम् अभवत्। **पाटलिपुष्पं** पाटलिकुसुमं **पक्षिकजनहृदयमत्स्यं** पथिकजनानां वियुक्तलोकानां हृदयम् एव मत्स्यः मीनः तं **ग्रहीतुं** वशीकर्तुं **मकरकेतोः** कामदेवस्य **पुलावः इव** मत्स्यग्रहणाय बडिशः इव **अदृश्यत्** दृश्यमानमभवत्।

### ( मलयमारुतवर्णनम् )

**कन्दर्पकेलिसम्पल्लम्पटलाटीललाटतटलुलितालकधम्मिल्लभारब-कुलकुसुमपरिमलमेलनसमृद्धमधुरिमगुणः, कामकलाकलापकुशलचारु-कर्णाटसुन्दरीस्तनकलशघुसृणधूलिपटलपरिमलामोदवाही, रणरणकरसि-तापरान्तकान्ताकुन्तलोल्ललनसङ्क्रान्तपरिमलमिलितालिमालामधुरतरझ-ङ्काररवमुखरितनभःस्थलः, नवयौवनरागतरलकेरलीकपोलपालिपद्मावलीप-रिचयचतुरः, चतुःषष्टिकलाकलापविदग्धमुग्धमालवनितम्बिनीनितम्बबि-म्बसंवाहनकुशलः, सुरतश्रमपरवशान्ध्रपुरन्ध्रीनीरन्ध्रपीनपयोधरभारनिदाघ-जलकणनिकरशिशिरितोमलयमारुतो ववौ।**

**संस्कृतव्याख्या**—तदा मलयमारुतः बवौ इत्यन्वयः। इतः परं वसन्तकालस्य मलयपवनं वर्णयति **कन्दर्पेति। कन्दर्पकेलिसम्पल्लम्पटलाटीललाटतटलुलि-तालकधम्मिल्लभारबकुलकुसुमपरिमलमेलनसमृद्धमधुरिमगुणः** कन्दर्पस्य कामस्य केलिसम्पदि क्रीडाविलासे रतिकार्ये इत्यर्थः, सम्पदाः संसक्ताः या लाट्यः लाटप्रदेशयुवतयः तासां ललाटतटे मस्तकपटले लुलिता प्रसृताः लम्बमाना इत्यर्थः, ये अलकाः चूर्णकेशाः तेषां धम्मिल्लभारे बद्धालकसमूहे ग्रथितानि यानि बकुलकुसुमानि केसरपुष्पाणि तेषां परिमलस्य सुगन्धस्य मेलनेन संसर्गेण समृद्धः अभिबद्धः मधुरिमगुणः मनोहरः गुणः यस्य तादृशः। **कामकलाकलापकुशलचारुकर्णाटकसुन्दरीस्तनकलशघुसृ-णधूलिपटलपरिमलामोदवाही** कामकलाकलापे कामकलानां कामसम्बन्धिकलानां कलापे समूहे कुशलाः चतुराः चार्व्यः सौन्दर्यसम्पन्नाः च याः कर्णाटसुन्दर्यः कर्णाटकप्रदेशरमण्यः तासां स्तनकलशेषु पयोधरकुम्भेषु पीनकुचेष्वित्यर्थः यत् घुसृणस्य कुङ्कमस्य धूलिपटलं कणसमूहः तस्य परिमलेन सुगन्धेन यः आमोदः अत्यन्तमनोहरः गन्धः तं वोढुं शीलं यस्य तादृशः **रणरणकरसिता-परान्तकान्ताकुन्तलोल्ललनसङ्क्रान्तपरिमलमिलितालिमालामधुरतरझ-ङ्काररवमुखरितनभःस्थलः** रणरणकेन सुरते औत्सुक्येन रसिताः उत्पन्नानुरागाः याः अपरान्तकान्ताः पाश्चात्यललनाः तासां कुन्तलानां अलकानाम् उल्ललनेन आन्दोलनेन सङ्क्रान्तः स्वस्मिन्नागतः यः परिमलं सुगन्धः तेन मिलितायाः सम्पृक्तायाः अलिमालायाः भ्रमरपङ्क्तेः मधुरतरेण अत्यन्तमनोहरेण झङ्काररवेण गुञ्जारध्वनिना मुखरितं ध्वनितं नभःस्थलम् आकाशमण्डलं येन तादृशः।

**नवयौवनरागतरलकेरलीकपोलपालिपद्मावलीपरिचयचतुरः** नवयौवनं नवतारुण्यं तेन रागतरलाः अनुरागचपलाः याः केरल्यः केरलप्रान्तरमण्यः तासां कपोलपालौ गण्डपटले या पद्मावली पत्राङ्कुरः तस्याः परिचये सम्बन्धे निर्माणे वा चतुरः कुशलः। **चतु:षष्ठिकलाकलापविदग्धमुग्धमालवनितम्बिनीनितम्बबिम्बसंवाहनकुशलः** चतु:षष्ठिकलानां गीतवाद्यादीनां कामशास्त्रप्रतिपादितानां कलानां कलापे विदग्धानां कुशलानां मुग्धानां मनोहराणां मालवनितम्बिनीनां मालवप्रदेशयुवतीनां नितम्बबिम्बस्य श्रोणिमण्डलस्य संवाहने मन्दमन्दतया मर्दने कुशलः निपुणः। **सुरतश्रमपरवशान्ध्रपुरन्ध्रीनीरन्ध्रपीनपयोधरभारनिदाघजलकणनिकरशिशिरितः** सुरतश्रमेण कामक्रीडापरिश्रमेण परवशानां खिन्नानाम् आन्ध्रपुरन्ध्रीणाम् आन्ध्रप्रदेशरमणीनां नीरन्ध्रयोः निविडयोः पीनयोः विशालयोः पयोधरयोः कुचयोः भारे गुरत्वेनिदाघजलस्य धर्मजलस्य कणनिकरेण बिन्दुसमूहेन शिशिरितः शीतलीकृतः **मलयमारुतः** मलयपवनः **ववौ**ः अवहत्।

## ( स्वयंवरवर्णनम्–तत्र मञ्चवर्णनम् )

**अत्रान्तरे वासवदत्तासखीजनाद्विदितसुताभिप्रायः शृङ्गारशेखरः स्वसुतायाः स्वयंवरार्थमशेषधरणितलभाजां राजपुत्राणामेकत्र मेलनमकरोत्। ततो दग्धकृष्णगुरुपरिमलामोदमोहितमधुव्रतव्रातबहुलगुमगुमायितमुखरितम्, अतिरभसहासच्छटादीधितिधवलिमपरिमिलितम्, अनेकपरिहासकथाकलापविदग्धशृङ्गारमयजननिचयसमाकुलम्, दह्यमानमहिषाक्षादिसुगन्धिद्रव्यसौरभाकृष्टपुरोपवनषट्पदकुलसमाकुलम्, अर्जुनसमरमिव नन्दिघोषमुखरितदिगन्तरम्, नृपास्थानमिव सराजोपहारम्, तापसाश्रममिव वितानोद्भासितम्, त्रिविष्टपमिव सुमनोऽलंकृतं मञ्चमारुरोह वरारोहा वासवदत्ता।**

**संस्कृतव्याख्या–अत्रान्तरम्** अस्मिन्नेव वसन्तकाले **वासवदत्तासखीजनात्** वासवदत्तायाः सखीजनात् सखीलोकात्। **विदितसुताभिप्रायः** विदितः ज्ञातः सुतायाः कन्यायाः अभिप्रायः अभिलाषः येन तादृशः **शृङ्गारशेखरः** तन्नामकः राजा **स्वसुतायाः** स्वकीयायाः सुतायाः कन्यायाः **स्वयंवरार्थं** स्वयंपतिचयनार्थम् **अशेषधरणितलभाजाम्** अशेषाणां सकलानां

धरणितलभाजां भूमण्डलानां **राजपुत्राणां** राजकुमाराणाम् **एकत्र** एकस्मिन्स्थाने **मेलनं** सम्मेलनम् **अकरोत्** अकारयत्। ततः वासवदत्ता मञ्चम् आरुरोह इत्यन्वयः। अतः परं मञ्चं वर्णयति **दग्धेति। ततः** तदनन्तरं **दग्धकृष्णागुरु-परिमलामोदमोहितमधुव्रतव्रातबहुलगुमगुमायितमुखरितं** दग्धस्य धूपितस्य कृष्णागुरोः कालागुरोः परिमलामोदेन सुगन्धानुभवेन मोहितानां मुग्धानां मधुव्रतानां भ्रमराणां व्रातेन समूहेन बहुलेन प्रचुरेण गुमगुमायितेन गुञ्जारेण मुखरितं गुञ्जरितं ध्वनिमानम् **अतिरभससहासच्छटादीधितिधवलिमपरिमिलितम्** अतिरभसेन अतिवेगेन अतिहर्षेण वा हासस्य दीधितिच्छयाः किरणसमूहस्य धवलिम्ना शुभ्रत्वेन परिमिलितं समन्वितम्। **अनेकपरिहासकथाकलाप-विदग्धशृङ्गारमयजननिचयसमाकुलम्** अनेकेषां बहुविधानां परिहासकथानां विनोदाख्यानानां आलापे कथने विदग्धाः कुशलाः ये शृङ्गारमयाः शृङ्गारप्रचुराः रसिकाः जनाः तेषां निचयेन समूहेन समाकुलं परिव्याप्तम्। **दह्यमानमहिषाक्षा-दिसुगन्धितद्रव्यसौरभाकृष्टपुरोपवनषट्पदकुलसमाकुलम्** दह्यमानानि धूपितानि यानि महिषाक्षादीनि गुग्गुलेत्यादीनि सुगन्धितद्रव्याणि सुगन्धयुक्तवस्तूनि तेषां सौरभेण सुगन्धेन आकृष्टाः आकर्षिताः ये पुरोपवनषट्पदाः नगरोद्यानभ्रमराः तेषां कुलेन वृन्देन समाकुलं परिव्याप्तम्। **अर्जुनसमरम् इव** अर्जुनस्य युधिष्ठिरानुजस्य समरं युद्धम् इव **नन्दिघोषमुखरितदिगन्तरं** नन्दिघोषेण वाद्यादीनाम् आनन्दजनकध्वनिना पादसञ्चरणध्वनिना वा मुखरितं ध्वनितं दिगन्तरं यस्य तादृशम् पक्षे नन्दः तन्नामकः अर्जुनरथः तस्य घोषेण ध्वनिना मुखरितदिगन्तरम्। **नृपास्थानम्** इव = राजभवनम् इव **सराजोपहारं** राज्ञाम् उपहारेण उपायनेन सहितं, पक्ष द्वयेऽर्थोऽयम्। **तापसाश्रमम् इव** तापसानां आश्रमम् उटजम् इव **वितानोद्भासितं** वितानेन उल्लोचनेन उद्भासितं शोभमानम्, पक्षे वितानैः यज्ञैः उद्भासितम् शोभितम्। **त्रिविष्टपम् इव** स्वर्गम् इव **सुमनोऽलङ्कृतम्** सुमनैः पुष्पैः अलङ्कृतं शोभायमाम्, पक्षे सुमनैः देवैः अलङ्कृतम्। एतादृशं **मञ्चं** पर्यङ्कं **वरारोहा** वराभिलाषिणी **वासवदत्ता आरुरोह** आरोहयत्।

**( स्वयंवरागतराजकुमारवर्णनम् )**

**तत्र च केचित् कलाङ्कुरा इव विदितनगरमण्डनाः, अपरे पाण्डवा इव दिव्यचक्षुः कृष्णागुरुपरिमिलिताः, अन्ये शरद्दिवसा इव दूरप्रवृद्धाशाः, इतरे प्रहर्तुमुद्यता इव स्वबलार्थिनः, केचिद् व्याधा इव शकुनश्रावकाः, केचिदाखेटासक्ता इव रूपानुसारप्रवृत्ताः, केचिज्जैमिनिमतानुसारिण इव तथागतमतध्वंसिनः, केचित्खञ्जना इव सांवत्सरफलदर्शिनः, केचित्सुमेरुपरिसरा इव कार्तस्वरमयाः, केचित्कुमुदाकरा इव भास्वद्दर्शननिमीलिताः, केचिद्धार्तराष्ट्रा इव विश्वरूपावलोकनजनि तेन्द्रजालाद्भुतप्रत्ययाः। केचिदात्मनि वारणबुद्ध्या बलवन्तोऽपि सुवाहाः केचित्पाणिग्रहणार्थिनोऽप्यसुकरं मन्यमानाः, केचिदधरीकृता अपि स्थिराः, केचित्पाण्डुपुत्रा इवाक्षहृदयाज्ञानहृतक्षमाः, केचिद् बृहत्कथानुबन्धिन इव गुणाढ्याः, केचित्तिर्यग्गतय इव सुगन्धवाहाः, केचित्कौरवसैनिका इव द्रोणाशासूचकाः, केचित्कुमुदाकरा इवासोढशूरभासः। सा च क्षणेनैकेशः समवलोक्य विरक्तहृदया सती तस्मात्कर्णीरथादवततार।**

**संस्कृतव्याख्या–तत्र** तस्मिन् स्वयंवरमण्डपे **केचित्** राजकुमाराः **कुलाङ्कुरा इव** कुलाङ्कुरः चौरशास्त्रप्रवर्तकः मूलदेवः यद्वा उपमानुरोधाद्बहुवचनं कुलाङ्कुराः चौराः तद्वत्। **विदितनगरमण्डनाः** विदितानि ज्ञातानि धारितानि इत्यर्थं नगरमण्डनानि नागरिकभूषणानि यैः तादृशाः उचितालङ्कारधारिणः इत्यर्थः, पक्षे विदिताः ज्ञाताः नगरमण्डनाः गणिकाः यैः तादृशाः। **अपरे** केचित् **पाण्डवाः इव** पाण्डुपुत्राः इव **दिव्यचक्षुः कृष्णागुरुपरिमिलिताः** दिव्यचक्षुः सुगन्धविशेषः कृष्णागुरुः अगुरुविशेषः तयोः सुगन्धेन परिमिलिताः सुगन्धिताः समन्विता वा अथवा दिव्ये सौन्दर्यसम्पन्ने चक्षुषी नेत्रे येषां ते सुलोचनाः कृष्णागुरुपरिमिलि–ताश्च इति कर्मधारयः, पक्षे दिव्यचक्षुः धृतराष्ट्रः ज्ञानवान् कृष्णः वा कृष्णा द्रौपदी गुरवः भीष्मादयः गुरुः द्रोणाचार्यः वा एतैः परिमिलिताः समन्विताः **अन्येः** अपरे राजकुमाराः **शरद्दिवसाः इव** शरद्दिवसानि शरत्कालीनानि दिनानि इव **दूरप्रवृद्धाशाः** दूरम् अत्यधिकं प्रवृद्धाः वृद्धिं प्राप्ता आशाः वासवदत्ताप्राप्त्याकांक्षा येषां तादृशाः, पक्षे दूरं प्रवृद्धाः प्रसृताः मेघाच्छादननिरासेन सुदूरविस्तृताः इव दृश्यमानाः आशाः दिशः येषां तादृशाः। **इतरे** अन्ये राजकुमाराः

**प्रहर्तुम् उद्यताः इव** प्रहारं कर्तुं तत्पराः इव **स्वबलार्थिनः** शोभना अबला रमणी वासवदत्ता तदर्थिनः प्राप्तिकामः, पक्षे स्वस्य बलं शक्तिः सैन्यं वा तदर्थिनः। **केचित्** राजकुमाराः **व्याधाः इव** पक्षिजीवकाः इव **शकुनश्रावकाः** शकुनम् उत्सवादिषु मगलार्थं गीयमानं गीतविशेषं शृण्वन्तीति तादृशाः अथवा शकुनं शुभनिमित्तं शृण्वन्तीति तादृशाः, पक्षे शकुनान् पक्षिणः शब्दान् शृण्वन्तीति तादृशाः। **केचित्** अन्ये राजकुमाराः **आखेटासक्ताः इव** आखेटे मृगयायाम् आसक्ताः अनुरक्ताः इव **रूपानुसारप्रवृत्तः** रूपस्य सौन्दर्यस्य अनुसारेण अनुकूलेन प्रवृत्ताः, स्वयंवरार्थमागताः वासवदत्तालावण्याधिक्येन तत्पाणिग्रहणाय आगता इत्यर्थः अथवा रूपानुसारे सौन्दर्यादरे प्रवृत्ताः रूपवद्वस्त्वपेक्षमाणाः, पक्षे रूपानुसारे मृगानुधावने प्रवृत्ताः संलग्नाः। **केचित्** अन्ये जैमिनिमतानुसारिणः इव जैमिनिमतानुयायिनः मीमांसाशास्त्रानुयायिनः इव **तथागतमलध्वंसिनः** तथा तेन प्रकारेण स्ववेषादितुल्यं वेषादिकं धारयित्वेत्यर्थः आगतान् स्वयंवरे समुपस्थितान् राजकुमारान् ध्वंसयन्ति उपहसन्ति इति तादृशाः, पक्षे तथागतस्य बुद्धस्य मतध्वंसिनः मतखण्डकाः **केचित्** अपरे **खञ्जनाः इव** खञ्जननामकपक्षिविशेषाः इव **सांवत्सरफलदर्शिनः** सावंत्सरिकाणां ज्योतिषिकानां सूच्यमानं फलं परिणामं पश्यन्तीति समालोचयतीति तादृशाः, पक्षे सांवत्सरं वर्षभाविनं फलं स्त्रीपुत्राद्विलाभार्थं शुभाशुभपरिणामं दर्शयन्ति सूचयन्तीति तादृशाः। **केचित्** राजकुमाराः **सुमेरुपरिसराः इव** सुमेरुनामकपर्वतस्य परिसराः प्रान्तभागा; इव **कार्त्तस्वरमया** सुवर्णविकाराः सुवर्णप्रचुराः वा, पक्षे सुवर्णसम्पन्नाः **केचित्** अन्ये **कुमुदाकराः इव** कुमुदवनानि इव **भास्वद्दर्शननिमीलिताः** भास्वतः दीप्तिमतः जनस्य वासवदत्तारूपस्य दर्शनेन दृष्टिगोचरेण निमीलिताः दृष्टिप्रतिघातेन निमीलितनेत्राः, पक्षे भास्वतः सूर्यस्य दर्शनेन निमीलिताः सङ्कुचिताः। **केचित्** अन्ये **धार्तराष्ट्राः इव** दुर्योधनादयः धृतराष्ट्रपुत्राः इव **विश्वरूपावलोकनजनि-तेन्द्रजालाद्भुतप्रत्ययाः** विश्वस्य जगतः रूपं लावण्यं यस्यां सा वासवदत्ता तस्याः अवलोकनेन दर्शनेन जनितः समुत्पादितः इन्द्रजालस्य अद्भुतप्रत्ययः विश्वासः निश्चयः वा येषां तादृशाः, पक्षे विश्वरूपस्य भगवता कृष्णेन प्रदर्शितस्य विश्वरूपस्य विलोकनेन दर्शनेन जनितः उत्पादितः इन्द्रजालाद्भुतस्य कृष्णोऽयम् इन्द्रजालं करोतीत्येवंरूपस्य प्रत्ययः नि श्चयः येषां तादृशाः। **केचित्** अपरे राजकुमाराः **आत्मनि** स्वस्मिन् वारणबुद्ध्या गजधिया, पक्षे निवारणबुद्ध्या

स्वप्रतिषेधशङ्क्या वासवदत्ता प्राप्तौ वासवदत्तोपयन्तारं योत्स्यामहे इति धिया। **बलवन्तः अपि** बलसम्पन्नः अपि शक्तिवन्तः अभिमानवतः अपि वा पक्षे सैनिकैः सहिताः अपि **सुवाहाः** सुखेन वाहः वहनं स्वानुकूलविधाने नयनं येषां तादृशाः, पक्षे शोभना बाहाः अश्वा भुजाः वा येषां तादृशाः अथवा **केचित्** अन्ये राजकुमाराः **पाणिग्रहणार्थिनः अपि** पणनं पाणिः व्यवहारः आयसाध्यो भोजनोपभोगादिव्यापारः तद्ग्रणार्थिनः तदभिलाषिणः अपि, पक्षे पाणिग्रहणं वासवदत्तायाः विवाहः तदर्थिनः तत्कामयमानाः अपि **असुकरं** शोभनं करः राजग्राह्यभागदानं विना स्वकार्यसाधनोत्सवः पक्षे दुष्करं **मन्यमानाः। केचित्** राजकुमाराः **अधरीकृता अपि** धरा पृथ्वी धरीकृता पृथ्वीकृता तद्भिन्ना अपि पक्षे अधराः निकृष्टाः तादृशीकृताः अधरीकृताः हीनतामापदिता अपि **स्थिराः** पृथिव्यः पक्षे पाणिग्रहणाय निश्चलाः। **केचित्** अन्ये **पाण्डुपुत्राः इव** पाण्डवाः इव **अक्षहृदयाज्ञानहृतक्षमाः** अक्षाणाम् इन्द्रियाणां वासवदत्तासम्बन्धिनां हृदयस्य अभिलाषस्य मनसः अज्ञानेन अनवबोधनेन हृता नष्टा क्षमा शन्तिः येषां तादृशाः पक्षे अक्षहृदयस्य पाशतत्त्वस्य द्यूतविद्यायाः वा अज्ञानेन हृता कौरवैः अपहृता क्षमा भूमिः राज्यं वा येषां तादृशाः। **केचित्** अन्ये **बृहत्कथानुबन्धिनः इव** बृहत्कथा नाम ग्रन्थविशेषः तस्य अनुबन्धितः अध्येतारः इव **गुणाढ्याः** गुणैः शौर्यादिभिः आढ्याः परिपूर्णाः, पक्षे कथाख्यायिका प्रणेतारः गुणाढ्यनामकाः। **केचित्** राजकुमाराः **तिर्यग्गतयः इव** वाय वः इव सुगन्धवाहाः शोभनं गन्धं वहन्ति धारयन्ति इति तादृशाः अथवा सुगन्धा शोभनगन्धयुक्ता वाहाः भुजाः येषां तादृशाः, पक्षे शोभनं गन्धं पुष्पादिसौरभं वहन्ति इतस्ततः नयन्ति इति तादृशाः **केचित्** अन्ये **कौरवसैनिकाः इव** दुर्योधनपक्षस्य सैनिकाः बला इव **द्रोणाशासूचकाः** द्रोणैः श्वेतपुष्पविशेषैः हस्तस्थितपुष्पैः आशा सुखप्राप्त्यभिलाषः सूचयन्तीति तादृशाः हस्ते द्रोणपुष्पविशेषष्य चिह्नेन वासवदत्ताप्राप्तिः सूचिता येषां तादृशाः पक्षे द्रोणः द्रोणाचार्यः कौरवाणां गुरुः तस्मात् आशां विजयाभिलाषं सूचयन्ति प्रकटयन्ति इति द्रोणाशासूचकाः तादृशाः। **केचित्** अन्ये **कुमुदाकराः इव** कुमुदानां कैरवाणाम् आकराः वनानि इव **असोढशूरभासः** असोढाः शूरैः भासः दीप्तयः येषां तादृशाः असोढाः शूरस्य सूर्यस्य भासः किरणाः यैः तादृशाः सन्ति। **सा च** वासवदत्ता च **क्षणेन** क्षणमात्रेण **एकेशः** प्रत्येकं **समलोक्य** सम्यक्प्रकारेण विलोक्य **विरक्तहृदया सती** विरक्तं

तत्तद्राजकुमारस्वीकरणविमुखं हृदयम् अन्तःकरणं यस्याः तादृशी सती **कर्णीरथात्** कर्णीनामकाद्रथात् **अवततार** अवातरत्।

**( वासवदत्तया स्वप्नदृष्टयुवकवर्णनम् )**

**अथ तस्यामेव रात्रौ सा स्वप्ने, बालिनमिवाङ्गदोपशोभितम्, कुहूमुखमिव् हारिकण्ठम्, कनकमृगमिव रामाकर्षणनिपुणम्, जयन्तमिव वचनामृतानन्दितवृद्धश्रवसम्, कृष्णमिव कंसहर्षं न कुर्वन्तम्, महामेघमिव विलसत्करकम्, समुद्रमिव महासत्त्वम्, मालिन्या कवरिकया, तुङ्गभद्रनासिकया, शोणेनाधरेण, नर्मदया वाचा, गोदया भुजया, स्वर्वाहिन्ता कीर्त्यां च पुण्यसरिन्मयमिव, आदिकन्दं शृङ्गारपादपस्य, रोहणगिरिं सकुलगुणरत्नसमूहस्य, प्रभवशैलं सुन्दरकन्दर्पकथानदीनाम्, सुरभिमासं वैदग्ध्यसहकारस्य, आदर्शतलं सौजन्यमुखस्य, आदिबीजं विद्यालतानां, कोशगृहं महासौन्दर्यधनस्य, मूलगृहं शीलसम्पदः, स्वयंवृतपतिं कीर्तेः, स्पर्धागृहं लक्ष्मीसरस्वत्योः, त्रिभुवनविलोभनीयाकृतिं, कश्चिद्युवानं ददर्श।**

**संस्कृतव्याख्या**—अथ तस्यामेव रात्रौ सा स्वप्ने कश्चिद् युवानं ददर्शेत्यन्वयः। **अथ** तदनन्तरं **तस्यामेव** स्वयंवरदिवानन्तरं **रात्रौ** निशायां **स्वप्ने** कश्चिद् युवानं तरुणं **ददर्श** पुनः पुनः अपश्यत्। अतः परं युवानं कन्दर्पकेतुं विशिनष्टि बालिनमिवेति। **बालिनम् इव** सुग्रीवाग्रजम् इव **अङ्गदोपशोभितम्** अङ्गदेन केयूराभूषणविशेषेण उपशोभितं शोभायमानं पक्षे अङ्गदेन तन्नामकेन स्वपुत्रेण उपशोभितं शोभायमानम्। **कुहूमुखम् इव** कोकिलम् इव **हारिकण्ठम्** हारः मुक्तामाला विद्यतेऽस्येति हारी हारसम्पन्नः कण्ठः यस्य तादृशं, पक्षे हारी मनोहारी कण्ठः स्वरः यस्य तादृशम्। **कनकमृगम् इव** सुवर्णहरिणं **मारीचम् इव रामाकर्षणनिपुणम्** रामाणां रमणीनाम् आकर्षणे आकृष्टकरणे निपुणं कुशलं, पक्षे रामस्य भरताग्रजस्य आकर्षणे निपुणम्। **जयन्तम् इव** इन्द्रपुत्रम् इव **वचनामृतानन्दितवृद्धश्रवसं** वचनम् एव अमृतं मधुरं तेन आनन्दितानि प्रसादितानि वृद्धानां पण्डितानां विदुषां वा श्रवांसि श्रवणानि येन तादृशं, पक्षे वचनामृतैः आनन्दितः प्रसादितः वृद्धश्रवा इन्द्रः येन तादृशम्। **कृष्णम् इव** वासुदेवम् इव **कंसहर्षं** कं जनं सहर्षं सानन्दं, पक्षे कंसस्य स्वमातुलस्य हर्षं

सन्तोषम्। **न कुर्वन्तं** न कुर्वाणम्। **महामेघम् इव** घनमेघम् इव **विलसत्करकम्** विशेषेण वसन्तौ सुशोभितौ करौ हस्तौ यस्य तादृशं, पक्षे विलसन्त्यः करकाः वर्षोपला यस्मिन् यस्य वा तादृशम्। **समुद्रम् इव** सागरम् इव **महासत्त्वम्** महत् सत्वं बलं स्वभावो वा यस्य तादृशम्, पक्षे महान्ति बृहन्ति सत्वानि जन्तवः यस्मिन् तादृशम्। **मालिन्या** मालिनीनामकनद्या पक्षे मालासम्पन्नया **कवरिकया** केशविन्यासेन, **तुङ्गभद्रया** तन्नामकनद्या, पक्षे तुङ्गा उन्नता भद्रा प्रशस्ता च तया **नासिकया** घ्राणेन, **शोणेन** शोणनामकनद्या पक्षे लौहित्येन **अधरेण** अधरोष्ठेन, **नर्मदया** नर्मदा तन्नाम्ना प्रसिद्धा नदी तया, पक्षे नर्मकीडां लीलासंल्लापं ददातीति नर्मदा विलाससल्लापकुशला तया **वाचा** वाण्या **गोदया** गोदावरी नामिका नदी गोदा तया, पक्षे गां भूमिं ददातीति गोदा तया **भुजया** बाहुना, **स्वर्वाहिन्या** सुरलोकनद्या गङ्गया पक्षे स्वः स्वर्गं वोढुं गन्तुं शीलं यस्याः तादृश्या कीर्त्या च यशसा च **पुण्यसरिन्मयम् इव** पवित्रनदीसङ्गमम् इव स्थितम्। **शृंगारपादपस्य** शृंगारः शृंगाररसः एव पादपः वृक्षः तस्य **आदिकन्दम्** मूलाधारं मूलकारणं वा **सकलगुणरत्नसमूहस्य** सकलाः समस्ताः शौर्यादयः गुणाः एव रत्नानि तेषां समूहस्य **रोहणगिरिः** प्रादुर्भावपर्वतः तम्। **सुन्दरकन्दर्पकथानदीनां** सुन्दर्यः मनोहराः याः कन्दर्पकथाः कामदेवविषयकसंल्लापाः ताः एव नद्यः तासाम् प्रभवशैलं समुद्भवपर्वतम् **वैदग्ध्यसहकारस्य** वैदग्ध्यं चातुर्यमेव सहकारः आम्रः तस्य **सुरभिमासं** वसन्तकालम्। **सौजन्यमुखस्य** सौजन्यं शीलत्वमेव मुखम् आननं तस्य **आदर्शतलं** दर्पणफलकम्। **विद्यालतानां** विद्याः एव लताः तासाम् **आदिबीजं** मूलबीजम्। **महासौन्दर्यधनस्य** महत् उत्कृष्टं सौन्दर्यं रमणीयत्वम् एव धनं तस्य **कोशगृहं** भाण्डागारम्। **शीलसम्पदः** शीलं सत्स्वभावः एव सम्पत् ऐश्वर्यं तस्य **मूलगृहं** प्रधानागारम्। **कीर्तेः** यशसः **स्वयंवृत्तपतिः** स्वयम् स्वकीयेन वृतः चयनितः पतिः भर्त्ता तादृशम्। **लक्ष्मीसरस्वत्योः** श्रीवाण्योः **स्पर्धागृहं** सङ्घर्षविषयीभूतं निवासस्थानम्। **त्रिभुवनविलोभनीयाकृतिः** त्रिभुवने लोकत्रये त्रिभुवनस्य लोकत्रयस्य वा विलोभनीया विलोभनकर्त्री आकृतिः आकारः रूपं वा यस्य तादृशं कश्चित् अपरिचितं **युवानं** युवकं **ददर्श** पुनः पुनः अपश्यत्।

## (वासवदत्ताविरहवर्णनम्)

**स चिन्तामणिनाम्नो राज्ञस्तनयः कन्दर्पकेतुरिति स्वप्न एव तन्नामादिक-मश्रृणोत्। अनन्तरम् 'अहो प्रजापते रूपनिर्माणकौशलम्। मन्ये, स्वस्यैव**

**नैपुण्यस्यैकत्र दर्शनोत्सुकमनसा वेधसा जगत्त्रयसमवायिरूपपरमाणूनादाय विरचितोऽयमिति; अन्यथा कथमिवास्य कान्तिविशेष ईदृशो भवति। वृथैव दमयन्ती नलस्य कृते वनवासवैशसमवाप। मुधैवेन्दुमती महिष्यप्यजानुरागिणी बभूव। विफलमेव दुष्यन्तस्य कृते दुर्वाससः शापमनुबभूव शकुन्तला। निरर्थकमेव मदनमञ्जरी नरवाहनदत्तं चकमे। निष्कारणमेव ऊरुगरिमनिर्जितरम्भा रम्भा नलकूबरमचीकमत। व्यर्थमेव धूमोर्णा स्वयं स्वयंवरार्थमागतेषु देवगणेषु धर्मराजमाचकाङ्क्ष। निष्प्रयोजनमेव ऋद्धिर्गन्धर्वयक्षेषु कुबेरमाससाद। अहेतुकमेव पुलोमतनया देवेन्द्रासक्तचित्ता बभूव।**

**संस्कृतव्याख्या–सः** स्वप्ने दर्शितः युवकः **चिन्तामणिनाम्नः** तन्नामकस्य **राज्ञः** नृपतेः **तनयः** पुत्र **कन्दर्पकेतुः** तन्नामकःराजकुमारः अस्ति **इति** एवं विधं **स्वप्ने** स्वापे **एव तन्नामादिकम्** तस्य युवकस्य नामादिकं परिचयम् **अशृणोत्** कर्णगोचरम् अकरोत्। **अनन्तरं** तत्पश्चात् अहो आश्चर्यमेतत् यत् प्रजापतेः ब्रह्मणः **रूपनिर्माणकौशलम्** सौन्दर्यरचनानैपुण्यम्। **मन्ये** अहं शङ्के **स्वस्य एव** स्वकीयस्य एव **नैपुण्यस्य** सौन्दर्यनिर्माणकौशलस्य। **एकत्र** एकस्मिन्नेव स्थाने **दर्शनोत्सुकमनसा** दर्शने दृष्टिगोचरीकरणे उत्सुकम् उत्कण्ठितं मनः अभिलाषः यस्य तादृशेन **वेधसा** प्रजापतिना ब्रह्मणा **जगत्त्रयसमवायिरूपपरमाणून्** जगत्त्रये लोकत्रये समवायिनः विद्यमानाः रूपपरमाणवः सौन्दर्यप्रकृतिभूताः परमाणवः तान् आदाय गृहीत्वा **अयम्** एषः स्वप्ने दृष्टः युवकः कन्दर्पकेतुः **विरचितः** निर्मितः **अन्यथा** तदभावे **कथम् इव** केन प्रकारेण **अस्य** कन्दर्पकेतोः **कान्तिविशेषः** अनुपमा कान्तिः **ईदृशः** एवविधः **भवति। वृथा एव** निष्कारणम् एव **दमयन्ती** तन्नामिका कुण्डिनराज्ञः भीमस्य पुत्री **नलस्य कृते** तन्नामकस्य निषधनरेशस्य कृते निमित्तम् **वनवासवैशसं** वनवासस्य वनवासेनोत्पन्नस्य वैशसं महद्दुःखम् **अवाप** प्राप्तवती। **मुधा एव** निरर्थकम् इव **महिषी** राज्ञी शिलष्टार्थः सैरिभी **इन्दुमती** तन्नामिका भोजराजपुत्री **अजानुरागिणी** अजः तन्नामकः दशरथपिताः शिलष्टार्थः छागः तदनुरागिणी तदासक्तहृदया **बभूव** अभवत्, सैरिभ्या छागेनानुरागः विरुद्ध इति विरोधः। **विफलमेव** निष्फलम् एव **दुष्यन्तस्य कृते** तन्नामकस्य हस्तिनापुरराज्ञः कृते निमित्तं **दुर्वाससः** तन्नामकर्षेः **शापम् शकुन्तला** तन्नामिका कण्वपालिता पुत्री **अनुबभूव**

अनुभवं कृतवती। दुष् अंगविकृतिर्यस्य सः दुष्यन्तः तम् अङ्गविकृतिमन्तस्य कृते अनुरागः इति विरुद्धः। **निरर्थकम् एव** निष्कारणम् एव **मदनमञ्जरी** मञ्जुकापरनामिका कलिङ्गसेनायाः पुत्री **नरवाहनदत्तं** तन्नामकम् उदयनपुत्रम् **चकमे** वाञ्छितवती। **निष्कारणम् एव** कारणं बिना एव **उरुगरिमनिर्जितरम्भा** उर्वोः सक्थ्नोः गरिम्ना गौरवेण सौन्दर्येण वा निर्जिता तिरस्कृत रम्भा कदली यया तादृशी, **रम्भा** अप्सरो विशेषः **नलकूबरम्** तन्नामकं कुबेरपुत्रम् **अचीकमत्** अकामयत् नलः इव कूबरः कुब्जकः तम् कामयते इति विरोधः। **व्यर्थम् एव** निरर्थकम् एव **धूमोर्णा** तन्नामिका यमपत्नी **स्वयंवरार्थं** स्वयंवरस्य कृते **आगतेषु** समुपस्थितेषु **देवेषु** देवानां मध्ये **धर्मराजं** यमराजम् **आचकाङ्क्ष** अभिलाषावती आसीत्। धर्मेण धर्मानुष्ठानेनैव न तु रमणीजनाभिलषितकलाकलापकौशलेन राजते इति धर्मराजः इति विरोधोऽपि दृश्यते। **निष्प्रयोजनमेव** निष्कारणमेव **ऋद्धिः** कुबेरपत्नी **गन्धर्वयक्षेषु** गन्धर्वाणां यक्षाणां च मध्ये **कुबेरं** धनदं यक्षराजम् **आससाद** परिगृहीतवती। **अहेतुकमेव** निष्कारणमेव **पुलोमतनया** पुलोमजा इन्द्रपत्नी इन्द्राणी **देवेन्द्रासक्तचित्ता** देवेन्द्रे आसक्तं अनुरक्तं चित्तं हृदयं यस्याः तादृशी **बभूव** अभवत्।

**इति बहुविध चिन्तयन्ती; विरहमुर्मुरमध्यमधिरूढेव, मदनदावाग्निशिखा-कवलितेव, वसन्तकालाग्निगृहीतेव, दक्षिणमारुतरुद्रपावकग्रस्तेव, उन्मादपातालगृहं प्रविष्टेव, शून्यकरणग्रामेव वर्तमाना; हृदये विलिखितमिव, उत्कीर्णमिव, प्रत्युप्तमिव, कीलितमिव निगलितमिव, वज्रलेपघटितमिव अस्थिपञ्जरप्रविष्टमिव, मर्मान्तरस्थितमिव, मज्जारसशवलितमिव, प्राणपरीतमिव, अन्तरात्मानमधिष्ठितमिव, रुधिराशये द्रवीभूतमिव, पललसंविभक्तमिव, कन्दर्पकेतुं मन्यमाना; उन्मत्तेव, अन्धेव, बहिरेव, मूकेव, शून्येव, निरस्तेन्द्रियग्रामेव, मूर्च्छागृहीतेव, ग्रहग्रस्तेव, यौवनसागरतरलतरङ्गपरम्परापरिगतेव, रागरज्जुभिः परिवारितेव, कन्दर्प-कुसुमबाणैः कीलितेव, शृङ्गारभावनाविषरसघूर्णितेव, रूपपरि-भावनशल्यकीर्तितेव, मलयानिलापहृतजीवितेव भवन्ती; 'हा प्रिये सख्यनङ्गलेखे! वितर हृदये मे पाणिपद्मम्, दुःसहो विरहसन्तापः।**

**संस्कृतव्याख्या–इति** अनेन प्रकारेण **बहुविधं** नानाप्रकारेण **चिन्तयन्ती** चिन्त्यमाना सा वासवदत्ता **विरहमुर्मुरमध्यं** विरहः कन्दर्पकेतोः वियोगः

एव मुर्मुरः तुषाग्निः तस्य मध्यम् अन्तःप्रदेशम् **अधिरूढा इव** प्रविष्टा इव। तुषानलः शनैः शनै ज्वालयति अत एव तेन महद्व्यथा भवति एवमेव वियोगोऽपि अतः विरहे तुषानलत्वारोपः। **मदनदावाग्निशिखाकवलिता इव** मदनः कामदेवः एव दावाग्निः दावानलः तस्य शिखाभिः ज्वालाभिः कवलिता ग्रासं कृता इव। **वसन्तकालाग्निगृहीता इव** वसन्तः मधुमासः एव कालाग्निः प्रलयानलः तेन गृहीता ग्रस्ता इव। कामोद्दीपकत्वाद्-विरहिणां पीडकत्वेन वसन्ते कालाग्नोः आरोपः। **दक्षिणमारुतरुद्रपावकग्रस्ता इव** दक्षिणमारुतः मलयपवनः एव रुद्रपावकः शङ्करतृतीयनेत्राग्निः तेन ग्रस्ता गृहीता इव। **उन्मादपातालगृहम्** उन्मादः चित्तविभ्रमः एव पातालगृहं तत् प्रविष्टा प्रवेशंकृता इव। अन्धकाराच्छादिते पातालगृहे यथा किञ्चिदपि न दृश्यते तथैवोन्मादेऽपि चेतसोऽस्थिरत्वाद् किञ्चिदपि उचितानुचितविचारं न भवति, अत एवात्र उन्मादे पातालगृहस्यारोपः। **शून्यकरणग्रामा इव** शून्यं स्वकीयविषय-ग्रहणेऽशक्यः करणानाम् इन्द्रियाणां ग्रामः समूहः यस्याः तादृशी इव वर्तमाना स्थिता एतादृशी सा वासवदत्ता **हृदये** स्वमनसि **विलिखितम् इव** चित्रितम् इव **उत्कीर्णम् इव** उट्टङ्कितम् इव **प्रत्युप्तम् इव** खचितम् इव **कीलितम् इव** कीलैः जडितम् इव **निगलितम् इव** शृंखलया बद्धम् इव **वज्रलेपघटितम् इव** वज्रलेपः गुडमासरसादिद्रव्यनिर्मितलेपविशेषः तेन घटितं योजितम् इव **अस्थिपञ्जरप्रविष्टम् इव** अस्थिपञ्जरं कङ्कालः तत्र प्रविष्टं प्रवेशं कृतम् इव **मर्मान्तरस्थितम् इव** मर्मणां हृदयादीनां जीवस्थानानां अन्तरं मध्ये स्थितं विद्यमानम् इव **मज्जारसशवलितम् इव** मज्जा अस्थिमध्यस्थस्नेहविशेषः तस्य रसेन शवलितः मिश्रितः तादृशम् इव **प्राणपरीतम् इव** प्राणेन प्राणनामकवायुना प्राणैः असुभिर्वा परीतं परिव्याप्तम् इव। **अन्तरात्मानम्** अन्तःकरणम् **अधिष्ठितम् इव** विद्यमानम् इव **रुधिराशये** रुधिराशयः रक्ताधारभूतः तस्मिन् **द्रवीभूतम् इव** द्रवरूपमापन्नम् इव **पल्लसंविभक्तम् इव** पल्लेन मांसेन सह संविभक्तं समुपलब्धविभागम् इव **कन्दर्पकेतुं** तन्नामकं स्वप्ने दृष्टं राजकुमारं **मन्यमाना** अवधारयन्ती सर्वरूपेण कन्दर्पकेतपुमयभूता इत्यर्थः। **उन्मता इव** वायुजनितचित्तविभ्रमविशेषसम्पन्ना इव **अन्धा इव** नेत्ररहिता इव **वधिरा इव** श्रोत्रविकला इव **मूका इव** वागेन्द्रियरहिता इव **शून्या इव** निश्चेष्टा इव **निरस्तेन्द्रियग्रामा इव** निरस्तः व्यक्तः इन्द्रियग्रामः इन्द्रियसमूहः

यस्याः तादृशी इव, **मूर्च्छागृहीता इव** मूर्च्छा चेतनाहीनतता तया गृहीता ग्रस्ता इव। **ग्रहग्रस्ता इव** ग्रहैः अशुभकारकैः सूर्यादिग्रहैः ग्रस्ता आविष्टा इव **यौवनसागरतरलतरङ्गपरम्परापरिगता इव** यौवनं तारुण्यमेव सागरः समुद्रः तस्य तरलानां चपलानां तरङ्गाणां लहरीणां परम्पराभिः पङ्क्तिभिः परिगता आवेष्टिता इव **रागरज्जुभिः** रागः अनुरागः प्रेम वा रज्जवः बन्धनपाशाः ताभिः **परिवारिता इव** परिबद्धा इव **कन्दर्पकुसुमबाणैः** कन्दर्पस्य कामदेवस्य कुसुमबाणैः पुष्पशरैः **कीलिता इव** निखाता इव **शृङ्गारभावनाविषरस-घूर्णिता इव** शृङ्गारभावना शृङ्गाररसानुध्यानं सा एव विषरसः गरलः तेन घूर्णिता भ्रमिता इव **रूपपरिभावनाशल्यकीलिता इव** रूपस्य कामदेवस्य सौन्दर्यस्य वा परिभावना चिन्तनं सा एव शल्यं बाणाग्रं तेन कीलिता परिबद्धा इव **मलयानिलापहृतजीविता** मलयानिलेन दक्षिणपवनेन अपहृतं गृहीतं विनाशितमित्यर्थः जीवितं जीवनं यस्याः तादृशी **भवन्ती** सती। इतः परंवासवदत्तायाः कथनं विद्यते **हेति**–हा विषादवाचकाव्ययः, **प्रिये** ममाभिन्ने **सखि** वयस्ये **अनङ्गलेखे** हे अनङ्गस्य कामदेवस्य लेखा रेखा इव रेखा यस्यां तादृशे तन्नामिके **मे** मम वासवदत्तायाः **हृदये पाणिपद्मं** करकमलं **वितर** धारय यतोहि **विरहसन्तापः** वियोगव्यथा **दुःसहः** असहनीयः विद्यते।

**मुग्धे मदनमञ्जरि! सिञ्चाङ्गानि चन्दनवारिणा। सरले वसन्तसेने! संवृणु केशपाशम्। तरले तरङ्गवति! विकिराङ्गेषु कैतकधूलिम्। वामे मदनमालिनि! कलय वलये शैवालकलापेन। चपले चित्रलेखे! चित्रपटे विलिख चित्तचोरं जनम्। भाविनि विलासवति! विक्षिपावयवेषु मुक्ताचूर्णनिदानम्। रागिणि रागलेखे! स्थगय नलिनीदलनिचयेन पयोधरभारम्। सुकान्ते कान्तिमति! मन्दं मन्दमपनय बाष्पबिन्दून्। यूथिकालङ्कृते यूथिके! सञ्चारय नलिनीदलतालवृन्तेनार्द्रवातान्।**

**संस्कृतव्याख्या**–हे **मुग्धे** हे यौवनमध्यस्थे सुन्दरि! मदनमञ्जरि हे कामस्य पुष्पस्वरूपे मदनमञ्जरि! **अङ्गानि** मम शरीरावयवानि **चन्दवारिणा** शीतलेन चन्दनरसेन **सिञ्च** सिक्तं कुरु। **सरले** हे निष्कलुषहृदये **वसन्तसेने** हे वसन्तः एव सेना यस्याः तादृशी वसन्तसेने **केशपाशं** मम केशकलापं **संवृणु** बद्धं कुरु। **तरले** हे चञ्चले **तरङ्गवति** हे तरङ्गसम्पन्ने तरङ्गवति!

**अङ्गेषु** मम शरीरावयवेषु **कैतकधूलिं** केतकीपुष्पस्य धूलिं पराकगणं **विकिर** विक्षिप। **बामे** हे विपरीताचरणे, सुन्दरि वा **मदनमालिनि** हे कामदेवस्य मालासम्पन्ने मदनमालिनि! **शैवालकलापेन** शैवालसमूहनिर्मितेन **वलये** कङ्कणे **कलय** मम हस्तयोः विरचय। **चपले** हे चञ्चले **चित्रलेखे** चित्रलेखनकार्ये निपुणे चित्रलेखे! **चित्रपटे** चित्रलेखनपटले **चित्तचोरं** हृदयहारिणं कन्दर्पकेतुं **विलिख** चित्रितं कुरु। **भाविनि** हे भावसम्पन्ने भावज्ञे वा **विलासवति** विलासान्विते विलासवति। अवयवेषु ममाङ्गेषु **मुक्ताचूर्णनिदानं** पिष्टमौक्तिक-कणसमूहं **विक्षिप** पातय। **रागिणि** हे अनुरागयुक्ते रागलेखे प्रेमालेखन-प्रवीणे रागवति! **नलिनीदलनिचयेन** नलिनीपत्रसमूहेन **पयोधरभारं** मम स्तनमण्डलं **स्थगय** आच्छादय। **सुकान्ते** शोभनप्रियतमयुक्ते **कान्तिमति** कान्तिसम्पन्ने कान्तिमति! **बाष्पविन्दून्** मम अरुकणान् **मन्दं मन्दं** शनैः शनैः **उपनय** प्रोञ्छ। **यूथिकालङ्कृते** हे मागधीपुष्पशोभिते **यूथिके** हे मागधी-गणिके इव यूथिके! नलिनीदलतालवृन्तेन कमलिनीपत्रव्यजनेन **आर्द्रवातान्** क्लिन्नवायून् शीतलपवनान् **सञ्चारय** समुत्पादय।

**एहि भगवति निद्रे! अनुगृहाण माम्, धिक्, इन्द्रियैरपरैः, किमिति लोचनमयान्येव न कृतान्यङ्गानि विधिना। भगवन् कुसुमायुध तवायमञ्जलिः, अनुवशो भव भाववति मादृशे जने। मलयानिल सुरतमहोत्सवदीक्षागुरो वह यथेष्टम्, अपगता मम प्राणाः, इति बहुविधं भाषमाणा वासवदत्ता सखीजनेन समं सम्मुमूर्च्छ।**

**संस्कृतव्याख्या–भगवति निद्रे** हे निद्राधिष्ठातृ देवि **एहि** आगच्छ **माम्** वासवदत्ताम् **अनुगृहाण** मयि कृपां कुरु। पूर्वं निद्रायां स्वप्ने कन्दर्पकेतोः दर्शनमभवत्, पुनः तस्य दर्शनायानुग्रहप्रार्थनमिति बोध्यम्। येन **विधिना** ब्रह्मणा सर्वाणि **अङ्गानि** शरीरावयवानि **लोचनमयानि** नेत्रयुतानि न कृतानि तं विधिं धिक् यतोहि अपरैः अन्यैः नेत्रव्यतिरिक्तैः इन्द्रियैः **अलम्** किमपि साध्यं नास्ति। **भगवन् कुसुमायुध** हे ऐश्वर्यशालिन् कामदेव! **मादृशे** मम सदृशे **भाववति** अनुरागविष्टे **जने** लोके **अनुवशः भव** अनुकूलः भव। **सुरतमहोत्सवदीक्षागुरो** हे सुरतं कामकीडनम् एव महोत्सवः आह्लादकत्वाद् महामहः तस्य दीक्षायां व्रतधारणे **गुरो** दीक्षादायक **मलयानिल** हे मलयपवन! **यथेष्टम्** स्वेच्छानुसारं

**वह** सञ्चल। **मे** मम वासवदत्तायाः **प्राणाः** जीवनाधाराः **अपगताः** स्वप्रियतमं प्रति गताः। **इति** अनेनप्रकारेण **बहुविधं** विविधेन **भाषमाणा** कथ्यमाना **वासवदत्ता** तन्नामिका राजदुहिता **सखीजनेन समं** वयस्यलोकेन सह **सम्मुमूर्च्छ** चेतनाहीना सञ्जाता।

**अनन्तरं परिजनप्रयत्नोच्छ्वसितजीविता सती, क्षणमतिशिशिर-घनसाररसाकुलनिम्नगाकूलपुलिने, क्षणमतितुहिनमलयजरससारस-रित्परिसरे, क्षणमरविन्दकाननपरिवारितसरस्तटविटपिच्छायासु, क्षणमनिलोल्लसितदलकदलीकाननेषु, क्षणं कुसुमप्रवालशय्यासु, क्षणं नलिनीदलसंस्तरेषु, क्षणं तुषारसङ्घातशिशिरितशिला तलेषु परिजनेन नीयमाना प्रलयकालोदितद्वादशरविकिरण-कलापतीव्रविरहानलदह्यमानामतिकृशां विप्राणामिव तनुं बिभ्रती सा, प्रचलदमन्दमन्दरान्दोलितदुग्धसिन्धुतरलतरङ्गच्छटाधवलहासच्छुरिताधर-पल्लवं तन्मुखारविन्दं द्विजकुलमिव रुतिप्रणयि तदीक्षणयुगलम्, सहजसुरभिमुखपरिमलमाघ्रातुकामेव दूरविनिर्गता तन्नासावंशलक्ष्मीः, कलङ्कमुक्तेन्दुकलाकलापकोमला पीयूषफेनपटलपाण्डुरा तद्द्विजपङ्क्तिः, अदृष्टचरमनङ्गातिशायि तद्रूपम्, धन्यानि तानि स्थानानि, ते जनपदाः पुण्याः, तानि नामाक्षराणि सुकृतभाञ्जि, यान्यमुना परिष्कृतानि, इति मुहुर्मुहुः परिभावयन्तीः, दिक्षु विलिखितमिव, नभस्युत्कीर्णमिव, लोचने प्रतिबिम्बितमिव, चित्रपटे पुरोदर्शितमिव, तमितस्ततो विलोकयन्ती व्यतिष्ठत।**

**संस्कृतव्याख्या–तदनन्तरं** मूर्च्छानन्तरं **परिजनप्रयत्नोच्छ्वासितजीविता सती** परिजनप्रयत्नेन परिचारिकोद्योगेन उच्छ्वसितं पुनः प्रत्यागतं जीवितं चैतन्यं यस्याः तादृशी सती वासवदत्ता क्षणमतिशिशिरः पुलिनेषु सखीजनेन नीयमानेत्यन्वयः। **क्षणम्** क्षणमात्रं किञ्चित्कालमित्यर्थः **अतिशिशिरघनसा-रसाकुलनिम्नगाकूलपुलिने** अतिशिशिरेण अत्यधिकशीतलेन घनसाररसेन कर्पूरजलेन आकुलायाः परिव्याप्तायाः निम्नगायाः नद्याः कूलपुलिने तटसैकते, **अतितुहिनमलयजरससारसरित्परिसरे** अतितुहिनः अत्यन्तशीतलः यः मलयजरसः चन्दनरसः तेन सारायाः श्रेष्ठायाः सरितः नद्याः परिसरे प्रान्तपदेशे,

**अरविन्दकाननपरिवारितसरस्तटविटपिच्छायासु** अरविन्दानां रक्तकमलानां काननेन वनेन परिवारितं परिव्याप्तं यत् सरस्तटं सरोवरकूलं तत्र ये विटपिनः वृक्षाः तेषां छायासु अनातपेषु, **क्षणं** किञ्चित्कालम् **अनिलोल्लसितदलकदलीकाननेषु** अनिलेन पवनेन उल्लासितानि आन्दोलितानि दलानि पत्राणि येषां तादृशानि यानि कदलीकाननानि रम्भावनानि तेषु, **कुसुमप्रवालशय्यासु** कुसुमानां पुष्पाणां प्रवालानां किसलयानां शय्यासु, **नलिनीदलसंस्तरेषु** नलिनीदलानां कमलिनीकिसलयानां संस्तरेषु आस्तरणेषु, **तुषारसङ्घातशिशिरितशिलातलेषु** तुषारसङ्घातेन हिमपातेन शिशिरतानि शीतलीकृतानि यानि शिलातलानि प्रस्तर-खण्डानि तेषु **परिजनेन** अनुचरजनेन **नीयमाना। प्रलयकालोदितद्वादशरविकि-रणकलापतीव्रविरहानलदह्यमानां** प्रलयकाले कल्पान्ते सहैव उदिताः समुद्भूताः ये द्वादश रवयः सूर्याः तेषां किरणकलापवत् किरणसमूहः इव तीव्रः तीक्ष्णः यः विरहानलः प्रियवियोगाग्निः तेन दह्यमानाम् अतिपीड्यमानाम् **अतिकृशाम्** अत्यन्तक्षीणां **विप्राणाम् इव** विगताः निर्गता प्राणाः यस्याः तादृशीम् इव **तनुं** शरीरं विभ्रती धारयन्ती **सा** पूर्वोक्ता वासवदत्ता विद्यते। **प्रचलदमन्द-मन्दरान्दोलिदुग्धसिन्धुतरलतरङ्गच्छटाधवलहासच्छुरिताधरपल्लवं** प्रचलन् परिभ्रमन् यः अमन्दः विशालः मन्दरः मन्दगिरिः तेन आन्दोलितस्य मथितस्य दुग्धसिन्धोः दुग्धसागरस्य क्षीरसागरस्य तरलानां चञ्चलानां तरङ्गाणां वीचीनां छटावत् शोभा इव धवलेन श्वेतेन हासेन मन्दस्मितेन छुरितं सम्पन्नम् अधरपल्लवं अधरोष्ठरूपं किसलयं यस्मिन् तादृशं **तन्मुखारविन्दं** तस्य कन्दर्पकेतोः मुखारविन्दं मुखकमलं विद्यते। **द्विजकुलम् इव** ब्राह्मणसमूहम् इव। **रुतिप्रणयि** रुत्योः कर्णयोः प्रणयि सप्रश्रयं कर्णप्रान्तविस्तृतं अतिविशालमित्यर्थः, पक्षे रुतौ वेदे प्रणयि अनुरक्तम् **तदीक्षणयुगलं** तस्य नेत्रद्वयम्। **सहजसुरभिमुखपरिमलं** सहजसुरभि स्वाभाविकसुगन्धि यत् मुखमाननं तस्य परिमलं सुगन्धम् **आघ्रातुकामा इव** आघ्रातुं कामः अभिलाषः यस्याः तादृशी इव **दूरविनिर्गता** दूरं विनिर्गता निःसृता **तन्नासावंशलक्ष्मीः** तस्य नाक्षावंशस्य नासिकाद-ण्डस्य लक्ष्मीः शोभा। **कलङ्कमुक्तेन्दुकलाकलापकोमला** कलङ्केन लाञ्छलेन मुक्ता या इन्दुकला चन्द्रप्रभा तस्याः कलापं समूहम् इव कोमला मृदुः आह्लादिका वा **पीयूषफेनपटलपाण्डुरा** पीयूषस्य अमृतस्य फेनपटलम् इव डिण्डीरससमूहम् इव पाण्डुरा धवला **तद्विजपङ्क्तिः** तस्य कन्दर्पकेतोः

द्विजपङ्क्तिः दन्तश्रेणिः। **अदृष्टचरम्** पूर्वं दृष्टं दृष्टचरं दृष्टिगोचरीभूतम् इत्यर्थः, न दृष्टिगोचरीभूतम् अदृष्टचरम्। **अनङ्गातिशायि** अनङ्गं कामदेवं तत्सौन्दर्यमित्यर्थः, अतिशेते अतिक्रामति तिरस्करोतीति वा तादृशम् **तद्रूपम्** तस्य सौन्दर्यम्। **तानि स्थानानि** वासस्थानानि **धन्यानि** सुकृतानि सौभाग्यशालिनि वा **ते जनपदाः** प्रदेशाः पुण्याः पुण्यवन्तः सौभाग्यशालिनः वा **तानि** चन्द्रकेतुनाम्नि प्रयुक्तानि **नामाश्रराणि** नाम्नः अक्षराणि वर्णाः **सुकृतभाञ्जि** सुकृतं पुण्यं भजन्ति प्राप्नुवन्तीति तादृशानि सन्ति। **यानि** स्थानानीत्यादीनि **अमुना** तेन कन्दर्पकेतुना **परिष्कृतानि** पवित्रीकृतानि परिसेवितानि वा। **इति** अनेन प्रकारेण **मुहुर्मुहु;** बारं-बारं परिभावयन्मी चिन्तयन्ती **दिक्षु** आशासु **विलिखतम् इव** चित्रितम् इव **नभसि** आकाशे **उत्कीर्णम् इव** उट्टङ्कितम् इव **लोचने** नेत्रे **प्रतिबिम्बितम् इव** प्रतिफतिलम् इव **चित्रपटे** आलेखपटले **पुरोदर्शितम्** इव पुरः सम्मुखे दर्शितं दृश्यमानम् इव **तां** पूर्वोक्तं चन्दकेतुम् **इतस्ततः** परितः **विलोकयन्ती** दृश्यमाना **व्यतिष्ठत** स्थितवती।

**अथ तस्यास्तमालिका नाम शारिका तत्प्रियसखीभिः समं समालोच्य कन्दर्पकेतोर्भावमाकलयितुं प्रेषिता। सापि मया सार्धं प्रस्थितागता चात्रैव तरोऽधस्तात्तिष्ठतिः इत्युक्त्वा विरराम।**

**संस्कृतव्याख्या–अथ** अनन्तरं **तस्याः** वासवदत्तायाः **तमालिका नाम** तन्नामिका सारिका शुकी **तत्प्रियसखीभिः** तस्याः प्रियसखीभिः स्निग्धसहचरीभिः **समं** सह **समालोच्य** परस्परं विचार्य **चन्द्रकेतोः** तन्नामराजपुत्रस्य **भावं** वासवदत्तां प्रति अभिप्रायम् **आकलियितुं** अवबोधनार्थं **प्रेषिता सा** शुकी **अपि मया सार्धं** मया सह **प्रस्थिता** प्रस्थानं कृता **आगता च** आयाता च **अत्रैव** अस्मिन्स्थाने एव **तरोऽधस्तात्** वृक्षस्य अधः तिष्ठति विद्यमाना अस्ति। **इति उत्तवा** एवं प्रकारेण कथयित्वा सः शुकः **विरराम** तूष्णीमभवत्।

**अथ तच्छ्रुत्वा सहर्षं समुत्थाय मकरन्दस्तां तमालिकामाहूय विदितवृत्तान्तामकरोत्। सा तु तस्मै कृतप्रणामा तां पत्रिकामुपानयत्। अथ मकरन्दस्तामादाय पत्रिकां विस्त्रस्य स्वयमेवावाचयत्।**

**संस्कृतव्याख्या–अथ** तदनन्तरं **तच्छ्रुत्वा** तस्य शुकस्य कथनं श्रुत्वा समाकर्ण्य **सहर्षं** प्रसन्नतापूर्वकम् **समुत्थाय मकरन्दः** तन्नामकः कन्दर्पकेतोः

प्रियसुहृत् **तां** शुकेन वर्णितां **तमालिकां** तन्नामिकां सारिकाम् **आहूय** स्वसमीपम् आकार्य **विदितवृत्तान्तां** विदितः ज्ञातः वृतान्तः कन्दर्पकेतोवासवदत्तानुरागरूपः तस्यात्रागमनरूपश्च यस्याः तादृशीम् **अकरोत्। सा** तमालिका **तस्मै** मकरन्दाय **कृतप्रणामा** कृतः प्रणामः अभिवादनं यया तादृशी **तां** प्रेषितां **पत्रिकां** वासवदत्तायाः प्रेमपत्रम् **उपानयत्** समर्पितवती। **अथ** अनन्तरं मकरन्दः तां पत्रिकाम् **आदाय** नीत्वा **विस्त्रस्य** उद्घाट्य स्वयमेव **अवाचयत्** अपठत्।

**( वासवदत्ताप्रेषितप्रेमपत्रवर्णनम् )**

**प्रत्यक्षदृष्टभावाप्यस्थिरहृदया हि कामिनी भवति।**
**स्वप्नानुभूतभावा द्रढयति न प्रत्ययं युवति॥**

**अन्वय**–कामिनी प्रत्यक्षदृष्टभावा अपि अस्थिरहृदया हि भवति। स्वप्नानुभूतभावा युवतिः प्रत्ययं न द्रढयति।

**संस्कृतव्याख्या–कामिनी** सानुरागा रमणी **प्रत्यक्षदृष्टभावा अपि** प्रत्यक्षं साक्षाद्रूपेण दृष्टः दर्शितः ज्ञातः वा भावः स्वाभिलाषात्मकप्रियतमाभिप्रायः यया तादृशी सती अपि **अस्थिरहृदया** अस्थिरं चञ्चलं हृदयं चित्तं यस्याः तादृशी अस्थिरचित्ता **भवति।** पुनः **स्वप्नानुभूतभावा** स्वप्ने स्वापे अनुभूतः दृष्टं ज्ञातः वा तत्प्रियतमप्रदर्शितः भावः यया तादृशी सती **युवतिः** यौवना रमणी **प्रत्ययं** विश्वांस **न द्रढयति** न दृढीकरोति। तस्याः प्रियतमं प्रति विश्वासः शिथिलीभवत्येव इति भावः।

॥श्रीः॥

# गीतगोविन्दकाव्यम्

## प्रथमः सर्गः

( सामोददामोदरः )

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-
र्नक्तं भीरुरयं त्वमेव तदिमं राधे! गृहं प्रापय।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः॥१॥

अष्टपदी १

मालवगौडरागेण रूपकतालेन गीयते॥ प्रबन्धः॥१॥

प्रलयपयोधिजले धृतवानसि वेदम्
विहितवहित्रचरित्रमखेदम्।
केशव धृतमीनशरीर
जय जगदीश हरे॥ ध्रुवपदम्॥१॥

इदानीं केलिं विवर्णयिषुर्नायकस्य वर्णनेन तद्गुणाकर्णनप्रवीणाञ्श्रोतॄन्विधातुं तदवान्तरकेलीरपि वर्णयितुं श्रीकृष्णं नायकं दशभिरवतारैस्तास्ताः केलीः कुर्वाणमुपश्लोकयति। आदितालेन गीयते। लघ्वादितालः। मालवरागेण–प्रलयेति। हे हरे! धृतमीनशरीर! केशव! जगदीश! असीति। त्वम् अखेदं विहितवहित्रचरित्रं यथा स्यात्तथा प्रलयपयोधिजले कल्पान्तसागरवारिणि वेदं धृतवान्। अतो जय॥ अत्र 'जय' शब्देन सर्वोत्कृष्टत्वम्। तेन सर्वदाऽसाधारण्येन जगत्पाहीति योजना। एवं सर्वत्रासीति तिङन्तप्रतिरूपकं पदं युष्मदर्थेऽव्ययम्। अखेदम्। अनु च। विहितवहित्रचरित्रमित्युभयमपि साधरणक्रियाविशेषणम्। तेन पोतचेष्टितमङ्गीकृत्यापि मनागप्यायासं नाप्तवानित्यर्थः। इति प्रथमं पदम्। केशव हरे जगदीश इति सम्बोधनत्रयमादरातिशयद्योतनार्थम्। अत्र 'केशव

धृतमीनशरीर जय जगदीश हरे' इति पाठः।। इति ध्रुवपदम्।। गानवेलायां केशव केशव इति द्विरुक्तिः।। अत्रार्धमागधी रीत्तिः।। अत्र केशवस्य केवलशब्दवाच्यत्वं हरिशब्दमहितकेशवशब्दवाच्यत्वम् इति व्याख्यानम्। तत्पाठमात्रमप्यजानतां प्रमादेन क्रियाविशेषणानां कर्मसंज्ञा नपुंसकता च। 'धृतमीनशरीर' इति मत्स्यावतारः। अत्रोपमातिशयोक्ती अलङ्कारौ। उत्साहस्थायिभावो वीरो रसः। दशस्वपि पदेषु धीरललितो नायकः।।१।।

क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे
धरणिधरणकिणचक्रगरिष्ठे।
केशव धृतकच्छपरूप
जय जगदीश हरे।।२।।

अथ कूर्मः। केशवेत्यादि ध्रुवपदं पूर्ववत्। 'धृतकच्छपरूप' इति कूर्मावतारकथनं विशेषः।। तवेति। तवातिविपुलतरे विशाले अतिक्रान्तं विपुलतरं तस्मिंश्च धरणीधरणेन हेतुना जातं यत्किणचक्रं तेन गरिष्ठे गौरवयुक्ते पृष्ठे क्षितिस्तिष्ठति इति भवप्रवाहस्यानादित्वादनेकवारं धरणीधरणे चिह्नबहुत्वम्। इति द्वितीयपदम्।।२।।

वसति दशनशिखरे धरणी तव लग्ना
शशिनि कलङ्ककलेव निमग्ना।
केशव धृतशूकररूप
जय जगदीश हरे।।३।।

अथ वराहः। वसतीति। धृत्तशूकररूपेति ध्रुवे विशेषः। धरणी पृथ्वी तव दशनशिखरे दंष्ट्राग्रभागे लग्ना संसक्ता वसति। केव? शशिनि चन्द्रमसि मग्ना अन्तर्गता कलङ्ककलेव। अनेन दंष्ट्राया महत्त्वं तदपेक्षया धरण्या अतिसूक्ष्मत्वं द्योतितम्। अत्रोपमालङ्कारः। इति तृतीयम्।।३।।

तव करकमलवरे नखमद्भुतशृङ्गम्
दलितहिरण्यकशिपुतनुभृङ्गम्।
केशव धृतनरहरिरूप
जय जगदीश हरे।।४।।

अथ नृसिंहः। 'धृतनरहरिरूप' इति ध्रुवे विशेषः। तव करेति। तव करकमलवरे नखमद्भुतशिखररूपं माति। किं लक्षणम्? हेतुगर्भविशेषणमाह–'दलितहिरण्यकशिपुतनुभृङ्गम्' दलितो विदारितो हिरण्यकशिपोस्तनुभृङ्गस्तनुरेव भृङ्गो येन तत्तथा। तनुभृङ्ग इत्यत्र रूपकमलङ्कारः। 'करकमलंवर' इत्यत्रापि करस्य कमलत्वेन कमलाग्रत्वारोपः। भृङ्गः किल कमलाग्रं विदारयति; अत्र कमलाग्रेण भृङ्गविदारणमित्यद्भुतोत्पत्तिः। इति चतुर्थम्॥४॥

छलयसि विक्रमणे बलिमद्भुतवामन
पदनखनीरजनितजनपावन।
केशव धृतवामनरूप
जय जगदीश हरे॥५॥

अथ वामनः। 'धृतवामनरूप' इति ध्रुवे विशेषः। छलयसीति। हे अद्भुतवामन! त्वं बलिं दानवं छलयसि वञ्चयसे। अत्र भूतेऽप्यद्यापि बलिसमीपे वर्तमानत्वात्, छलं कुर्वन्नसीती वर्तमानसामीप्याद्वा प्रवाहानादित्वेन प्रतिवामनावतारं छलनप्रारम्भापरिसमाप्तत्वाद्वर्तमानापदेशः। वामनस्याकारेण खर्वत्वाप्रभाप्राग्भारेणाविभाव्यस्वरूपत्वाददद्भुतत्वम्। क्व? विक्रमणे विक्रमत्रयकरणे। अत्र हेतुगर्भविशेषणम्। पदेति। पदनखनीरेण जनितं जनपावनं येन। इदमत्राकूतम्–बलिना वामनस्य चरणार्धे क्रियमाणे सहसा वृद्धिमाप्ते चरणार्थं यदुदकं गृहीतं तन्नखमात्र एव पर्याप्तम्। अतः पदनीरे वक्तव्ये पदनखनीर इत्युक्तिः। अथवा–तृतीये पदविन्यासे चरणाग्र एव ब्रह्मलोकमितो झटिति ब्रह्मणा दीयमानार्घजलजनित-विष्णुपादाग्रसम्भवजलेन पावन इति। अत्राद्भुतो रसः। अतिशयोक्तिरलङ्कारः। इति पञ्चमम्॥५॥

क्षत्रियरुधिरमये जगदपगतपापम्
स्नपयसि पयसि शमितभवतापम्।
केशव धृतभृगुपतिरूप
जय जगदीश हरे॥६॥

अथ परशुरामः। 'धृतभृगुपतिरूप' इति ध्रुवे विशेषः। क्षत्रियेति। एतत्पदस्य पुराणकथासापेक्षा व्याख्या। हे राम! जगत्स्नपयसि। क्व? पयसि जले। किम्भूते जले? क्षत्रियरुधिरमये क्षत्रक्षतजविकारे। परशुरामः किल क्षत्रक्षयं कृत्वा कुरुक्षेत्रे रामह्रदतीर्थे क्षत्रशोणितजलेन पितॄनतार्प्सीदिति पौराणिकाः। तत्राद्यापि जगत्स्नाति, अपगतपापं च भवति। तदेव कविराह। अत्रापि स्नानं प्रति रामशब्दस्यैव प्रवृत्तिनिमित्तत्वात्स्नपयसीति पदान्तराध्याहारेण भूतार्थालङ्कारस्थाने लये गतिश्चिन्तनीया। यस्त्वं स्नपयसि स जयेति वा। किम्भूतं जगत्? अपगतपापमिति हेतुगर्भं विशेषणम्। अत एव शमितभवतापं शमितो भवतापोऽपगतभवतापत्वादाध्यात्मिकादि-दुःखत्रयं येनेति तत्तथा। अत्र भाविनि भूतवदुपचारन्यायेन स्नानेन पापहानिः। तथा च दुःखत्रयाभिघातः। उभयमपि क्रियाविशेषणं वा। स्नपयसीति 'ग्लास्ना-' (ग०१९०) इति मित्वाद्ध्रस्वत्वम्। रुधिरमये इति विकारे मयट्। स्वभावोक्तिरलङ्कारः। अत्र बीभत्सो रसः। प्रलयेत्यादिपदषट्के धीरोद्धतो नायकः। तल्लक्षणं सङ्गीतराजे रसरत्नकोशे–'मात्सर्यदर्पभू-यिष्ठश्छद्मग्रहङ्कारवाञ्छली। चण्डो विकत्थनश्चैव धीरोद्धत उदाहृतः'॥ तद्गुणाः–दार्ढ्यं, तेजस्विता, दक्षता, धार्मिकत्वं चेति। तल्लक्षणं रसरत्नकोशे यथा– 'व्यवसायादचलनं दार्ढ्यं विघ्नशतैरपि। अधिक्षेपाद्यसहनं तेजः प्राणात्ययेष्वपि। दक्षता क्षिप्रकारित्वं धार्मिकत्वं तु तत्कृतिः'॥६॥

वितरसि दिक्षु रणे दिक्पतिकमनीयं
दशमुखमौलिबलिं रमणीयम्।
केशव धृतरामशरीर
जय जगदीश हरे॥७॥

अथ रामः। 'धृतरामशरीर' इति ध्रुवे विशेषः। वितरसीति। हे राम! त्वं वितरसि ददासि। दशमुखमौलिबलिं रावणस्य मौलय एव बलिः। 'मौलि' शब्दः शिरोवाची। अथवा–'मौलि' शब्दः किरीटे वर्तते। 'चूडाकिरीटकेशाश्च संयता मौलयस्त्रयः' इत्यभिधानात्, तथापि बलेर्मांससाध्यत्वान्मौलिशब्देन तात्स्थ्याच्छिरांसि लक्ष्यन्ते। शिरांसि छेदं दिक्पतिभ्यो बलिदानं कृतवानित्यर्थः। जगतां रक्षोपलक्षणोपद्रवोपशान्त्यै

रक्षःशिरांस्येव बलित्वेनोपहृतवानिति। कुत्र? दिक्षु। किम्भूतं बलिम्? दिक्पतिकमनीयमभिलषणीयम्। पुनः किम्भूतम्? रावणवधद्वारा लोकाभिरामत्वाद्रमणीयम्। अत्र यावन्तो दिक्पतयस्तावन्त्येव शिरांसीति कमनीयत्वे हेतुः। अत्रापि वितीर्णवानिति वक्तव्ये तत्कालापेक्षया वर्तमानापदेशो वा। यो वितीर्णवान् स त्वं जय इत्यादि कल्पनीयम्। अत्र जातिरलङ्कारः। वितरसीत्यत्र धीरोदात्तो नायकः। तल्लक्षणं रसरत्नकोशे–'कृपावानतिगम्भीरो विनीतश्चाविकत्थनः। धीरोदात्तः स विज्ञेयो रामो दाशरथिर्यथा'॥७॥

वहसि वपुषि विशदे वसनं जलदाभम्
हलहतिभीतिमिलितयमुनाभम्।
केशव धृतहलधररूप
जय जगदीश हरे॥८॥

अथ बलदेवः। 'धृतहलधररूप' इति ध्रुवे विशेषः। वहसीति। अत्र यद्यपि 'रामो रामश्च कृष्णश्च' इति कृष्णचरित्रं वर्णनीयं तथापि कृष्णस्यैवैते दशापीति कृष्णस्य नायकत्वेन वर्णनीये बलदेवोऽपि दशसु गणितः। तथा चोक्तम्–'वनजौ वनजौ खर्वस्त्रिरामी सतपोऽतपः' इति। हे राम! त्वं नीलं वसनं वहसि धत्से। किं लक्षणम्? जलदाभं मेचकम्। क्व? विशदे शुभ्रे वपुषि। तच्च यमुनयोपमीयते। हलहतिभयेन त्वामेव सेवितुमागता यमुनेव। तदिवाभातीति तदाभम्। धवलमेचकसङ्गत्या प्रयागत्वे तन्मूर्तेः पापहारित्वं कामदत्वं च व्यञ्जितम्। वहसीत्यत्र धीरललितो नायकः। तल्लक्षणम्–'कान्तापरवशो धीरललितो निश्चितो मृदुः'। अथवा–शृङ्गारी नायकः। तल्लक्षणं सङ्गीतराजे रसरत्नकोशे–'शृङ्गारी नायकस्त्वन्यः पञ्चमः कथ्यते यथा। विलासवाक्कायशीलः सुभगः स्थिरवाग्युवा। गतिः सधैर्या दृष्टिश्च सविलासस्मितं वचः'॥८॥

निन्दसि यज्ञविधेरहह श्रुतिजातम्
सदयहृदय दर्शितपशुघातम्।
केशव धृतबुद्धशरीर
जय जगदीश हरे॥९॥

अथ बुद्धावतारः। 'केशव धृतबुद्धशरीर' इति ध्रुवे विशेषः। निन्दसीति। हे सदयहृदय! त्वं यज्ञविधेः श्रुतिजातं ऋतुविधानसम्बन्धि वेदवाक्यसमूहं निन्दसि। किम्भूतम्? दर्शितपशुघातमुपदिष्टगवाश्वादिमा-रणम्। अहहेत्यद्भुते। परमेश्वरास्यैवोपदेष्टृत्वादिज्यत्वात्तत्फलदातृत्वाच्च किमपि प्रयोजनमभिसन्धाय तन्निन्दा नाश्चर्यम्। निन्दसीत्यत्र धीरशान्तो नायकः। तल्लक्षणम्–'शान्तो विनीतो धीरश्च धीरशान्तो द्विजो वणिक्'॥९॥

म्लेच्छनिवहनिधने कलयसि करवालं<br>
धूमकेतुमिव किमपि करालम्।<br>
केशव धृतकल्किशरीर<br>
जय जगदीश हरे॥१०॥

अथ कल्क्यवतारः। 'धृतकल्किशरीर' इति ध्रुवे विशेषः। म्लेच्छेति। हे हरे! म्लेच्छनिवहनिधने म्लेच्छसमूहवधनिमित्तम्। अपिः निश्चये। त्वं करवालं खड्गं कलयसि इति वितर्कयामि। 'किं' वितर्के। अन्यथा चक्रादिषु सत्सु कथं खड्गस्यैव धारणम्। किम्भूतं करवालम्? भीषणम्। किमिव? धूमकेतुमिव। म्लेच्छानामुत्पातशंसिनं धूमकेतुं ताराविशेषमिव। अथवा–धूमः केतुश्चिह्नं यस्य सः तम्। म्लेच्छकुलविनाशपिशुनमिव। उत्पाते हि वह्निर्धूमशिखो भवति, स तु प्रायेण रत्नमयो भवति। खड्गतेजो हि नीलभास्वरं भवति, अत उभयसाम्येनोपमा। म्लेच्छेत्यत्र धीरोद्धतो नायकः। तल्लक्षणमुक्तं प्राक्॥१०॥

श्रीजयदेवकवेरिदमुदितमुदारम्<br>
शृणु सुखदं शुभदं भवसारम्।<br>
केशव धृतदशविधरूप<br>
जय जगदीश हरे॥११॥

इदानीं दशभिरवतारैः कृतविस्तारभेदेन श्रीकृष्णपरत्वेनोपसंहरन्नाह। तथा च वक्ष्यति 'वेदानुद्धरते' इत्यादि। 'केशव धृतदशविधरूप, जय जगदीश हरे' इति ध्रुवे विशेषः। श्रीजयदेवकवेरिति। हे धृतदशविध-रूप! जयदेवकवेर्मम इदं स्तोत्ररूपम् उदितं भणितं शृणु मामकीनोऽयं मां स्तौतीति बुद्ध्यावधारय। किम्भूतम्? उदारम्। झटिति पदार्थार्पकम्। पुनश्च

भवसारम्। भवे संसारे सारं साररूपम्। अथवा–भवोच्छेदकहेतुमध्ये सारम्; मध्यमपदलोपित्वात्। अत एव सुखदम्; सद्यःपरनिर्वृतिहेतुत्वात्। अत एव शुभदम्; शिवेतरक्षतिहेतुत्वात्। अत्र शान्तो रसः। पर्यायोक्तिरलङ्कारः॥११॥

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते
दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान्मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः॥१२॥

इदानीं दशानामप्यवताराणामभेदं निरूप्य तत्तद्रूपं श्रीकृष्णं प्रणमति–वेदानुद्धरत इति। हे हरे! तुभ्यं कृष्णाय नमः। वेदानुद्धरत इत्यादि मीनावतारादिपदव्योख्यानेनैव निगदव्याख्यातम्। वृत्तमिदं शार्दूलविक्रीडितम्। दीपकोऽलङ्कारः। 'वेदानुद्धरते' इत्यत्र तदेषूक्ता नायकाः। अत्र प्रलयपयोधीत्याद्येकादशस्वपि पदेषु कीर्तिधवलं नाम छन्दः। तल्लक्षणं यथा–'अयुजि पदे द्वादशैव युजि तु यस्य हि दश वाष्ट मात्राश्चेत्। परमपि पदयुगमेवं तं कीर्तिधवलमिह धीराः प्राहुः॥' ध्रुवपदे तु 'षताषचौ भ्रमरः' इति भ्रमरो नाम छन्दः। 'बालभुजङ्गमललितम्' इति छन्दश्चूडामणिरपि। 'छन्दसा कीर्तिपूर्वेण धवलेन विनिर्मितः। पदान्तभोगरुचिरस्ततः पाटस्वराश्रितः॥ दशावतारकीर्त्याढ्यो धवलोऽयं प्रबन्धराट्। रागोऽत्र मध्यमादिः स्यादादितालो विलम्बितः॥ लयः स्यान्मागधी रीतिः शृङ्गारोऽत्र रसः स्मृतः। कीर्तनं वासुदेवस्य विनियोगो नृपोत्सवे॥'॥१२॥

श्रितकमलाकुचमण्डल,
धृतकुण्डल ए।
कलितललितवनमाल,
जय जय देव हरे ॥ ध्रुवपदम्॥१॥

इदानीं वर्ण्यमानं श्रीकृष्णं स्वरूपनिरूपणद्वारा मङ्गलगीतेन स्तौति। तवेदमाद्यं पदं ललितरागेण लध्वादिताल इति आदिताले गीयते॥ 'गीतमुद्ग्राह्यते येन स उद्ग्राहः प्रकीर्तितः। आभोगस्त्वन्तिम इति

ध्रुवत्वाच्च ध्रुवः स्मृतः॥' उद्ग्राहादिधातूनां विश्रामभूमित्वात्। अन्यानि च उद्ग्राहादिप्रतिरूपकाणि पदानीति प्रतिबोद्धव्यम्। एवमन्यास्वष्टपदीषु ज्ञेयम्॥ श्रितकमलेति। अत्र 'ए' काराद्यालापो ज्ञेयः। 'जय जय देव हरे' इत्यत्र ध्रुवः। श्रितं कमलायाः कुचमण्डलं येन स तथा तस्य सम्बोधनम्। धृते कुण्डले येन य तथा तस्य सम्बुद्धिः। 'ए' इति एतदन्ते रागपूर्त्ये गानवेलायां प्रतिपदं एतावत्पदम्। 'जय जय देव हरे' इति सर्वत्र ध्रुवपदम्। कलिता धृता ललिता मनोहरा आर्द्रा क्लिन्ना वनमाला पुष्पदाम येन। 'वनमम्भसि कानने' इति तज्जन्यत्वास्पुष्पाणि कमलानि वा तेषां माला॥१॥

दिनमणिमण्डलमण्डन,
भवखण्डन ए।
मुनिजनमानसहंस,
जय जय देव हरे॥२॥

दिनमणीति अत्रालापो बोद्धव्यः। मुनिजनेति। हे दिनमणिमण्डल-मण्डन भानुमण्डलालङ्करण! सवितृमण्डलमध्यवर्तित्वात्। तस्य सम्बुद्धिः। हे भवखण्डन संसारच्छेदक। 'नन्दिग्रहि–' (पा॰३।१।१३४) इत्यादिना ल्युः। 'ए' इति गानपदम्। मुनिजनेत्यादि ध्रुवः। मुनिजनानां मानसानीव मानसानि तेषु हंस इव हंसः। अथ मुनीनां मानसे ध्येयत्वाद्धंसः परम्ब्रह्म। मुनिमानस इति वक्तव्ये 'जन' ग्रहणं लोकपर्यायः। जनो लोक इति पर्यायेत्यभिधाने यावन्तो मुनय इति॥२॥

कालियविषधरगञ्जन,
जनरञ्जन ए।
यदुकुलनलिनदिनेश,
जय जय देव हरे॥३॥

कालियेति। अत्रालापः–यदुकुलेति। हे कालियाभिधसर्पदमन! तद्घातित्वाज्जनरञ्जन! बालेन महाबालेन महाविषधरदमनाज्जनानामाह्लादोऽभूत्। हे यदुकुलनलिनदिनेश! यदुकुलं नलिनमिव तत्प्रकाशकत्वात्सूर्य इव। अत्र पूर्वपूर्वस्योत्तरोत्तरं प्रति हेतुभाव इति ध्रुवः॥३॥

मधुमुरनरकविनाशन,<br>
गरुडासन ए।<br>
सुरकुलकेलिनिदान,<br>
जय जय देव हरे॥४॥

मधुमुरेति। अत्रालापः–सुरेति। मधुमुरनरकान्विनाशयति यस्तस्य सम्बोधनं–हे सुरकुलकेलिनिदान! असुरवधात्तत्कारणत्वम्। इति ध्रुवः॥४॥

अमलकमलदललोचन,<br>
भवमोचन ए।<br>
त्रिभुवनभुवननिधान,<br>
जय जय देव हरे॥५॥

अमलेति। आलापः–त्रिभुवनेति। अमलकमलदले इव लोचने यस्य स तथा तस्य सम्बुद्धिः। अपरं च–हे भवमोचन हे संसारमोचन! अथवा–भवं जन्म तस्मान्मोचनरूप जीवत्रातः। हे त्रिभुवनभवननिदान हे त्रिलोकीसमुत्पत्त्यादिकारण! इति ध्रुवः॥५॥

जनकसुताकृतभूषण,<br>
जितदूषण ए।<br>
समरशमितदशकण्ठ,<br>
जय जय देव हरे॥६॥

जनकेति। अत्रालापः–समरेति। हे जनकसुताकृतभूषण! जनकसुतायाः कृतं भूषणं येन। जितो दूषणो राक्षसो येन इति पदम्। हे समरशमितदशकण्ठ! संहारितो रावणो येन इति ध्रुवः॥६॥

**अभिनबजलधरसुन्दर,**

**धृतमन्दर ए।**

**श्रीमुखचन्द्रचकोर,**

**जय जय देव हरे॥७॥**

अभिनवेति। अत्रालापः–हे अभिनवजलधरसुन्दर, हे धृतमन्दर! निगदव्याख्यानम्। इति पदम्। हे श्रीमुखचन्द्रचकोर! श्रीमुखं चन्द्र इव तत्र चकोर इव; तन्मुखाधरसुधापानकरत्वात्। इति ध्रुवः॥७॥

**तव चरणं प्रणता,**

**वयमिति भावय ए।**

**कुरु कुशलं प्रणतेषु,**

**जय जय देव हरे॥८॥**

तव चरणे इति। उपसंहरति–हे उक्तस्वरूप श्रीकृष्ण! वयं तव चरणे प्रणताः तव चरणे कृतनमस्कारा इति भावय चिन्तय। इति पदम्। प्रणतेष्वस्मासु कुशलं कुरु। जयेत्यादि ध्रुवः। 'भू शुद्धिचिन्तामिश्रणेषु' चुरादिः परस्मैपदी। तस्य प्रयोगो भावयेति॥८॥

**श्रीजयदेवकवेरिदं,**

**कुरुते मुदम् ए।**

**मङ्गलमुज्ज्वलगीतं,**

**जय जय देव हरे॥९॥**

श्रीजयेति। अत्रालापः–मङ्गलेति। हे हरे! इदं मङ्गलं नाम गीतं गीतविशेषो मुदं प्रीतिं कुरुते। कस्य? ते तव। इति अनुप्रयुज्यमानस्यान्यापेक्षया। अथवा–इदं गीतं मे तव मुदं कुरु। कुरु ते इत्यर्थ;। अथवा–इदं मङ्गलं मङ्गलगीतं जयदेवस्य मुदं कुरुते। अमुदं मुदं ददातीति मुदं वा। ते इति काकाक्षिगोलकन्यायेनोभयत्र सम्बध्यते। अथवा–इदं गीतं गायतां शृण्वतां मुदं कुरुते। अथ ते गीतं त्वत्सम्बन्धिगीतं गायतां

शृण्वतां च मुदं कुर्वित्याशीः। तस्य श्रीजयदेवस्य कवेः। किम्भूतम्? उज्ज्वलम्। रम्यगानाद्यखिलैर्गीतगुणैर्युक्तं भीतशङ्कितादिदोषरहितम्। श्रितकमलाकुचेत्यादि। मङ्गलं नाम छन्दः। तल्लक्षणम्–'मङ्गलं मङ्गलाख्येन छन्दसा तालसंयुतम्। विलम्बितलयोपेतमुत्सवे गीयते जनैः'॥ 'एकारगणैः प्रतिपदगतैश्चैव। मङ्गलमाहुरिदं सुधियः खलु युक्तम्'॥ तथा च सङ्गीतराजे–'छन्दसा मङ्गलाख्येन खननं गद्यपद्ययोः। आलापश्च प्रतिपदं नानागमकपेशल॥ ध्रुवः प्रतिपदं रागो ललितस्ताल उच्यते। आदितालः स्वरास्त्वेताः प्रबन्धे ते प्रतिष्ठिताः॥ स हरिविजयाढ्यश्च मङ्गलाचार उच्यते'। इति हरिविजयमङ्गलाचारनामाष्टमः प्रबन्धः॥ श्रितेत्यष्टपद्यां धीरललितो नायकः शृङ्गारी वा। लक्षणमुक्तं प्राक्। जयदेवस्य रतेर्भावः॥९॥

पद्मापयोधरतटीपरिरम्भलग्नकाश्मीरमुद्रितमुरो मधुसूदनस्य।
व्यक्तानुरागमिव खेलदनङ्गखेदस्वेदाम्बुपूरमनुपूरयतु प्रियं वः॥10॥

इदानीं श्रीकृष्णं क्रीडानिदानं वसन्तं दर्शयन्भक्तानभिनन्दति खड्गादिकेन पूर्णेन वसन्तरागेण–पद्मापयोधरतटीति–अनुपूरयतु पूर्ति नयतु। किम्? प्रियं वाञ्छितम्। केषां? वो युष्माकम्। किं कर्तृभूतम्? उरो वक्षः। कस्य? मधुसूदनस्य। किम्भूतम्? पद्मायाः पयोधरौ तयोस्तटी भृगू तयोः परिरम्भेण लग्नं सक्तं काश्मीर कुङ्कुमं तेन मुद्रितं कृतमुद्रम्। एतेन स्तनयोः शैलत्वात्तच्छिखरालिङ्गनेन तयोरतिशयालिङ्गनव्याजेन जाता मुद्रा यस्मिंस्तत्। अत एव व्यक्तानुरागमिव प्रतीयमानानुरागमिव। अस्यानुरागो माऽन्यस्यां स्यादिति लक्ष्म्या मुद्रा दत्ता। अथवा–नेदं कुङ्कुमं; किन्तु हृदिस्थोऽनुरागो बहिर्भूत इव। किम्भूतम्? खेलन् अनङ्गखेदजातः सुरतश्रमजातः स्वेदाम्बुपूरो यत्र तत्तथा॥ अत्रेदमाकूतम्–अयमालिङ्गति मां परं त्वनुरागो राधायामेबेति मुद्रार्थः। तदसूचि कविना–'राधामाधवयोः' इति पूर्वपद्ये। अत्र मुग्धा नायिका। कुशलो नायकः। वसन्ततिलका वृत्तम्। आशीपर्वर्णानुप्रासालङ्कारौ उत्प्रेक्षा च। शृङ्गारो रसः। अत्र मधुसूदनस्य परमप्रेमास्पदकान्तोरःस्थलोपगूहनेन व्यक्तानुरागरूप-काश्मीरसंवलितस्य परमप्रीतिभाजनरसाद्यद्भक्तानां श्रियानुपूरण-माशीर्वचनमुक्तं ततः सुतरामौचित्यमावहति। यदुक्तम्–'पूर्णार्थदातुः

काव्यस्य सन्तोषितमनीषिणः। उचिताशीर्नृपस्येव भवत्यभ्युदयावहा'॥ इति॥१०॥

वसन्ते वासन्तीकुसुमसुकुमारैरवयवै-
भ्रमन्तीं कान्तारे बहुविहितकृष्णानुसरणाम्।
अमन्दं कन्दर्पज्वरजनितचिन्ताकुलतया
चलद्बाधां राधां सरसमिदमूचे सहचरी॥१॥

इदानीं भणितेषु मरिचावचूर्णना सा (नूनं) कटुरपि स्पृहावहेति योगमाश्रित्य विप्रलम्भपूर्वको हि सम्भोगो रसिकजनरसनीयतामापद्यत इति कविना आद्यपद्ये कथाबीजत्वेन सम्भोगस्य यद्विप्रलम्भपूर्वकत्वं सूचितं यदेव प्रकटीकुर्वन्कृष्णत्कण्ठितां राधां काप्युत्तम्भितमुखेन हरिकथया प्रोत्साहयन्त्याह–वसन्ते वासन्तीति। काचन सहचरी इदं वक्ष्यमाणं सरसं रसवत् राधामूचे उक्तवती। किम्भूताम्? वसन्ते ऋतौ अमन्दं यथा स्यात्तथा कन्दर्पहेतुज्वरजनितचिन्ताकुलतया। चलद्बाधाम्। कन्दर्पहेतुज्वरजनितचिन्ताकुलत्वेन चलन्ती यातायातं कुर्वाणा बाधा यस्याः। चिन्ताकुले हि चेतसि बाधा यात्यायाति चेति प्रसिद्धम्। किम्भूताम्? बहु अनेकधा दूत्यादिना विहितकृष्णानुसरणां तदर्थमेव कान्तारे भ्रमन्तीम्। किम्भूताम्? वासन्तीकुसुमवन्माधवीलताकुसुमवत्सुकुमारैरवयवैरुपलक्षिताम्। वसन्ते हि माधवीकुसुममुद्रिक्तं भवति। अतः कामोद्रेकसौकुमार्ये च साम्यम्। अत्र लुप्तोपमालङ्कारः। दक्षिणो नायकः। तल्लक्षणम्–'स्नेह–लौल्यमवैषम्यवशतस्तुल्यतामिषम्। नायिकास्वप्यनेकासु दक्षिणः स स्मृतो यथा'॥ विरहोत्कण्ठिता नायिका। 'उत्का भवति सा यस्याः सङ्केतं नागतः प्रियः। तस्याऽनागमने हेतुं चिन्तयत्याकुला यथा'॥ (शृ०ति०१।७५) तस्या अभिलाषो नाम दशाविशेषो यथा–'व्यवसायो भवेद्यत्र बाढं तत्सङ्गमाशया। सङ्कल्पाकुलचित्तत्वात्सोऽभिलाषः स्मृतो यथा'॥ वासन्तीकुसुमसुकुमारैरित्यत्र लुप्तोपमालङ्कारः–'वादेर्लोपे समासे वा कर्माधारक्यचि क्यङि। कर्मकर्त्रोर्णमुली' इति। वृत्त्यनुप्रासः–'एकस्याप्यसकृत्परः' इति। शिखरिणीछन्दः–'रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी'। वैदर्भी रीतिः। तस्या अत्रोपनागरिकेति संज्ञान्तरम्। यथा–'

माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकेष्यते' इति। 'वलद्बाधाम्' इति पाठे 'वलङ् सृतिसंवरणयोः' इत्यात्मनेपदी। वलङः परस्मैपदत्वं चिन्त्यम्॥१॥

ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे

मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे।

विहरति हरिरिह सरसवसन्ते

नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते॥ ध्रुवपदम्॥२॥

अभ्यत्रापि प्रयोगोऽप्यस्ति तथा। सावेवोत्तरत्रोदा दूष्णवान् पुनर्बलः (?)। केवलादिति। अमुमेवार्थं विशदयति झम्पातालेन द्रुतद्वयेन विरामान्तेन–ललितेति। विशेषणसौकर्यार्थं पूर्वं ध्रुवपदं व्याख्यायते–विहरतीति। इह राधासखी सबाधां राधां विनोदार्थं श्रीकृष्णं प्रति प्रेरयति–हे सखि राधे! सर चल । यं हरिं त्वं विलोकयसे स हरिरिह वृन्दावने वसन्ते वसन्तसमये विहरति। क्व सति? समं सशोभं साकं युवतिजने नृत्यति सति। किम्भूते वसन्ते? चलनार्थहेतुगर्भं विशेषणम्। विरहिजनस्य दुरन्ते न इति न अपि तु दुरन्ते एवेति काक्वोभयदर्शनम्। अथवा–जनो जीवनं तेन समं दुरन्ते। जीवनं वसन्तश्चोभयं विरहिणां दुःखप्राप्यं तस्मिन्। अथवा–सरसवसन्त इति पदम्। सरसः साभिलाषः स चासौ वसन्तश्च तस्मिन्। विहरति युवतिजनेन समं नृत्यति च। चकारोऽध्याहार्यः। इति ध्रुवपदम्॥ ललितेति। ललितलवङ्गलतापरिशीलनेन कोमलो मलयमारुतो यत्र वसन्त इति। एतेन शीतो मन्दः सुरभिश्चेति वायोस्त्रैविध्यमुक्तम्। अत्र लवङ्गलतासमीरयोर्नायिकात्वनायकत्वेनोद्दीपन-विभावत्वमुक्तम्। पुनः किम्भूते वसन्ते? मधुकरनिकरेण करम्बितर्मिश्रितैः कोकिलैः कूजितः शब्दितः कुञ्ज एव कुटीरोऽल्पा कुटी यत्र वसन्ते॥२॥

उन्मदमदनमनोरथपथिकवधूजनजनितविलापे।

अलिकुलसङ्कुलकुसुमसमूहनिराकुलबकुलकलापे॥विहरति०॥३॥

उन्मदमदनेति। किम्भूते वसन्ते? उद्गतौ मदमदनौ हर्षकामौ यत्र। पूर्वं भतो मनोरथो यस्य पथिकवधूजनस्य स तथा तेन जनितो विलापो यत्र वसन्ते। उद्रिक्तस्मरजनितमनोरथपथिकवधूजनस्य जनितो विलापो येन। अथवा उत्सुकमदनमनोरथेन पथिकवधूनां जनितो विलापो यत्र वसन्ते

अलिकुलव्यप्तकुसुमससमूहेन निराकुलो बकुलानां कलापः संहतिर्यत्र। बकुला एव कलापस्तूणीरो वा स्मरशरधिः। 'कलापो बर्हतूणयोः' इत्यमरः॥३॥

मृगमदसौरभरभसवशंवदनवदलमालतमाले।

युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले॥विहरति०॥४॥

मृगमदसौरभेति। मृगमदसौरभस्य रभसेन सहसा वशंवदा अनुकारिणी तद्गन्धा नवदलानां माला येषां तादृशास्तमाला यत्र वसन्ते। वा तदामोदानि नवदलानि मालन्ते धारयन्तीति। युवजनेति। युवजनस्य हृदयविदारणाय मनसिजस्य नखस्य रुचिरिव रुचिर्येषां ते तादृशाः किंशुकानां जालानि कोरका यत्र वसन्ते। अत्र कामस्य नखरायुधत्वं कविसमयेऽप्रसिद्धम्॥४॥

मदनमहीपतिकनकदण्डरुचिकेशरकुसुमविकासे।

मिलितशिलीमुखपाटलपटलकृतस्मरतूणविलासे॥विहरति०॥५॥

मदनमहीपतीति। अत्रालापः। कामराजस्य हेमदण्डच्छत्रसन्निभं बकुलकेसरपुष्पं तस्य विकासो यत्र। अत्र केवलकनकदण्डस्य छत्रेऽवाच-कत्वान्महीपतिशब्दसाहचर्यादविरोधः। अथवा हेमदण्डरुचीनि केसराणीति योज्यम्। महीपतेरग्रे कनकवेत्रधारिणो भवन्ति। मिलितेति। सङ्गतशिलीमुखैः पाटलपटलैः पाटलाकुसुमसमूहैः। अथवा पाटलिपटलेति पाठः। कृतः स्मरशरधिविलासोऽनुकारो यत्र। शिलीमुखा भ्रमरा बाणाश्च। 'अलिबाणौ शिलीमुखौ' इत्यभिधानात्॥५॥

विगलितलज्जितजगदवलोकन्दतरुणकरुणकृतहासे।

विरहिनिकृन्ततकुन्तमुखाकृतिकेतकदन्तुरिताशे॥विहरति०॥६॥

विगलितेति। लज्जैव लज्जितम्। भावे क्तः। गतलज्जजगदवलोकनेन तरणैः करुणैः कृतः कुसुमविकासव्याजेन हासो यत्र। विरहिनिकृन्तनकुन्तमुखा-कारैः केतकैर्दन्तुरिता विषमीकृता आशा दिशो यत्र। निकृन्तनमित्ति चिन्त्यम्॥६॥

माधविकापरिमलललिते नवमालिकयातिसुगन्धौ।

मुनिमनसामपि मोहनकारिणी तरुणाकारणबन्धौ॥ विह०॥७॥

माधविकापरिमलेति। किम्भूते वसन्ते? वासन्त्याः परिमलेन गन्ध-विशेषेणल लिते मनोहरे। पुनः किम्भूते? नवमालिकया जात्यातिसुगन्धौ। पुनः किम्भूते? मुनिमनसामपि मोहनकारिणि व्यामोहकारके तरुणानां का कथेति। सुरतार्थ प्रेरके वा। पुनः किम्भूते? तरुणानामकारणबन्धौ निसर्गमित्रे। वसन्ते हि कामिन्यः स्वयमेव मानं त्यजन्ति॥७॥

स्फुरदतिमुक्तलतापरिरम्भणमुकुलितपुलकितचूते।

वृन्दावनविपिने परिसरपरिगतयमुनाजलपूते॥ विह०॥८॥

स्फुरदतिमुक्तलतेति। किम्भूते वसन्ते? स्फुरन्त्याश्चलन्त्या अतिमुक्तलताया वासन्त्याः परिरम्भणेन मुकुलितः पुष्पितः पुलकितः जातरोमाञ्चश्च चूतः। अत्र पुष्पाणि रोमाञ्चेनोपमीयन्ते। अनेन सात्विकभावो दर्शितः। वृन्दावनेति। अत्र पूर्वं ध्रुवपदे इह वने हरिर्विहरतीत्यष्टपद्या एकवाक्यत्वात् विहाराधेयत्वे वृन्दावनशब्दो व्याख्यातः। सम्प्रति वसन्तविशेषणत्वेन व्याक्रियते। किम्भूते वसन्ते? वृन्दावनविपिने। वृन्दमवतीति वृन्दावनं तद्वि पिनं यस्मिन्स तथा तस्मिन् परिसरे पर्यन्तभुवि परिगतं यद्यमुनाजलं तेन पूते ॥८॥

श्रीजयदेवभणितमिदमुदयति हरिचरणस्मृतिसारम्।

सरसवसन्तसमयवनवर्णनमनुगतमदनविकारम्॥ विह०॥९॥

श्रीजयदेवभणितमिति। तेनेति मङ्गलवाचकम् । ततः पाटावाद्यक्षरोत्तरः। ततः स्वरः षड्जादिः। इदं श्रीजयदेवभणितं सरसवसन्तसमय-वर्णनमुदयति उदयं प्राप्नोति सर्वोत्कृष्टत्वेन वर्तते। सरसं शृङ्गाररसयुक्तं वसन्तकालीनवनवर्णनं यत्र। सर्वोत्कृष्टत्वे हेतुमाह। हरिचरणस्मृतिरेव सारं यत्र। वा हरिचरणस्मृत्या हेतुभूतया सारम्। अथवा हरिचरणयोः स्मृतिश्चिन्तनं सारमुत्कृष्टं यत्र। सरसवसन्तत्वे हेतुमाह। अनुगतो मदनविकारो यत्र येन वा अनुगतोऽनुस्यूतः॥ अस्यामष्टपद्यां जातिरलङ्कारः। मध्या नायिका। गुर्जरीरागेण ऋषभादिना। दक्षिणो नायकः। तल्लक्षणं प्रागुक्तम्। विप्रलम्भाख्यः शृङ्गारो रसः। लयो नाम छन्दः। तल्लक्षणम्–'मुनियगणैर्लयमामनन्ति तज्ज्ञाः' इति। तदुक्तं छन्दश्चूडामणौ चलय इति। विप्रलम्भविभावप्रसङ्गाद्वायुं वर्णयति–'रचितो गद्यपद्याद्यैर्वसन्ते पार्थिवोत्सवे। वसन्तरागे झम्पाख्यताले

मध्यलयाश्रिते।। गमकालप्तिभूयिष्ठः पूर्णकल्पः प्रकीर्तितः। पूतौ पुनस्तेन पाटस्वराश्रितविराजितः।। माधवोत्सवः कमलाकरनामा प्रबन्धराट्'।।९।।

दरविदलितमल्लीवल्लिचञ्चत्पराग-

प्रकटितपटवासैर्वासयन्काननानि।

इह हि दहति चेतः केतकीगन्धबन्धुः

प्रसरदसमबाणप्राणवद्गन्धवाहः ।।१०।।

दरेति। इह वने वसन्ते वा गन्धवाहो वायुश्चेतो दहति। अर्थाद् विरहिणाम्। किम्भूतं चेतः? प्रसरत्, अर्थान्मनोरथं प्रति। पुनः किम्भूतम्? असमबाणप्राणवत्कामस्य जीवितमिव। अथवा प्रसरदसमबाणप्राण-वद्गन्धवाह इति पदम्। प्रसरता असमबाणेन प्राणवांश्चासौ गन्धवाहः। वा प्रसरन्योऽसावसमबाणः तस्य प्राणवज्जीवितमिव। प्राणवतो वा। किम्भूतो वायुः? केतकीगन्धसहचरः। किं कुर्वन्? काननानि वासयन्। कैः? ईषद्वि-कसितमल्लीनां जातीलतानां चञ्चन्तो गच्छन्तो ये परागास्तैः प्रकटिता ये पटवासाः वासचूर्णानि तैः। 'ननमयययुतेयं मालिनी भोगिलोकैः' इति मालिनीछन्दः। अत्र समासोक्तिवर्णानुप्रासोपमालङ्कारः। विप्रलम्भाख्यः शृङ्गारो रसः। पाञ्चाली रीतिः। अत्र विरहिहृदयविदारणपटीयसः पवनस्य त्रैविध्येन चेतोदाहकत्वोपन्यासेन युवतिजनस्य आत्मसात्कर्तृत्वेन यत्स्मरप्राण-वत्वमुदितं तदौचित्यसरणिसागरप्लवनतरणित्वमातनोतितराम्। यदभाणि क्षेमेन्द्रेण (औ॰वि॰११)–'तिलकं बिभ्रती सूक्तिर्भात्येकमुचितं पदम्। चन्द्राननेव कस्तूरोकृतं श्यामेव चान्दनम्'।। इति।।१०।।

उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-

क्रीडत्कोकिलकाकलीकलरवैरुद्गीर्णकर्णज्वराः।

नीयन्ते पथिकैः कथङ्कथमपि ध्यानावधानक्षण-

प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ।।११।।

उन्मीलदिति। पथिकैरमी वसन्तसमयवासराः कथङ्कथमिव महता कष्टेन नीयन्ते। कैः कृत्वा? ध्यानावधानक्षणे प्रियानुचिन्तनैकाग्रताप्रस्तावे प्राप्तो यः प्राणसमासमागमरसोऽनुरागस्तस्य प्रकटीभावैः। अथवा रसस्योल्लासो

येष्विति पथिकविशेषणम्। किम्भूता वासराः? उन्मीलन्योऽसो मधुगन्धः पुष्परसगन्धस्तत्र लुब्धा ये मधुपा भ्रमरास्तैर्व्याधूता आन्दोलिता ये चूताङ्कुरास्तेषु क्रीडन्तो ये कोकिलास्तेषां काकल्युपलक्षितकलरवैरुद्गीर्ण उत्पादितः कर्णज्वरो यैस्ते तथा। कोकिलो वसन्तमासे पञ्चमं वदतीति स्थितिः। अत्र च चूतधूननेन मधुपे रोषावेशान्निषादकालीमुक्तवानित्याशयः। अथवा कथङ्कथमपीति ध्यानेनेत्यादिना योज्यम्। ततो विरहिणो ह्यनवस्थितचित्तत्वाद् ध्यातुमपि न शक्नुवन्ति। शार्दूलविक्रीडितं छन्दः। अत्र काव्यलिङ्गमलङ्कारः। गौडीया रीतिः। विप्रलम्भाख्यशृङ्गारो रसः। अत्र कामोद्दीपनविभावैः कोकिलकाकलीकलरवाद्यैः सञ्जनितकर्णज्वरत्वेन प्राणसमसमागमाकाङ्क्षित्वेन विरहासहिष्णुत्वापेक्षया यद्वासराणां कर्मगतं बहुत्वमापादितं तत्सुतरामौचित्यकोटिमाटीकते॥११॥

अनेकनारीपरिरम्भसम्भ्रमस्फुरन्मनोहारिविलासलालसम्।

मुरारिमारादुपदर्शयन्त्यसौ सखी समक्षं पुनराह राधिकाम्॥१॥

अनेकेति। असौ सखी राधां पुनर्वक्ष्यमाणमाह। किं कुर्वती? आरात्समीपे समक्षं प्रत्यक्षं यथा स्यात्तथा मुरारिं दर्शयन्ती दृष्टिपथमवतारयन्ती। अनेकनारीणां परिरम्भसम्भ्रमेण त्वरया स्फुरन्तो मनोहारिणो ये विलासास्तेषु लालसा यस्य, तेषु लालस उत्सुको वा। 'वदन्ति वंशस्थविलं जतौ जरौ' इति वर्णसाम्यमनुप्रासः। दक्षिणो नायकः॥१॥

चन्दनचर्चितनीलकलेवरपीतवसनवनमाली।

केलिचलन्मणिकुण्डलमण्डितगण्डयुगस्मितशाली॥२॥

हरिरिह मुग्धवधूनिकरे विलासिनि विलसति केलिपरे ॥ध्रुव०॥

तदेव गीतेन दर्शयति झम्पातालेन–चन्दनचर्चितेति। पदानां बाहुल्यात्पूर्वं ध्रुवपदं व्याक्रियते–हरिरिति। हे राधे हे विलासिनि! इह मुग्धवधूनिकरे हरिर्विलसति। कीदृशे निकरे? केलिपरे। पुनः कीदृशे? विलासिनि विलासो विद्यते यस्य। एकस्यैवोभयविशेषणत्वम्। इति ध्रुवः। अथ पदानि। चन्दनेत्यादि। चन्दने चर्चितमनुलिप्तम्। चर्चिस्तु यद्यप्यध्ययने वर्तते तथापि धातूनामनन्तार्थत्वादनुलेपे वर्तत इति। तथा चोक्तम्–'क्रियावाचि समाख्यातुं प्रसिद्धार्थप्रदर्शिनः। प्रयोगत्तोऽनुमन्तव्या

अनेकार्था हि धातवः'॥ इति। नीलं कलेवरं शरीरं यस्य, पीतं वसनं यस्य, वनमाला विद्यते यस्य, ततः कर्मधारयः। अथवा चन्दनेन चर्चिते नीलकलेवरे पीतवसने वनमालाश्च विद्यन्ते यस्यासौ तथा। चन्दनेन चर्चिते ये नीलकलेवरपीतवसने तयोर्वनं संसक्तिरचनाविशेषस्तं मलते धारयतीति स तथा। केल्या चलन्ती ये मणिकुण्डले ताभ्यां मण्डितं गण्डयुगं यस्य स तथा। तथा स्मितशाली स्मिताढ्यः ईषद्धसितयुक्त इति द्वे पदे। अथवा द्वे पदे कृत्वा कर्मधारयः। अथवा ईदृशं गण्डयुगं च स्मितं च ताभ्यामाढ्यः। अथवा गण्डयुगे स्मिताढ्य इति तन्मात्रणैवानुमेयं स्मितं नास्य प्रसारणेन॥२॥

पीनपयोधरभारभरेण हरिं परिरभ्य सरगम्।
गोपवधूरनुगायति काचिदुदञ्चितपञ्चमरागम् ॥हरि॰॥३॥

अथ परस्परं गोपिकानां केलिचेष्टितमाह–पीनपयोधरेति। काचिद् गोपवधूर्हरिं गायन्तं हरिमनुगायति वंशकृत्येन गायति। किं कृत्वा? सरागं साभिलाषं तमेव हरिं परिरभ्य। किम्भूता? पीनपयोधरभारभरेणो-पलक्षिता। अथवा विपुलस्तनभारातिशयेन परिरभ्य। किम्भूतं हरिम्? सरागं तदालिङ्गनसाभिलाषम्। पुनः किम्भूतम्? उदञ्चित आ तारावध्यूर्ध्वं नीतः पञ्चमरागो येन वा, उदञ्चितः पञ्चमस्वरोपलक्षितो रागो ये वा उदञ्चितः, पञ्चामरागोऽनुरागो येन; अथवा उदञ्चितपञ्चारागं यथा स्यात्तथेति गानक्रियाविशेषणम्। शृङ्गारे हि पञ्चमभूयिष्ठस्य गानस्य प्राधान्यात्, अथवा उदञ्चितहृद्यरांग यथा स्यात्तथा॥३॥

कापि विलासविलोलविलोचनखेलनजनितमनोजम्।
ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजम् ॥हरि॰॥४॥

कापि विलासेति। कापि मुग्धवधूरधिकं सातिशयं यथा स्यात्तथा मधुसूदनवदनसरोजं ध्यायति। अधिकं सुखमधिकृत्य वा। किम्भूतम्? विलासेन चेष्टाविशेषेण विलोले चञ्चले ये विलोचने तयोः खेलनेनावर्तनेन जनित उत्पादितो मनोजो येन। अत्र सरोजे योजितो मधुसूदनशब्द औचितीमावहति। 'सूद स्त्रुतिहत्योः' इति मुखसरोजान्मधु स्त्रवतीत्यतिशयाधानम्॥४॥

कापि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले।
चारु चुचुम्ब नितम्बवती दयितं पुलकैरनुकूले ॥ हरि०॥५॥

कापि कपोलतले इति। कापि नितम्बवती दयितं श्रीकृष्णं कपोलतले गण्डप्रदेशे चारु मनोहरं यथा स्यात्तथा चुचुम्ब। किम्भूता? सखीषु चातुर्यात्किमपि कार्यान्तरं लपितुं श्रुतिमूले लग्ना। किम्भूते श्रुतिमूले? अनुकूलेऽभिमुखमानीते। किम्भूते कपोलतले? रोमाञ्चोपलक्षिते। हरेः सात्त्विकभावेन रोमाञ्चोद्गमः। अत्रानुगन्तुमशक्ता कार्यान्तरकथनव्याजेन हरिं स्थापयतीति नितम्बवतीत्युचितम्। सखीषु दयितचुम्बनं लज्जाकरमिति कार्यान्तरव्याजौचिती। अत्र प्रौढा नायिका। अनुकूलो नायकः॥५॥

केलिकलाकुतुकेन च काचिदमुं यमुनाजलकूल।
मञ्जुलवञ्जुलकुञ्जगतं विचकर्ष करेण दुकूले ॥हरि०॥६॥

केलिकलेति। काचिद् गोपी केलिकलाकुतुकेन क्रीडाविज्ञानकौतुकेनामुं कृष्णं करेण दुकूले विचकर्ष। किम्भूतम्? यमुनावनकूलेमञ्जुल-मनोहरवञ्जुलबकुलकुञ्जगतम्, बेतसकुञ्जं वा यमुनाया विपिनोपलक्षिततीर इत्यर्थः। अत्र चकारोऽनुक्तसमुच्चयार्थः। तेन परिहासाद्युच्चीयते। 'यमुनाजलतीरे' इति पाठः। अत्र यमुनातीर इति वक्तव्ये 'जल' ग्रहणं शैत्यपावनत्वसन्निकर्षादिद्योतनार्थम्॥६॥

करतलतालतरलवलयावलिकलितकलस्वनवंशे।
रासरसे सहनृत्यपरा हरिणा युवतिः प्रशशंसे ॥ हरि०॥७॥

करतलेति। हरिणा कृष्णेन कापि युवतिः प्रशशंसे स्तुता। किम्भूता? रासरसे गोपीनां क्रीडानुरागे सहनृत्यपरा कृष्णेन सह तुल्यकालं नृत्यन्ती। किम्भूते रासरसे? करतल योस्तालस्तालिका तया तरला या वलयावलिर्हस्तकटकश्रेणिस्तया कलितोऽनुगतः कलस्वनो वंशो यत्र यस्मिंस्तथा। अथवा–'अङ्गनामङ्गनामन्तरे माधवः' इममर्थं प्रकटयति॥७॥

श्लिष्यति कामपि चुम्बति कामपि कामपि रमयति रामाम्।
पश्यति स स्मितचारुतरामपरामनुगच्छति वामाम् ॥हरि०॥८॥

एकस्यैव हरेः प्राकाम्यसिद्ध्या सर्वाभिः सहैककालं क्रीडनमाह–श्लिष्यतीति। सः हरिः रासरसे क्वचित्कामपि अन्ययाऽन्यया सह उक्तरीत्या क्रीडति। रामेति रमणशीला तां रमयति। स्मितचारुतरेति रसदृष्टेरुपलक्षणम्। स्मिते हि रतिभाव उल्बणो भवतीति। 'वामाम्' इत्यनुनयेऽपि पराङ्मुखीत्वम्। तामनुगमनेन साधयतीति चातुर्यम्। अथवा–नानारूपाणि विधाय तया तया सह तया तयावस्थया क्रीडितवान्। अथवा–सममेवैकामाश्लिष्य तामाश्लिष्यन्नेव परां चुम्बति। तत्कुर्वन्नेवान्यां रमयति। चेष्टाविशेषेण तदैवान्यां पश्यति। अन्यामनुगच्छतीत्यनुकरोतीति योज्यम्। श्लिष्यतीत्यादिषु क्रमेण शठधृष्टदक्षिणानुकूलधूर्ता नायकाः। नायिकास्तु अभिसारिका एव॥८॥

श्रीजयदेवभणितमिदमद्भुतकेशवकेलिरहस्यम्।

वृन्दावनविपिने ललितं वितनोतु शुभानि यशस्यम् ॥ हरि०॥९॥

उपसंहरति–श्रीजयदेवेति। अत्र स्वरा ऋषभाद्याः पाटाः। श्रीजयदेवकवेरिदमद्भुतकेशवकेलिरहस्यम् अद्भुतं च तत्केशवकेलिरहस्यं च तच्चरितं शुभानि वितनोतु। अर्थाद् गायतां शृण्वतां च। किम्भूतम्? यशस्यं यशस्करम्। क्व? वृन्दावनविपिने। अत्रैकेनानेकासामुपरञ्जनादद्भुतत्वम्। लयो नाम छन्दः। तल्लक्षणम्–'मुनियगणैर्लयमामनन्ति तज्ज्ञाः'। तदुक्तं छन्दश्चूडामणौ 'चिलय' इति॥९॥

विश्वेषामनुरञ्जनेन जनयन्नानन्दमिन्दीवर-
श्रेणीश्यामलकोमलैरुपनयन्नङ्गैरनङ्गोत्सवम्।
स्वच्छन्दं व्रजसुन्दरीभिरभितः प्रत्यङ्गमालिङ्गितः
शृङ्गारः सखि! मूर्तिमानिव मधौ मुग्धो हरिः क्रीडति॥१०॥

इदानीं काचित्सखी राधां प्रति कृष्णस्यातिशयशृङ्गारशालितादर्शनव्याजेन तदुन्मुखीकर्तुमाह–विश्वेषामिति। हे सखि राधे! मधौ वसन्ते मुग्धः सुन्दरो हरिः क्रीडति। क इव? मूर्तिमान् शृङ्गाररस इव। 'पुरुषः प्रमदायुक्तः शृङ्गार इति संज्ञितः'। किं कुर्वन्? अनुरञ्जनेनानुरागेण विश्वेषां सर्वेषाम् आनन्दं जनयन् हरिः शृङ्गारश्च। पुनश्च किं कुर्वन्? अङ्गैरनङ्गोत्सवमुपनयन्नुपस्थापयन्। किम्भूतैरङ्गैः?

इन्दीवरपङ्क्तिश्यामलकोमलैर्नीलोत्पलराजिवच्छ्यामलसुकुमारैः। पुनः किम्भूतः? व्रजसुन्दरीभिरभितः प्रत्यङ्गमालिङ्गितः प्रतिप्रतीकमाश्लिष्टः। अभितः सर्वतः कथम्? स्वच्छन्दं यथा स्यात्तथा। अथवा यद्यदङ्गं यया यया समासादितं तत्तत्तया तया समालिङ्गितमिति प्रतिप्रतीकशब्दार्थः। अत्र दीपकमलङ्कारः। वैदर्भी रीतिः। शार्दूलविक्रीडितं छन्दः। शृङ्गारो रसः। वाक्यौचित्यं च 'चन्दनचर्चिते' त्यत्र उत्कण्ठिता नायिका। तल्लक्षणम्- 'प्रिये कृतव्यलीकेऽपि विरहोत्कण्ठितोन्मनाः'॥१०॥

नित्योत्सङ्गवसद्भुजङ्गकवलक्लेशादिवेशाचलं
प्रालेयप्लवनेच्छयानुसरति श्रीखण्डशैलानिलः।
किं च स्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदया-
दुन्मीलन्ति कुहूःकुहूरिति कलोत्तालाः पिकानां गिरः॥११॥

श्रीखण्डशैलानिलो मलयाचलपवनः ईशाचलं हिमाद्रिमनुसरति याति। ईशश्चासावचलश्चेति। अथवा–ईशायाः पार्वत्याः गुरुरचलः, मध्यमपदलोपाद् टाब्विधानाद् वा ईशोपलक्षिताचल इति। अथवा–ईशाचलं कैलासमनु लक्ष्यीकृत्य सरति। कया? प्रालेयप्लवनेच्छया हिमावगाहनेच्छया। अत्रोत्प्रेक्षितं हेतुमाह–नित्येति। नित्यमुत्सङ्गे वसन्तो ये भुजङ्गा एव भुजङ्गकास्तेषां यद्वलनं तस्मात्, तत्र वा यः क्लेशः तस्मादिव। अथ भुजङ्गकाद्यद्वलनं तेन यो जायमानः क्लेशः तस्मादिव। अथवा–कवलनं कवलो दशनं तस्मात्। सर्पदष्टो हि तत्तापोपचेशान्तये शीतलेच्छुर्भवति। किं चेति विभावान्तरमाह। पिकानां कोकिलानां कुहूः इति गिर उन्मीलन्ति प्रादुर्भवन्ति। किम्भूताः? कलोतालाः कलाश्च ता उत्ताला उदीर्णाः। कुतः? हर्षोदयात्। किं कृत्वा? स्निग्धानि यानि रसालमौलिषु मुकुलानि चूताशिरःसु कुड्मलास्तानालोक्य। अथवा–स्निग्धानि रसालानां मोलिमुकुलानि चूतशिरांसि अशोकानां च मुकुलानीत्यालोक्य। हर्षोदयादिति क्रिययोरेककर्तृकत्वात्पूर्वकालता। शार्दूलविक्रीडितं वृत्तम्। अत्र वर्णानु-प्रासोपमाहेतवोऽलङ्काराः। वैदर्भी रीतिः। अत्र विप्रलम्भाख्यशृङ्गारसूचको रत्साख्यः स्थायीभावः। अत्र विरहिमनःशरीरकर्तनकुशलानां स्निग्धरसालमौलिमुकुलानामा-लोकनेन जातहर्षाणां पिकानां गिरां

तद्वैरीन्दुविलुण्टाककुहूरूपेण यदुन्मीलनलक्षणं यथा क्रियास्वरूपनिरूपण ामकारि तन्तिरामौचित्यकोटिमालम्बते। उक्तं च–'सगुणत्वं सुवृत्तत्वं साधुता च विराजते। काव्यस्य सुजनस्येव यद्यौचित्यवती क्रिया॥' इति॥११॥

रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवा-
मभ्यर्णं परिरभ्य निर्भरमुरः प्रेमान्धया राधया।
साधु त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुति-
व्याजादुद्भटचुम्बितः स्मितमनोहारी हरिः पातु वः॥१२॥

इदानीं सर्गान्ते कविराशिषमाशास्ते–रासोल्लासेति। हरिर्वो युष्मान्पातु। किम्भूतो हरिः? राधया गीतस्तुतिव्याजात् अमृतमयमुखनिर्गतत्वात् इदं गीतममृतमेवेति मिषेण व्याहृत्य उत्कटं यथा स्यात्तथा चुम्बितः। इतीति किम्? साधु युक्तमेतत् यद्गीतममृतकल्पम्। यतस्त्वद्ववनं सुधामयम्। अत्र विकारे मयट्। अत्रान्यनारीसन्निधौ चुम्बनमयुक्तमिति गीतस्तुतिव्याजोक्तिः। किं कृत्वा? निर्भरं गाढं यथा स्यात्तथोरः परिरभ्य। क्व? आभीरवामभ्रुवां गोपाङ्गनानामभ्यर्णं समीपे। किम्भूतानां वामभ्रुवाम्? रासो गोपक्रीडा तस्योल्लासः संहर्षप्रादुर्भावस्तस्य भरेण विलासवतीनाम्। किम्भूतो हरिः? स्मितेनान्यनारीणां मनो हर्तुं शीलं यस्य स तथा। अथवा–अन्यनारीसमीपे आलिङ्गनं लज्जावहमिति तत्परिजिहीर्षया राधाया हेतुगर्भं विशेषण-माह–प्रेमान्धयेति। 'कामान्धः किञ्चिन्न पश्यति' इति वचनादतिप्रेम्णा व्याकुलयेत्यर्थः। अत्र विप्रलम्भः शृङ्गारः। आशीरप्रस्तुतप्रशंसाव्याजो-क्त्याक्षेपहेतवोऽलङ्काराः। प्रगल्भा नायिकाः। मुग्धो नायकः। अत्र 'तरुमिव कमितारं चुम्बनार्ताधिरोढुं यदभिलषति नारी तच्च वृक्षाधिरूढम्॥' इति कृत्वा वृक्षाधिरूढमाश्लेषः। 'आभीरजाश्चुम्बनहार्यचित्ताः' इति, 'नमितकमिदमाहुर्योषितो यद्बलेन प्रियमुखमभिवक्त्रं न्यस्य तिष्ठन्त्युदास्याः' इति रतिरहस्यात् नमितकं नाम चुम्बनविशेषः। शार्दूलविक्रीडितं छन्दः। अत्र राधाया वीरायितेनोत्साहात्मकस्य वीररसस्याविर्भावात्तदुपयोगिनी आरभटी वृत्तिः। द्वित्रिपदे तु पाञ्चाली रीतिः। अर्धमागधी गीतिश्चेति। स्थितलयं गानम् ॥१२॥

# द्वितीयः सर्गः
## ( अक्लेशकेशवः )

विहरति वने राधा साधारणप्रणये हरौ
विगलितनिजोत्कर्षादीर्ष्यावशेन गताऽन्यतः।
क्वचिदपि लताकुञ्जे गुञ्जन्मधुव्रतमण्डली-
मुखरशिखरे लीना दीनाप्युवाच रहः सखीम्॥१॥

धन्नासीरागेण गीयते॥

भुवनेशपादकमलं प्रणम्य कुम्भो नृपतिरतिविमलम्।
जयदेवरचितमातुं युनक्ति युक्तेन धातुना गातुम्॥

इदानीं हरेरभिलाषेर्ष्यारूपदोलारूढचित्ता राधा सखीमाह। पूर्वसर्गेऽभिलाषचिन्तारूपं दशाद्वयं निरूप्य स्मरणलक्षणदशाप्रदर्शनार्थं द्वितीयसर्गारम्भः॥ विहरतीति। राधा सखीं रहोऽपि गोप्यमप्युवाच। यद्यपि लताकुञ्जे स्वरहस्यं वक्तुं नोचितं तथापि स्मरपारवश्यविह्वलतया गोप्यागोप्यं नाज्ञासीत्। क्व सति? साधारणप्रणये सकलगोपिकासु समानस्नेहे हरौ वने वृन्दावने विहरति सति। किम्भुता राधा? विगलितनिजोत्कर्षादन्यस्त्रीभ्यो निजातिरेकापगमादीर्ष्यावशेनासहिष्णुतयान्यतो गता। यत्र स्थिता अन्याभिः क्रीडन्तं न पश्यतीति। अत्रार्थे पुनर्विशेषमाह–गत्वापि क्वचिदपि कुञ्जे लीना। किम्भूते कुञ्जे? झङ्कारपरभ्रमरश्रेण्या वाचालाग्रभागे। अत एव दीना; अत्रापि तैरधिककामोद्दीपनात्। अत्र 'रसयुगहयैर्न्सौ म्नौ स्लौ गो यदा हिरणी तदा' इति हरिणी छन्दः। विरहासहिष्णुतालक्षणे विप्रलम्भो रसः। रतेरेवात्युद्रेकाद्रसवदलङ्कारता। वर्णसाम्येनानुप्रासश्च। प्रौढा नायिका। अत्र गलितनिजोत्कर्षवशाद् दीनस्य वचनाशक्तेर्यत्सखीं प्रति रहस्यकथनम् 'अपि' शब्देन द्योत्यते तन्नितरामौचित्यचमत्काराय। यदाह–'उचितस्थानविन्यस्तैर्निपातैरर्थसङ्गतिः। उपादेयैर्भवत्येव सचिवैरिव निश्चला॥' इति श्लोकोक्तमेवार्थं विशिनष्टि वर्णयति। तालेन–'लघुश्चैको द्रुतद्वयम्' इति॥१॥

सञ्चरदधरसुधामधुरध्वनिमुखरितमोहनवंशम्।

चलितदृगञ्चलचञ्चलमौलिकपोलविलोलवतंसम्।

रासे हरिमिह विहितविलासम्

स्मरति मनो मम कृतपरिहासम्॥ ध्रुवपदम्॥२॥

सञ्चरदिति। तत्र पूर्वं ध्रुवपदं व्याक्रियते–रासेति। हे सखि! मे मनो हरिं स्मरति स्मरतीति स्मृतेः पूर्वानुभूतार्थविषयत्वाद् दृष्टचरस्य हरेश्चरितं साक्षात्करोति। इह क्रीडावने रासे गोपक्रीडायां विहितो विलासो विभ्रमो येन स तं तथा। कथं? यथा भवति कृतपरिहासं कृतनर्मकेलि यथा स्यात्तथेति ध्रुवः। अथ पदानि। तत्राद्यं पदम्–सञ्चरदिति। सञ्चरन्त्या सङ्क्रममाणयाऽधरसुधया मधुरो ध्वनिर्यत्र तद्यथा स्यात्तथा मुखरितो मोहनो मोहकारी तन्नामा वंशो येन। अत एव चलितदृगञ्चलं नेत्रप्रान्तं यथा स्यात्तथा चञ्चलो यो मौलिः शेखरः शिरो वा तेन कपोलयोर्विलोलौ वतंसौ यस्य स तथा। किमुक्तं भवति? शिरःकम्पदोषं विना शेखरकुण्डलचालने वादकवैचित्री। अथवा–वंशश्रवणाच्चलितदृगञ्चला या गोप्युस्तासु चञ्चलो यो मौलिस्तेन कपोलविलोलवतंसम्। अत्राधरसुधापानेन तदाननस्य चन्द्रादप्यानन्दकत्वं द्योतितम्॥२॥

चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशम्।

प्रचुरपुरन्दरधनुरनुरञ्जितमेदुरमुदिरसुवेशम्॥ रासे०॥३॥

चन्द्रकेति। चन्द्रकचारुमयूरशिखण्डानां मण्डले सङ्घाते वलयाकारेण वेष्टिताः केशा यस्य। तथा प्रचुरं धनं पुरन्दरधनुषानुरञ्जितो मेदुरः सान्द्रस्निग्धो मुदिरो मेघस्तद्वत्सुवेशो दर्शनीयस्तम्॥३॥

गोपकदम्बनितम्बवतीमुखचुम्बनलम्भितलोभम्।

बन्धुजीवमधुराधरपल्लवमुल्लसितस्मितशोभम्॥ रासे०॥४॥

गोपेति। गोपसमूहस्य नितम्बवतीनां पृथुनितम्बानां मुखचुम्बनेन लम्भितः प्रापितो लोभो येन। अर्थान्मुखस्य। अथवा–गोपाङ्गनानां मुखचुम्बनेन लम्भितो लोभो येन; अथवा–गोपवधूचुम्बने लम्बितो लम्बीकृतो लोभो येनेति पाठान्तरं युक्तम्। अपि च–बन्धुजीववत् मधुरो मनोहरोऽधरपल्लवो यस्य। अपि च–उल्लसिता स्मितेन शोभा यस्य तम्॥४॥

विपुलपुलकभुजपल्लववलयितसहस्त्रम्।

करचरणोरसि मणिगणभूषणकिरणविभिन्नतमिस्त्रम्।। रासे॰।।५।।

विपुलेति। विपुलपुलकौ पृथुरोमाञ्चौ यौ भुजौ तौ पल्लवाविव ताभ्यां वलयितं वलयीकृतं बल्लवयुवतीनां गोपाङ्गनानां सहस्त्रं येन। पुनश्च करौ च चरणौ च उरश्च तेषां समाहारः करचरणोरः। प्राण्यङ्गत्वात्समाहारः। 'अमूर्धमस्तकात्स्वाङ्गादकामे' ( पा॰६।३।१२ ) इति सप्तम्या अलुक्समासः। तत्र स्थितानां मणिगणभूषाणां किरणैर्विभिन्नं तमिस्त्रं येन स तथा।।५।।

जलदपटलचलदिन्दुविनिन्दकचन्दनतिलकललाटम्।

पीनपयोधरपरिसरमर्दननिर्दयहृदयकपाटम्।। रासे॰।।६।।

जलदेति। जलदपटलं धनसमूहः तं वलतः सम्भजमानस्येन्दोश्चन्द्रस्य विनिन्दकश्चन्दनतिलको ललाटे यस्य, वर्तुल इति यावत्। केचिच्चलदिति पठन्ति, तत्र जलदपटलं गच्छत इति व्याख्येयम्। तत्पक्षे वंशे वाद्यमाने मूर्ध्नः कम्पेन ललाटे तिलकं चलदिव दृश्यते। अत्र ललाटस्य श्यामत्वात्तिलकस्य गौरत्वान्मेघचन्द्राभ्यामुपमानोपमेयभावः। अपि च–पीनौ घनौ यौ स्तनौ तन्मण्डलमर्दने निर्दयं हृदयकपाटं यस्य। चलदित्यत्रापि तवैव।।६।।

मणिमयमकरमनोहरकुण्डलमण्डितगण्डमुदारम्।

पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारम्।। रासे॰।।७।।

मणिमयेति। मणिमये मकराकारे मनोहरे ये कुण्डले ताभ्यां मण्डितोऽलङ्कृतो गण्डो यस्य। अपि च–उदारं दक्षिणम्। किञ्च पीते वसने यस्य। किञ्च अनुगत आश्रितो मुनिमनुजसुरासुरलक्षणो वरपरिवारो यस्य तम्।।७।।

विशदकदम्बतले मिलितं कलिवलुषभयं शमयन्तम्।

मामपि किमपि तरलतरङ्गदनङ्गदृशा मनसा रमयन्तम्।। रासे॰।।८।।

विशदेति। विशदकदम्बतले मिलितम्। अर्थान्मुन्यादिभिरुपस्थितम्। अत एव कलिकलुषभयं शमयन्तं पापं नाशयन्तम्। पुनः किं कुर्वन्तम्? मनसा करणभूतेन तरलतरङ्गदनङ्गदृशा तरला चासौ तरङ्गादनङ्गा च, तरङ्गान्सम्मूर्च्छन्ननङ्गो यत्र तथाविधया दृष्ट्या मामपि रमयन्तम्।

अपीति गोपीश्च। अत एव कलिकलुषभयं कलहकालुष्यभयं शमयन्तम्। अत्र तरङ्गदनङ्गेति सरसदृष्टिरुक्ता॥८॥

श्रीजयदेवभणितमतिसुन्दरमोहनमधुरिपुरूपम्।

हरिचरणस्मरणं प्रति सम्प्रति पुण्यवतामनुरूपम् ॥ रासे०॥१॥

श्रीजयदेवेति। अत्रालापस्तेन पाटः। हरिचरणस्मरणं प्रति हरेः कृष्णस्य चरणं रासक्रीडाद्याचरणं तस्य स्मरणं प्रति इदं श्रीजयदेव-भणितम्। राधया अष्टपद्यादौ स्मरति मनो ममेत्यादि भणितम्। सम्प्रति इदानीमपि पुण्यवतामनुरूपं योग्यम्। सतां हरिचरणस्मरणे हेतुर्भवतीति यावत्। किम्भूतम्? अतीव सुन्दरम्। तथा मोहनमधुरिपो रूपं यत्र तत्तथा। अत्र 'मुनियगणैर्लयमामनन्ति' इति लयो नाम छन्दः। अत्र सर्वा अपि जातयो रासा भवन्तीति केचित्। यदाह–'सयलाउ जाईउ एत्थावसेण एत्थ वत्तंति। रासा बंधो रसायणं विट्टगोट्ठीसु'॥९॥

गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते

वहति च परितोषं दोषं विमुञ्चति दूरतः।

युवतिषु वलत्तृष्णे कृष्णे विहारिणि मां विना

पुनरपि मनो वामं कामं करोति करोमि किम्॥१॥

इदानीं राधा तदेव रहस्यं भङ्ग्यन्तरेणाह–'रागो धन्यासिको यत्र तालो वर्णयति स्मृतः। चम्पूबन्धप्रयोगान्ते गमकानेकविस्तरः॥ तदन्ते स्युः स्वरास्तेनाः पाठः शुचिरसाञ्चिताः। प्रबन्धोऽयं मुररिपोः पुरस्ताद्रत्न-कण्ठिका॥' इति। स चायं मधुरिपुरत्नकण्ठिका नाम पञ्चमः प्रबन्धो भैरवरागेण गीयते। गणयतीति। हे सखि! मम चित्तमद्यापि पुनरपि कृष्ण कामं करोति। तर्हि वद किं करोमि। किं विशिष्टे? युवतिषु गोपीषु वलत्तृष्णे। वलन्ती सम्भजमाना तृष्णा स्पृहा यस्य तस्मिन्। अपि च मां विना विहारिण्यपि क्रीडाशीलेऽपि। अत्र 'अपि' शब्दः पुनर्योज्यते। किं विशिष्ट चेतः? वामं मयि विपरीतचरितम्। विपरीतत्वे हेतुमाह–यतः कृष्णस्य सापराधस्यापि गुणसमूहं गणयति कृतानप्यपराधांस्त्यक्त्वा; अपि च–भ्रमादपि भ्रान्तिं प्राप्यापि कोपं नेहते न चेष्टते। पुनरसन्तोषकाले

परितोषं वहति। अपि च–सन्तमपि दोषं दूरतो विमुञ्चति। नीरागजने सानुरागम्। अत एव वामम्। इयमुत्कण्ठिता नायिका। तल्लक्षणम्– 'उद्दाममन्मथमहाज्वरवेपमानां रोमाञ्चकण्टकितमङ्गकमावहन्तीम्। संवेद-वेपथुघनोत्कलिकाकुलाङ्गीमुत्कण्ठितां वदति तां भरतः कवीन्द्रः'॥ 'उत्का भवति सा यस्या वासके नागतः प्रियः। तस्यानागमने हेतुं चिन्तयन्त्याकुला यथा'॥ अत्र हरिणीवृत्तम्। यमकं शब्दालङ्कारः संशयदीपकार्थालङ्कारौ क्रियौचित्यं च॥१॥

निभृतनिकुञ्जगृहं गतया निशि रहसि निलीय वसन्तम्।
चकितविलोकितसकलदिशा रतिरभसभरेण हसन्तम्।
सखि! हे केशिमथनमुदारम्
रमय मया सह मदनमनोरथभावितया सविकारम्॥ ध्रुवपदम्॥२॥

इदानीं कामज्वरसन्तप्तहृदया राधा सख्यां दूतीत्वमारोप्य कृष्णेन सहानुसन्धानमभिलवन्ती आह वर्णयति तालेन–निभृतेति। पूर्वं ध्रुवपदं व्याक्रियते–सखि हे इति। हे सखि! मया सह केशिमथनं कृष्णं रमय कामकेलीः कारय। किम्भूतम्? उदारं महान्तम्। किम्भूतया मया? सविकारं नानाविकारसहितम्, विकारः कामजो भावः कुचोदरादिप्रकटनम्; तदुक्तं रसिकसर्वस्वे–'नाभीमूलकुचोदरप्रकटनव्याजेन यद्योषितां साकाङ्क्षं मुहुरीक्षणं स्खलितता नीवीनिबन्धस्य च। केशभ्रंशनसंयमौ चकमितुर्मित्रादिसन्दर्शनैः सौभाग्यादिगुणप्रशस्तिकथनंस्तत्सानुरागे-ङ्गितम्॥' इति। रतिचेष्टासहितं यथा स्यात्तथा मदनमनोरथभावितया कामकेलीच्छाभावितान्तःकरणया। अथवा–कथोपलक्षितं रमयेति कृष्णविशेषणत्वेनाह–मदनमनोरथानां भावो विद्यते यस्मिन् स भावी तस्य भावो भाविता तया। किमुक्तं भवति? यथाऽहं तस्मिन्नभिलाषवती तथा सोऽपि मयि स्यादिति भावः। एवं शृङ्गाररसः सम्पन्नो भवति। तथा चोक्तम्–'चेष्टा भवति पुन्नार्यो रत्युत्थानातिसक्तयोः। सम्भोगो विप्रलम्भश्चास शृङ्गारो द्विधा मतः'॥ अथवा–किम्भूतं हरिम्? सविकारम्। मानसभावसहितमिति कृष्णविशेषणम्। इति ध्रुवः। अथ पदानि। निभृतेति। तमेवोभयनिष्ठं भावं सूचयन्त्याह–किम्भूतया मया? निभृतनिकुञ्जगृहं

गतया विविधकुञ्जगेहं गतया। 'वश्यः प्रणेयो निभृतविनीतप्रश्रिताः समाः' इत्युक्तत्वात्तथाप्यवसरोचितं व्याख्यातव्यम्। एतेनाभिसारस्थानमुक्तम्। तदुक्तं भरतेन–'विवाहे तीर्थयात्रादौ बन्धनोत्सबके तथा। नटनृत्ये तथा केलौ जागरोद्यानसङ्गतौ। असतीसङ्गमकुले रत्युत्पाताद्युपप्लवे। चौरिकयाभिसारः स्यात्स्वदारानिह रक्षयेत्'।। निशि रात्रौ। अपि च किम्भूतम? रहसि गुप्तस्थाने निलीय तिरोभूय वसन्तम्। अपि च किम्भूतया? चकितेन विलोकिताः सकला दिशो यया सा। 'कुत्र कृष्णो वसति' इति गवेषितुमभिसरन्ती 'सख्यो मां मा द्राक्षुरिति' लज्जया त्रासोत्कम्पेनेति। अपि किम्भूतम्? रत्युत्साहवशेन हसन्तम्।।२।।

प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलम्।

मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलम्।। सखि॰।।३।।

अपि च–प्रथमेति। उपभुक्तचरेऽपि हरौ प्रथमसमागम इव लज्जितया तत्कालीनाश्चेष्टाः कुर्वन्त्या वा। बहुकालान्तरितमिलितेन प्रथमसमागमता अपि। किम्भूतम्? पटुचाटुशतैरनुकूलं सान्त्वनक्षमप्रियवचनशतैरनुनयपरम्। एतदुक्तं भवति–'प्रथममिह हि देयं पूगपुष्पादिकं स्यान्मृदुमधुरवचोभिर्योजयेत्सन्निधाने। करतलमथ गात्रे भ्रामयन्शश्वदस्याश्छुरितमुदरपृष्ठे मन्दमाश्लिष्य दद्यात्।।' प्रथमसमागमे कामिन्यो लज्जन्त्ये मानमावहन्ति। तथा च–'श्लिष्टः कण्ठे किमिति न मया मूढया प्राणनाथश्चुम्बत्यस्मिन्वदनविकृतिः किं कृता किं न दृष्टः। नोक्तः कस्मादिति नववधूचेष्टितं चिन्तयन्ती पश्चात्तापं वहति तरुणी प्रेम्णि जाते रसज्ञा।।' इति भरतः।। अपि किम्भूतया? अत एव मृदु मधुरं यथा स्यात्तथा स्मितपूर्वं भाषणं यस्याः सा तया। अपि किम्भूतम्? शिथिलीकृतजघनदुकूलं श्लथीकृतं जघनस्थितं पट्टवस्त्रं वा। अन्तर्भावितणिजर्थत्वात् श्लथीकरणे सङ्गमस्य हेतुत्वम्। सङ्गमादेव श्लथमभवदिति। तदुक्तं भरतेन–'कान्ते तल्पमुपागते शिथिलिता नीवी स्वयं बन्धनाद्वासो विश्लथमेखलागुणधृतं किञ्चिन्नितम्बस्थितम्। एतावत्सखि! वेद्मि केवलमहं तस्याङ्गसङ्गे पुनः कोऽसौ कास्मि रतं च क्रीदृशमिति स्वल्पापि मे न स्मृतिः।।'।।३।।

किसलयशयननिवेशितया चिरमुरसि ममैव शयानम्।
कृतपरिरम्भणचुम्बनया परिरभ्य कृताधरपानम्॥ सखि०॥ ४॥

अपि च–किसलयेति। किसलयरचिते शयने निवेशितया। 'सङ्केततल्पेऽभिमुखोपविष्टां गाढं पतिः श्लिष्यति, सापि कान्तम्। अन्योन्यगात्रे विशतीव रागाद् द्वन्द्वं तदाकृष्टजलाभिधानम्॥' अपि च–ममैवोरसि चिरं शयानम्। एतच्चालिङ्गनभेदापेक्षयोक्तम्। तथा च कोकोक्तम्–'असकृदतनुगाढाश्लेषलीलां वितन्वञ्जनितजघनबाहुव्यत्ययं स्पर्धते तम्। मिथुनमथ मिथोऽङ्गे लीयते निस्तरङ्गं निगदंति तिलपूर्वं तण्डुलं तन्मुनीन्द्रः'॥ अपि च–कृते परिरम्भणचुम्बने यया सा। एतदप्यालिङ्गनभेदापेक्षयोक्तम्॥ 'जघनकलितकान्तश्रोणिरथ्यो-परिष्टाद्व्रजति यदिह नारी स्रस्तकेशोत्तरीया। करजरदनकृत्यं चुम्बनं वा विधित्सुः कलयति जघनोपश्लेषणं तन्मुनीन्द्रः'॥ अपि च–आश्लिष्य कृतमधरपानं येन। अत्रायं भावः–'अधरदशनजिह्वापानमालिङ्ग्य कुर्यान्नयनवदनपार्दश्चेति जिह्वाप्रवारम्। ग्रहणमथ विदध्याद्व-स्त्रकेशस्तनोरःकुचयुगभगदेशे मर्दनं चोरुयुग्मे'॥ इति॥४॥

अलसनिमौलितलोचनया पुलकावलिललितकपोलम्।
श्रमजलसकलकलेवरया वरमदनमदादतिलोलम्॥ सखि०॥५॥

अपि च–अलसेति। अलसे च ते निमीलिते च तादृशे लोचने यस्याः सा। एतेनालिङ्ग ( ङ्गि ) ककामविकारः सूचितः। तथा च नायिका-लक्षणे–'यत्र मूर्धानमारभ्य पादपर्यन्ततः क्रियाः। अङ्गेन विहिता यस्मात्तस्माढाङ्गिकमुच्यते'॥ अपि च–पुलकावल्या रोमाञ्चपङ्क्त्या सुन्दरकपोलम्। अनेन सात्त्विकविकाराविर्भावः सूचितः। यदुक्तं भरतेन–'स्मरणे सङ्गमे चैव प्रियस्यालोकने तथा। हेतुत्रयं समासाद्य सात्त्विकः सम्प्रवर्तते॥ स्वेदः कम्पोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः। वैवर्ण्यमश्रुप्रलयावित्यष्टौ सात्विका मताः'॥ अपि च श्रमजलेन गमनायासजनितेन स्वेदेन सकलं सशोभं शरीरं यस्याः सा। 'श्रमजलसिक्तम्' इति वा पाठः। श्रमजलशकलानि स्वेदबिन्दवः कलेवरे यस्या इति वा।

'सकल' शब्दः सम्पूर्णपर्यायो वा। अपि च–उत्तमकाममदादतिलोलम् अतिसतृष्णम्॥५॥

कोकिलकलरवकूजितया जितमनसिजतन्त्रविचारम्।

श्लथकुसुमाकुलकुन्तलया नखलिखितघनस्तनभारम्॥ सखि०॥६॥

अपि च–कोकिलेति। कोकिलकलरवयोः कूजितमिव कूजितं यस्याः। 'कलरव' शब्दः पारावतपर्यायः। एतदपि सुरताधिकारायोक्तम्। तदुक्तं रसिकसर्वस्वे–'दात्यूहलावकमयूरकपोतहंसपारावतादिरुतवद् ध्वनितं रतान्ते। तन्मिश्रनिःश्रसितसीत्कृतहानिनादैः संयोजयेन्मदनचुम्बनमैथुनादौ'॥ इति। अपि च–जितो न्यक्कृतः कामशास्त्रविचारो येन। वात्स्यायनादिभ्योऽपि कुशल इत्यथः। अपि च–श्लथकुसुमा आकुला व्यस्ताः कुन्तला यस्याः सा। अपि च–नखैर्विलिखितोऽङ्कितो निबिडः स्तनभारो येन। एतेन बाह्यरतमुक्तम्। तदुक्तं भरतेन–'आश्लेषचुम्बननखक्षतताडनानि सम्मर्दनं प्रसरणं खलु शिक्षितानि। जिह्वाप्रवेशरसनग्रहणं तु नाभीक्षोभं रतं वदति बाह्यरतानि तज्ज्ञः'॥ इति॥६॥

चरणरणितमणिनूपुरया परिपूरितसुरतवितानम्।

मुखरविशृङ्खलमेखलया सकचग्रहचुम्बनदानम्॥ सखि०॥७॥

अपि च–चरणेति। चरणयोः रणितौ शब्दितौ मणिनूपुरौ यस्याः। ग्राम्याख्यबन्धसूचनायोक्तमिदम्। तदुक्तं रसिकसर्वस्वे–'उत्तानितायाः सुरते यदोरू स्त्रीशीर्षकान्तोरुगतौ भवेताम्। ग्राम्यं तदा स्यात्कटितो यदास्य। बहिर्भवेतः किल नागराख्यम्॥' परिपूरितः सम्पूर्णतां नीतः सुरतवितानः सुखावसरां प्रस्तावो वा येन। अपि च–मुखरा वाचाला विशृङ्खला काञ्ची यस्याः। अथवा 'सुखदविशृङ्खलमेखलया' इति पाठः। अपि च–सकचग्रह केशग्रहणेन सहितं चुम्बनदानं यस्य॥७॥

रतिसुखसमयरसालसया दरमुकुलितनयनसरोजम्।

निःसहनिपतिततनुलतया मधुसूदनमुदितमनोजम्॥ सखि०॥८॥

अपि च–रतिसुखेति। रतिसुखसमये द्वयोरेककालं रेतःकणक्षरणसमये यो रसः तदेकाग्रीभावस्तेन अलसा मन्थरा। एतेन च्युतिसुखसान्निध्यं सूचितम्।

उक्तं च रसिकसर्वस्वे–'मुहुश्च स्वजनाश्लेषः सीत्कारो वीतलज्जता। अङ्गावधूननं नार्याश्च्युतिसान्निध्यसूचकम्'।। अपि च–दरमुकुलिते ईषन्निमीलिते–नयनसरोजे यस्य येन वा। एतच्च च्युतिकालसूचकम्। उक्तं च भरतेन–'मूर्च्छना मीलनं चाक्ष्णोश्च्युतिकालस्य सूचकम्। सर्वमेतत्परिज्ञाय साधयेच्च स्वयं ततः।।' अपि च निःसहा असमर्था निपतिता शयन एव तनुलता यस्याः। एतेन विपरीतसुरतं सूचितम्। तदुक्तं कोकेन–'स्वेच्छया मिलितवल्लभोऽथवा योषिदारति पूरुषायितम्। आदितो घटितयन्त्रमेव वा तं निपात्य नरवद्विचेष्टते।। चक्रवद्‌भ्रमति कुञ्चितत्रिका भ्रामयेच्च जघनेऽथ तद्‌गते। सर्वतः कटितटभ्रमो यदि प्रेङ्खपूर्वमिदमुक्तमुन्नतम्'।। एतेन च्युतिकालोत्तरावस्था सूचिता। तदुक्तं भरतेन–'अङ्गे स्वेदः श्लथत्वं च केशवस्त्रादिसंवृतिः। जाते च्युतिसुखे नार्या विरामेच्छा च गम्यते'।। अपि च–मधुसूदनं मधुविनाशिनम्। उदितमनोजमभ्युदितकामम्।।८।।

श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलम्।

सुखमुत्कण्ठितगोपवधूकथितं वितनोतु सलीलम्।। सखि०।।९।।

अपि च–श्रीजयदेवेति। इदं गीतप्रतिपादितप्रमेयकव्युत्तम्भितवक्तुत्वे-नोत्कण्ठितगोपवधूकथितं राधाकथितं सुखं वितनोतु। अर्थात् गायतां शृण्वतां च। किं विशिष्टम्? श्रीजयदेवेन भणितम्। जसदेवभणि-तरूपमित्यर्थः। श्रीजयदेवेति सर्वत्र श्रियः पद्मावत्या आराधको जयदेवः श्रीजयदेव इति मध्ममपदलोपी समासः। पुनः किम्भूतम्? अतिशयेन मधुरिपोर्निधुवनशीलं सुरतचरितं यत्र तत्तथेति। उत्कण्ठितेत्यादि। उत्कण्ठिता नायिका। विप्रलम्भः शृङ्गारः। अत्र लयश्छन्दः।।९।।

हस्तस्त्रस्तविलासवंशमनृजुभ्रूवल्लिमद्‌बल्लवी-

वृन्दोत्सारिदृगन्तवीक्षितमतिस्वेदार्द्रगण्डस्थलम्।

मामुद्वीक्ष्य विलज्जितं स्मितसुधामुग्धाननं कानने

गोविन्दं व्रजसुन्दरीगणवृतं पश्यामि हृष्यामि च।।१०।।

इदानीं मनसा भावितं परमेश्वरं दृष्ट्वा सखेदमाह–हस्तस्त्रस्तेति। हे सखि! 'बत' इति खेदे (?)। अहं कानने वृन्दावने गोविन्दं

पश्यामि व्यलीकं हृष्यामि च। किं विशिष्टं गोविन्दम्? व्रजसुन्दरीगण-वृतं गोपाङ्गनासमूहयुक्तम्। पुनः किम्भूतम्? स्मितसुधामधुरमाननं यस्य तम्। पुनः किम्भूतम् मामुद्वीक्ष्य मां दृष्ट्वा हस्तात्त्रस्तः पतितो विलासवंशः केलिवेणुर्यस्य। अत एव विलज्जितं विह्वलीभूतम्। पुनः किम्भूतम्? अतिस्वेदेनार्द्रं गण्डस्थलं यस्य। 'गण्डस्थलाम्' इति पाठे मामित्यस्य विशेषणम्। सञ्जातसात्त्विकभावां मां दृष्ट्वा सोऽपि सञ्जातसात्त्विकभाव इति हस्तस्त्रस्तेति युक्तम्? पुनः किम्भूतम्? अनुजुभ्रुवल्लिमद्बल्लवीवृन्दोत्सारिदृगन्तवीक्षितम्। कुटिलभ्रूवल्लियुतानां बल्लवीनां वृन्दे उत्सारि ऊर्ध्वप्रसरणशीलं दृगन्तवीक्षितं कटाक्षेक्षणं यस्य। अथवा–अनृजुभ्रूवल्लिमद्बल्लवीवृन्देन उत्सारिणा दृगन्तेन वीक्षितम्। एतावता राधां प्रति तस्य स्वभावावलोकनं दृष्ट्वाऽन्याभिरपसृतम्। अत्र शार्दूलविक्रीडितं छन्दः। तथा दीपकमलङ्कारः। विप्रलम्भशृङ्गारो रसः। अत्र व्रजसुन्दरीपरिवृतत्वेऽपि यत् आत्मौपाधिकदर्शनस्य लज्जिताहेतुत्वेन हर्षदर्शनकर्म अतोऽपादानमौचितीमावहति। पाञ्चाली रीतिः। लाटानुप्रासश्च। दक्षिणो नायकः। अन्यत्सर्वं समानम्॥१०॥

दुरालोकस्तोकस्तबकनवकाशोकलतिका-
विकासः कासारोपवनपवनोऽपि व्यथयति।
अपि भ्राम्यद्भृङ्गीरणितरमणीया न मुकुल-
प्रसुतिश्चूतानां सखि! शिखरिणीयं सुखयति॥११॥

इदानीं पुनरेव विप्रलम्भविभावानाह–दुरालोक इति। हे सखि! दुरलोकः स्तोकस्तबकनवकाशोकलतिकाविकासः मां व्यथयति। दुःखेनालोक्यते विरहिभिरिति दुरालोकः। दुरालोकः स्तोकोऽल्पकः स्तबको गुच्छो यस्याः साः। अशोकलतिकायाः विकासः अशोकलतिकाविकासः। नव एव नवकः। प्रशंसायां कः। नवकश्चासावशोकलतिकाविकासश्च। दुरालोकस्तोकस्तबकश्चासौ नवकाशोकलतिकाविकासश्च सः। अपि च–अयं कासारोपवनपवनो व्यथयति। न केवलं सः पवनोऽपीति। 'कासारः सरसी सरः'। अथवा 'दुरालोक' इत्यादिपवनविशेषणत्वेन

योजनीयम्। दुरालोकस्तोकस्तबका चासौ नवकाशोकलतिका चेति तां विकासयति स इति कर्मण्यण्। अथवा–अशोकतलिकाया विकासो यस्मादिति। एतेन वायोस्त्रैविध्यमुक्तम्। अपि च–न केवलं पवनः, अपि तु चूतानां मुकुलप्रसूतिरपि न सुखियति। कीदृशी मुकुलप्रसूतिः? शिखरिणी साग्रा। पुनः कीदृशी? भ्राम्यद्भृङ्गीरणितरमणिया। भ्राम्यन्त्यः परितः स्फुरन्त्यो या भृङ्ग्यो भृङ्गाङ्गनास्तासां रणितेन शब्दितेन रमणीया। अत्र मधुलिडङ्गनाग्रहणं पुरुषान्तराभिलाषनिवृत्त्या औचितीमावहति। अत्र शिखरिणी वृत्तम्। समुच्चयोऽलङ्कारः। लाटानुप्रासः शब्द। लङ्कारश्च क्रियौचित्यं च। विप्रलम्भः शृङ्गारो रसः। सर्वत्र स्थितिलया गीतिः। मागधी गौडीया च रीतिः॥११॥

साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासित-
भ्रूवल्लीकमलीकदर्शितभुजामूलोर्ध्वहस्तस्तनम्।
गोपीनां निभृतं निरीक्ष्य गमिताकाङ्क्षश्चिरं चिन्तय-
न्नन्तूर्मुग्धमनोहरं हरतु वः क्लेशं नवः केशवः॥१२॥

इदानीं सर्गान्ते कविर्भक्तजनानाशास्ते–साकूतेति। केशवो हरिर्वो युष्माकं क्लेशं हरतु। किं लक्षणः? गमिताकाङ्क्षः गमिता नाशं नीता आकाङ्क्षाऽभिलाषो येन स तथा। अर्थात् गोपीषु। किं कुर्वन्? चिरं निभृतं यथा स्यात्तथा निरीक्ष्यान्तर्हृदये चिन्तयन्। किं निरीक्ष्येत्यपेक्षायामाह–साकूतस्मितं साभिप्रायमीषद्धसितम्। पुनः किम्? आकुलाकुलगलद्धम्मिल्लम्। आकुलकुलं कामोद्रेकाद्रोमाञ्चोद्गमा-दिहेतुना गलद्धम्मिल्लं विगलत्केशबन्धम्। पुनः किम्? उल्लासितभ्रूवल्ली-कमुत्क्षिप्तभ्रूवल्लीकम्। पुनः किम्? अलीकदर्शितभुजामूलोर्ध्वहस्तस्तनम्। भुजायाः मूलं भुजामूलं, भुजामूले ऊर्ध्वो यौ हस्तौ भुजामूलोर्ध्वहस्तौ। अलीकं दर्शितौ भुजामूलोर्ध्वहस्ताभ्यां स्तनौ यत्र कर्मणि तत्। कासामित्यपेक्षायामाह–गोपीनाम्। तच्चतुष्टयं हेतुगर्भवत्त्वेन विशिनष्टि–मुग्धमनोहरमिति। मुग्धानां मूर्खाणां मनो हरतीति न मत्सदृशस्येति गमिताकाङ्क्षत्वे हेतुः। तदेवाग्रिमे सर्गे प्रकटयिष्यति। 'राधामाधाय हृदये तत्याज व्रजसुन्दरीः' इत्यादिना। अत एव नवः सकलपुमपेक्षया

चरितविशेषेण नवोऽन्यादृश इव 'सुभाषितेन गीतेन युवतीनां च लीलया। चेतो न भिद्यते यस्य स वै मुक्तोऽथ वा पशुः॥' इति वचनात्। अथवा–नूयते स्तूयते इति नवः। अथवा–नवस्तरुणः। तरुणं दृष्ट्वा कामिनीनां कामचेष्टा जायत एव। अथवा–तस्मिन्पक्षे गोपीनां निभृतं भावं निरीक्ष्येति व्याख्येयम्; तदा साकूतस्मितेत्यादि चतुर्णा-मपि पदानां भावविशेषणपक्षे निक्षेपः। मुग्धमनोहरमिति क्रियाविशेषणम्। अत्र विदग्धो नायकः। समुच्चयाशिषावलङ्कृती। शार्दूलविक्रीडितं वृत्तम्। परिकरोऽलङ्कारश्च। अत्र यत्सकलकामिनीकामपूरकस्य कामजनकस्य विलासवतीविलासादिभिरगृह्यस्य यन्नवत्वविशेषणे-नान्यादृशत्वमुपपादितं तद्विचार्यमाणमौचित्यचारुतामाचरति। यदाहुः–'विशेषणैः समुचितैर्विशेष्यार्थः प्रकाश्यते। गुणाधिकैर्गुणोदारः सुहृद्भिरिव सज्जनः॥' इति॥१२॥

# तृतीयः सर्गः

## ( मुग्धमधुसूदनः )

कंसारिरपि संसारवासनाबन्धशृङ्खलाम्।

राधामाधाय हृदये तत्याज व्रजसुन्दरीः॥१॥

गेयानुगुणैरधिकैरधिगतं तनुते धातुं बुधसम्मतम्।

नत्वा विधिमिह सुरवरनतं कुम्भनरेशोऽलङ्कृतियुतम्॥

इदानीं राधायाः कृष्णेऽनुरागं निरूप्य कृष्णस्यापि राधायामनुरागं दर्शयन्नाह गौडकृतिरागेण—कंसारिरिति। कंसारिरपि व्रजसुन्दरीस्तत्याज। न केवलं राधैव कृष्णसक्ता ब्रभूव, किन्तु कृष्णोऽपि राधासक्तो बभूवेत्यपिशब्दार्थः। किं कृत्वा? राधां हृदये आधायारोप्य। किम्भूतां राधाम्? संसारवासनाबन्धे शृङ्खलेव शृङ्खला। अत्र 'तक्वजोर्ज' इति पथ्या छन्दः॥१॥

इतस्ततस्तामनुसृत्य राधिकामनङ्गबाणव्रणखिन्नमानसः।

कृतानुतापः स कलिन्दनन्दिनीतटान्तकुञ्जे विषसाद माधवः॥२॥

इदानीं कृष्णस्य विरहावस्थाचेष्टितमाह—इतस्तत इति। स माधवोऽनङ्गबाणव्रणखिन्नमानसः सन् विषसाद विषादं चकार। किं कृत्वा? कलिन्दनन्दिनीतटान्तकुञ्जे इतस्ततस्तां राधामनुसृत्यान्विष्य। किं विशिष्टः? कृतानुतापः पूर्वमेव मया कथं नानुनीतेति कृतपश्चात्तापः। अत्र कुञ्जेष्विति वक्तव्ये बहुष्वपि परिभ्रमन् तदार्तिवशादेकमेवाज्ञासीदित्येक-वचनम्। वंशस्थवृत्तम्॥२॥

मामियं चलिता विलोक्य वृतं वधूनिचयेन।

सापराधतया मयापि न वारिताऽतिभयेन।

हरि हरि हतादरतया गता सा कुपितेव॥ ध्रुवपदम्॥३॥

उक्तमर्थं गीतेन स्पष्टयति—तत्र पूर्वं ध्रुवपदम्। हरीति। हरि हरीति खेदे। सा राधा कुपितेव गता। कया? हतादरतया। हतो विनाशित

आदरो बहुमानस्तस्य भावस्तया। इति ध्रुवः। अथ पदानि। मामियमिति। मां वधूनिचयेन वृतं विलोक्य गतेति ध्रुवपदेनैकवाक्यत्वात्सम्बन्धः। किम्भूता? तादृशी मया चलितापि सापराधतया न वारिता न निषिद्धा। इह साकूतम्। तस्या गमने हेतुं जानन्नपि सापराधोऽस्मि। कथमेतस्या अग्रे मयातिभयेन वक्तुं पार्यत इति बुद्ध्या अतिशयितं भयं यस्येति मयेत्यस्य विशेषणम्। करणे तृतीया। अतिक्रान्तं भयमिति वधूनिचयविशेषणं वा। अथवा–मामेवं विलोक्य सा चलितापि मया न वारिता। हरि हरि गतेति विषादाभिनयेन योज्यम्॥३॥

किं करिष्यति किं वदिष्यति सा चिरं विरहेण।

किं धनेन जनेन किं मम जीवितेन गृहेण॥ हरि हरि०॥४॥

किमिति। इदानीं मदपराधे मन्निमित्तमेव सा विषादं भुङ्क्ते इति आत्मसमत्वेन तामपि गणयन्नाह–सा किं करिष्यतीति। मयि मिलिते कोपेर्ष्यादिकं कथं विधास्यतीत्यर्धोक्त्या। तदन कृतापराधं मां चरणपतितं दृष्ट्वा किं वदिष्यतीत्यपि चार्धोक्त्या। अहमुत्तरं दास्यामीत्याह–किं जनेनेति। गोपीजनेन। किं धनेनेति। धनमप्यकिञ्चित्करं कृत्वा जीवितं निन्दति। जीवितफलं किम्? सुखमपि त्वदृते नान्यदिति वाक्यशेषः। किं विशिष्टा सा? विरहेण उपलक्षिता। अथवा–मम विरहेणाक्रान्ता सा किं वदिष्यतीत्यादि। ममापि तां विना किं धनादिनेति योजनीयम्॥४॥

चिन्तयामि तदाननं कुटिलभ्रु कोपभरेण।

शोणपद्ममिवोपरिभ्रमताकुलं भ्रमरेण॥ हरि हरि०॥५॥

चिन्तयामीति। अहं तदाननं चिन्तयामि। किम्भूतमाननम्? कोपभरेणार्थान्मयि कुटिलभ्रु। कुटिले कुञ्चिते भ्रुवौ यत्र। किमिव? शोणपद्ममिव। उपरिभ्रमता भ्रमरेणाकुलम्। अत्र कोपारक्तमुखं पद्मेनोपमीयते। भ्रमरेण कुटिले कोपावेशपरिस्फुरमाणे भ्रुवाविति। अत्र वाक्यार्थोपमालङ्कारः। तथा च–'तदाननमधीराक्षमाविद्धं शतबीधिति। भ्रमद्भृङ्गमिवालक्ष्य केसरं भाति पङ्कजम्॥' इति॥५॥

तामहं हृदि सङ्गतामनिशं भृशं रमयामि।

किं वनेऽनुसरामि तामिह किं वृथा विलपामि॥ हरि हरि० ॥६॥

तामहमिति। अहम् अनिशमनवरतं हृदि सङ्गतां हृदये मिलितां तां भृक्षमत्यर्थ रमयामि। इत्युक्त्वा पुनः प्रबुद्ध्याह–इष्टशून्यप्रदेशे वृथा किं विलपामि, तां वनेऽनुसरामि ॥६॥

तन्वि! खिन्नमसूयया हृदयं तवाकलयामि।

तन्न वेद्मि कुतो गतासि न तेन तेऽनुनयामि॥ हरि हरि॰॥७॥

तन्वीति। हे तन्वि! तव हृदयम् असूयया खिन्नं खेदयुक्तं भविष्यतीत्याकलयामि। तत्तस्मादहं कुतो गतासीति न वेद्मि, अपि तु असूयात एव गतासीति वेद्मि। अतो हेतोर्दर्शनाभावात्। ते तव सम्बन्धिना नतेन नमस्कारेणानुनयामि। अथवा–तव हृदयं असूयया खिन्नम्। तेन कारणेन ते तव हृदयं नानुनयामि। 'प्रतप्तस्येव सहसा सर्पिषस्तोयबिन्दवः' इति न्यायापातादिति भावः। अथवा–तत्कुतो न वेद्मि? अपि तु वेद्मि। अथवा–त्वं गतासि यातासि। तव हृदयं नते नमस्कृतौ न अनुनयामि॥७॥

दृश्यसे पुरतो गतागतमेव मे विदधासि।

किं पुरेव ससम्भ्रमं परिरम्भणं न ददासि?॥ हरि हरि॰॥८॥

दृश्यस इति। हे तन्वि! मे पुरतो गतागतमेव विदधासि यातायातमेव करोषीति दृश्यते। अपरं, पुरेव ससम्भ्रमं यथा स्यात्तथा परिरम्भणं न ददासि। विरहिणो हि चित्तानुषङ्गात्सर्वतस्तामेव पश्यन्ति। तथा चोक्तम्–'प्रासादे सा पथि पथि च सा पृष्ठतः सा पुरः सा पर्यङ्के सा दिशि दिशि च सा तद्वियोगातुरस्य। हंहो चेतः प्रकृतिरपरा नास्ति ते कापि सा सा सा सा सा सा जगति सकले कोऽयमद्वैतवादः'॥८॥

क्षम्यतामपरं कदापि तवेदृशं न करोमि।

देहि सुन्दरि! दर्शनं मम मन्मथेन दुनोमि॥ हरि हरि॰॥९॥

क्षम्यतामिति। हे तन्वि! भवतु यत्किञ्चिन्मया अपराद्धं क्षम्यतां तत्। ईदृशमपरमप्रियं तव कदापि न करिष्यामि। हे सुन्दरि! मम दर्शनं देहि। त्वद्विनाऽहं मन्मथेन दुनोमि। इतस्ततस्तामित्यादौ धीरललितो नायकः। परस्परानुरागजनितो विप्रलम्भशृङ्गारः॥९॥

वर्णितं जयदेवकेन हरेरिदं प्रवणेन।

किन्दुबिल्वसमुद्रसम्भवरोहिणीरमणेन॥ हरि हरि०॥१०॥

वर्णितमिति। इदं पूर्वोक्तं जयदेवेन वर्णितम्। किम्भूतेन? हरेः प्रवणेन हरिपरायणेन। पुनः किम्भूतेन? ति (कि) न्दुबिल्वं तच्छासनं निवासो वा ग्रामः समुद्र इव तत्सम्भवरोहिणीरमणेनेव चन्द्रेणेव॥१०॥

हृदि बिसलताहारो नायं भुजङ्गमनायकः

कुवलयदलश्रेणी कण्ठे न सा गरलद्युतिः।

मलयजरजो नेंद भस्म प्रियारहिते मयि

प्रहर न हरभ्रान्त्याऽनङ्ग! क्रुधा किमु धावसि?॥११॥

इदानीं स्मरशराहतिजर्जरचेता भ्रान्तः सन् काममपि भ्रान्तं विदन्नाह–हृदीति। हे अनङ्ग! हरभ्रान्त्या प्रियारहिते मयि न प्रहर प्रहारं मा कार्षीः। एभिश्चिह्नैर्हरोऽयमिति चेत्तदप्यन्यथयति। हृदये भुजङ्गमनायको न, अपि तु बिसलताहारः। बिसलताहार इति रूपकालङ्कारः। शुभ्रत्वात् हृद्यवस्थानाच्च मृणाले वासुकिभ्रमः। अपि च–कण्ठे इयं कुवलयदल-श्रेणी, न प्रसिद्धा गरलद्युतिः। इयमपि विरहातुरस्य मम गरलद्युतिरिव विद्यते। परं यद्भ्रान्त्या मयि प्रहरसि सा प्रसिद्धा ईश्वरसम्बन्धिनी न। इदं मलयजरखोऽङ्गतापाच्छुष्कं चन्दनं विद्यते, न भस्म। 'किमु' इति वितर्के। सत्यम्, क्रुधा कोपेन धावसि। लोकोक्तिः। हरिणीवृत्तम्। 'प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वपह्नुतिः' (का० प्र० १०। 96) इत्यपह्नुतिरलङ्कारः। विप्रलम्भशृङ्गारो रसः॥११॥

पाणौ मा कुरु चूतसायकममुं मा चापमारोपय

क्रीडानिर्जितविश्व! मूर्च्छितजनाघातेन किं पौरुषम्।

तस्या एव मृगीदृशो मनसिज! प्रेङ्खत्कटाक्षाशुग-

श्रेणीजर्जरितं मनागपि मनो नाद्यापि सन्धुक्षते॥१२॥

इदानीं स्मरमुपालभते–पाणाविति। हे क्रीडानिर्जितविश्व काम! पाणौ अमुं चूतसायकं मा कुरु। चापमपि माऽऽरोपय मा सज्जं कुरु।

यतः क्रीडयैव निर्जितविश्वस्य केयं सामग्री नाम? अथ चेत्सामग्री तर्हि कस्योपरीत्याह–मूर्च्छितजनाघातेन किं पौरुषं कोऽयं पराक्रमः? अथवा–कुत्सितं पौरुषं किम्पौरुषम्। तर्हि किं क्रियतामित्याह–यदर्थं मां प्रहिणोषि तस्या एव मृगीदृशो मनोऽद्यापि मनागपि न सन्धुक्षते, अपि तु सन्धुक्षतां नाम?। किं विशिष्टं मनः? प्रेङ्खत्कटाक्षानलज्वालाजर्जरितम्। प्रेङ्खन्तो वल्गन्तो ये कटाक्षा अर्थात्सपत्नीनां त एव अनलोऽग्निस्तस्य ज्वालास्ताभिर्जर्जरितम्। अथवा– हे मनसिज! तस्या एव मृगीदृशः प्रेङ्ख-त्कटाक्षानलज्वालाजर्जरितं मनः, अर्थान्ममैवाद्यापि न दीप्यते। अतो मृतमारणं कथं युक्तम्? शार्दूलविक्रीडितं छन्दः। आक्षेपोऽलङ्कारः। अत्र मनसिजशरा मनो विध्यन्ति इति कर्मत्वे विवक्षिते यत्कर्तृत्वमुपन्यस्तं तदौचित्यचमत्कारितामाविष्करोति। यथा 'सान्वयं शोभते वाक्यमुचितैरेव कारकैः। कुलाभरणमैश्वर्यमौदार्यं चरितैरिव'।इति।।१२।।

भ्रूपल्लवं धनुरपाङ्गतरङ्गितानि
बाणा गुणः श्रवणपालिरिति स्मरेण।
तस्यामनङ्गजयजङ्गमदेवताया-
मस्त्राणि निर्जितजगन्ति किमर्पितानि।।१३।।

इदानीं राधायामेव स्मरशरावलित्वमारोपयन्नाह–भ्रूपल्लवमिति। स्मरेण तस्याम् इति अस्त्राण्यर्पितानि? किम्भूतानि? निर्जितजगन्ति। निर्जितानि जगन्ति यैस्तानि। किम्भूतायां तस्याम्? अनङ्गजयजङ्गमदेवतायाम्। अनङ्गस्य जयाय जङ्गमदेवतेव तस्याम्। इतीति किम्? भ्रूपल्लवं धनुः। अपाङ्गतरङ्गितानि कटाक्षा बाणाः। 'अपाङ्गतरङ्गित' शब्देन कटाक्ष उच्यते। तथा चोत्तम्–'यद्गतागतविश्रान्तिवैचित्र्येण निवर्तनम्। तारकायाः कलाभिज्ञास्तं कटाक्षं प्रचक्षते'।। इति। श्रवणपालिः गुण इति। अत्र 'अस्त्र' शब्देनास्त्रविद्यासाधनस्योपकरणान्युच्यन्ते। भ्रूपल्लवं धनुरित्यत्र रूपकोत्प्रेक्षे अलङ्कृती।। यथा–'मुखपङ्कजरङ्गेऽस्मिन्भ्रूलतानर्तकी नवा। लीलानृत्यं करोतीति रम्यं रूपकरूपकम्'।। अत्र क्वापि क्वाप्यलङ्कार-द्वयत्रयसद्भावेऽपि संसृष्टिसङ्करनिरूपणं ग्रन्थविस्तरत्रस्तचित्ततया न क्रियते। तद्गतिस्तु पूर्वपदे दर्शितप्रायेति।।१३।।

भ्रूचापे निहितः कटाक्षविशिखो निर्मातु मर्मव्यथां
श्यामात्मा कुटिलः करोतु कबरीभारोऽपि मारोद्यमम्।
मोहं तावदयं च तन्वि! तनुतां बिम्बाधरो रागवान्
सद्वृत्तः स्तनमण्डलस्तव कथं प्राणैर्मम क्रीडति?॥14॥

इदानीं ध्यानमिलितां राधां सम्भावयन्नाह-भ्रूचाप इति। हे तन्वि! भ्रूचापे निहित आरोपितः कटाक्ष एव विशिखो बाणो मर्मव्यथां निर्मातु। यतश्चापारोपितबाणस्य मर्मवेधो युक्त एव। अपि च–कबरीभारोऽपि मारोद्यमं मारायोद्यमं करोत नाम। यतः श्यामात्मा कुटिलश्च। श्यामात्मनामन्तर्मलिनचित्तानां च मारणं स्वभाव एव। अपि च–अयं रागवान्बिम्बाधरो मोहं तनुताम्। अस्याप्येवंविधस्य मोहविधाने औचिती; परं तु तव सद्वृतः स्तनमण्डलः स मम प्राणैः कथं क्रीडति? इयमस्यानौचिती। यतः सदाचारवतां परप्राणविशसनं न क्वापि दृष्टमिति भावः। अत्र विरोधालङ्कारः। शार्दूलविक्रीडितं छन्दः॥१४॥

तानि स्पर्शसुखानि ते च तरलाः स्निग्धा दृशोर्विभ्रमा-
स्तद्वक्त्राम्बुजसौरभं स च सुधास्यन्दी गिरां वक्रिमा।
सा बिम्बाधरमाधुरीति विषयासङ्गेऽपि चेन्मानसं
तस्यां लग्नसमाधि, हन्त विरहव्याधिः कथं वर्धते॥१५॥

इदानीं वक्रोक्त्या स्वगतत्वेन विरहवामतां वदति–तानीति। 'हन्त' इति खेदे। विषयासङ्गेऽपि मानसं चेत्तस्यां लग्नसमाधि तर्हि विरहव्याधिः कथं वर्धते? समाधौ व्याधेरनुद्भवात्, प्रियासङ्गे विरहानुपपत्तेश्च। इतीती किम्? तानि स्पर्शसुखानि सन्ति। अप्रत्यक्षायामपि तस्यां ध्यानवशादनुभूयमानानीव; एवं सर्वत्र। अपि च–तरलाश्चञ्चलाः स्निग्धाः प्रेमार्द्रा दृशोर्विभ्रमा विलासास्त एव; वक्त्राम्बुजसौरभं तदेव; अपि च–सुधास्यन्द्यमृतस्त्रावी गिरां वक्रिमा वैदग्ध्यविशेषः स एव; अपि च–बिम्बाधरमाधुरी बिम्बाधरसौकुमार्य तदेव; यत्पूर्वानुभूतं तदेवेति विषयलाभेऽपि विरहो वर्धत इति तस्य वामता। शार्दूलविक्रीडितं छन्दः। समुच्चयोऽलङ्कारः। रसादि प्रसिद्धम्॥१५॥

तिर्यक्कण्ठविलोलमौलितरलोत्तंसस्य वंशोच्चर-
ह्वीप्तिस्थानकृतावधानललनालक्षैर्न संलक्षिताः।
सम्मुग्धे मधुसूदनस्य मधुरे राधामुखेन्दौ सुधा-
सारे कन्दलिताश्चिरं ददतु वः क्षेमं कटाक्षोर्मयः॥१६॥

इदानीं सर्गार्थसंवरणव्याजेनाशिषमाशास्ते–तिर्यक्कण्ठेति। मधुसूदनस्य कटाक्षोर्मयो वो युष्मभ्यं क्षेमं ददतु। ऊर्मयो वेगा लेखा वा। कटाक्षाणामूर्मयः कटाक्षोर्मयः। 'ऊर्मिः पीडालवोत्कण्ठाभङ्गिप्राकाश्यवीचिषु। वस्त्रसङ्कोचलेखायाम्' इति। किं लक्षणाः? राधामुखेन्दौ प्रेम्णा कन्दलिता उपरागं गमिताः। 'कन्दलं तु नवाङ्कुरे। कलध्वनावुपरागे च' इति। किं विशिष्टे मुखेन्दौ? सम्मुग्धे मधुरे। सम्यक् मुग्धं सम्मुग्धं, सम्मुग्धं च तन्मधुरं च तत्तस्मिन्। रम्ये नवप्रिये। 'मुग्धं मूर्खे तथा रम्ये' इति। 'मधुरस्तु प्रिये स्वादौ' इति। पुनः किम्भूते? सुधाकरे सुधादीनां सारे, सुधायाः सारे वा। पुनः किम्भूताः? वंशोच्चरह्वीप्तिस्थानकृतावधानललनालक्षैर्न संलक्षिताः। वंशे उच्चरद्यह्वीप्तिस्थानं तारस्वरस्थानं तत्र कृतावधानं याभिस्तास्तथा, ताश्च ता ललनाश्च तासां लक्षाणि तैः। चतुर्ष्वपि स्वस्थानेषु रागालप्तौ क्रियमाणायां क्रमेण दीप्तिस्थानारोहे कोऽप्यतिशयो जायत एव। तत्र दत्तावधानत्वात् वल्गुस्वने प्रियकटाक्षादपि प्रियत्वादित्यर्थः। किम्भूतस्य मधुसूदनस्य? तिर्यक्कण्ठविलोलमौलितरलोत्तंसस्य, तिर्यक् कण्ठो यस्यासौ तिर्यक्कण्ठः, विलोलश्चासौ मौलिश्च, विलोलमौलिना तरलावुत्तंसौ कर्णभूषणे यस्य स तथा, तिर्यक्कण्ठश्चासौ विलोलमौलितरलोत्तंसश्च स तस्य। अत्र 'मौलि' शब्दस्य शिरःकिरीटयोः समानवाचकत्वेऽपि वेणुवादकस्य शिरःकम्पितादिदोषपरिजिहीर्षया किरीटे पर्यवसानम्। शीर्ष्णि अकम्पिते किरीटकम्पनं वैचित्र्यायेति। शार्दूलविक्रीडितं वृत्तम्। रूपकमलङ्कारः॥१६॥

# चतुर्थः सर्गः

## ( स्निग्धमधुसूदनः )

यमुनातीरवानीरनिकुञ्जे मन्दमास्थितम्।
प्राह प्रेमभरोद्भ्रान्तं माधवं राधिकासखी॥१॥

मधुमथनं हृदि कृत्वा परं जयदेवीये मातौ वरम्।
तनुते धातुं श्रुतिसुखकरं कुम्भो नृपशतवन्द्यश्चिरम्॥

इदानीं तयोः पृथक्कामावस्थां निरूप्य संयोजयितुमिच्छुदूतीयोगं निरूपयतियमुनातीरवानीरेति। राधिकासखी माधवं प्राह–किं विशिष्टं माधवम्? प्रेमभरेण स्नेहोद्रेकेणोद्भ्रान्तमुद्विग्नचित्तम्। पुनः किम्भूतम्? यमुनातीरस्थे वानीरनिकुञ्जे वेतसनिकुञ्जे मन्दं निरुत्साहं यथा स्यात्तथा आस्थितमासीनम्। अथवा, अमन्दमिति वचनविशेषणम्। अतिशयव्याकुलां राधां दृष्ट्वा अमन्दं सवेगमाह। पथ्यावक्त्रं छन्दः–'युजोर्जेन स' इति। पूर्वोक्तमेव स्पष्टयति–अत्र गीते विरहोत्कण्ठिता नायिका वर्णनीया 'नायिका लक्षणैर्युक्ता गीतकाव्येषु दर्शिता। एकैव नायिका वापि हरमूर्तिरिवाष्टधा। वाससज्जा समुत्कण्ठा स्वाधीनभर्तृका तथा। कलहान्तरिता वापि विप्रलब्धाभिसारिका। खण्डिता प्रोषिता चैव नायिकाश्चाष्ट सम्मताः।' तत्र समुत्कण्ठितालक्षणमुक्तं भरतेन–'यस्याः समुचितेऽप्याह्नि प्रवासी नैति वल्लभः। सा स्मरानलसन्तप्ता विरहोत्कण्ठिता मता'॥१॥

निन्दति चन्दनमिन्दुकिरणमनु विन्दति खेदमधीरम्।
व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरम्।
माधव! मनसिजविशिखभयादिव भावनया त्वयि लीना।
सा विरहे तव दीना॥ ध्रुवपदम्॥२॥

निन्दतीति। पूर्वं ध्रुवपदं व्याक्रियते–सा विरहे इति। हे माधव! सा राधा भावनया त्वयि लीना त्वद्ध्यानेन त्वन्मयत्वं प्राप्ता इति बुद्ध्या

त्वयि लीनेति। त्वामन्तरा स्थिता। उत्प्रेक्षते–कामशरभीत्येव। यथा त्वामन्तरा स्थितायां ते कामशरास्त्वय्येव पतन्ति, न तस्यामिति बुद्ध्येति भावः। किं विशिष्टा सा? तव विरहे सति दीना दैन्यमाप्ता। इति ध्रुवः॥ अत्रोत्प्रेक्षालङ्कारः। किं किं करोति तत्कर्माह–चन्दनं निन्दति चन्दनस्य निन्दां करोति। स्मराह्लादकत्वाद्विपक्षपक्षमाश्रितमिवाभातीति। तत एव इन्दुकिरणमनु खेदं विन्दति लभते। कथम्? अधीरं यथा भवति तथा। अधीरमिति चन्दनविशेषणं वा। अधिकम् ईरयति प्रेरयति कामशरानिति निन्दार्थः। अपि च–मलयानां व्यालनिवासानां समीरं गरलमिव कलयति। केन हेतुना? व्यालनिलयमिलनेन व्यालनिलयानां व्यालनिवासानां चन्दनानां मिलनेन सङ्गात्। अत्र रूपकोत्प्रेक्षाविरोधालङ्काराः॥२॥

अविरलनिपतितमदनशरादिव भवदवनाय विशालम्।
स्वहृदयमर्मणि वर्म करोति सजलनलिनीदलजालम्॥ सा वि॰ ३॥

ध्यानादेकतामापन्नत्वं प्रकटयति–अविरलेति। सा सजलनलिनीदल-जालं स्वहृदयमर्मणि वर्म करोति। किम्भूतं तत्। विशालम्। उत्प्रेक्षते–अविरलनिपतितमदनशराद्भवदवनायेव। अविरलं निपतितं निपातो येषा ते च ते मदनशराश्च। जातावेकबद्भावादेकवचनम्। त्वय्यासक्ततया 'त्वयि मृतेऽहमेव मृता' इति हृदयमर्मत्वं त्वय्येव विधाय भवदवनायेति युक्तम्। स्वहृदयमर्मणि भवदवनाय भवद्रक्षणाय सजलनलिनीदलजालं पिधानमिव करोति हृदयान्मा निरगादिति बुद्ध्येति युक्तिलेशः। उत्प्रेक्षालङ्कारः॥३॥

कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयम्।
व्रतमिव तव परिरम्भसुखाय करोति कुसुमशयनीयम्॥ सा वि॰ ४॥

कुसुमेति। सा कुशुमशयनीयं कुमुमशय्यां करोति। किम्भूतं कुसुमशयनीयम्? अनल्पविलासकलाकमनीयं बहुतरविलासरमणीयम्। किमिव? कुसुमविशिखशरतल्पं व्रतमिव। किमर्थम्? तव परिरम्भसुखाय। अन्योपि सुखैषी व्रतमाचरति। दुर्लभभवदाश्लेषावाप्त्यै स्मरेण दूयमाना सा दुष्करं तस्यैव शरशय्याव्रतमाचरतीत्यर्थः। अत्रोत्प्रेक्षालङ्कारः॥४॥

वहति च चलितविलोचनजलभरमाननकमलमुदारम्।
विधुमिव विकटविधुन्तुददन्तदलनगलितामृतधारम्॥ सा वि॰ ५॥

वहतीति। सा आननकमालं वहति। किम्भूतम्? चलितविलोचनजलभरम्। चलितः सम्भक्तः विलोचनेन जलभरो यत्र। वा चलिते सम्भक्ते विलोचने जलभरेण यत्र। अथवा–चलितविलोचन एव जलधरो मेधो यत्रोति पाठः। किं विशिष्टम् आननकमलम्? उदारं मनोहरम्। कमिव? विधुमिव। किम्भूतं विधुम्? विकटा विकराला विधुन्तुददन्तास्तैर्दलनेन पीडनेन गलितामृतधारा यस्मिन्। अनेन भवद्विरहेणानवरतं रुदत्या मुखमिन्दुकान्तिं विभर्तीत्याशयः, असितवर्णमभूदित्यर्थः। अत्रोपमालङ्कारः॥५॥

विलिखति रहसि कुरङ्गमदेन भवन्तमसमशरभूतम्।
प्रणमति मकरमधो विनिधाय करे च शरं नवचूतम्॥ सा वि॰ ६॥

अपि च–विलिखतीति। हे कृष्ण! सा मत्सखी रहसि एकान्ते कुरङ्गमदेन भवन्तं विलिखति। किम्भूतं भवन्तम्? असमशरभूतं कुसुमशरतामापन्नम्। त्वामेव दुर्लभत्वात् वाहकत्वेन कुसुमशरोऽयमिति बुद्ध्या। किम् कृत्वा विलिखति? करे नवचूतशंर विनिधाय। अत्र चूतपुष्पधारणेन पूजोपयुक्ता। अनन्तरं प्रणाम उचित एव। पीडाकरे कामे स्वरक्षार्थमर्चनप्रणामयोरपि युक्तत्वमेव। अयं च विरहिणीव्यापार उक्तः। तदुक्तं भरतेन–'देवतापूजनं कुर्याद्दद्याद्बलिभुजे बलिम्। लिखेत्कान्तप्रतिकृतिं पाठयेच्छुकसारिकाः॥ गणयेच्चावधिदिनं गीतं गायेत्तदङ्कितम्। एवंविधविनोदेन नयेत्कालं वियोगिनी'॥ च पुनः अधः वाहनदेशे मकरं विनिधाय एवं साङ्गोपाङ्गकामरूपं भवन्तं विनिधाय मा दहेति प्रणमिति। अत्र लिखित्वा प्रणमतीति वक्तव्ये विरहिणो हि कृत्याकृत्यज्ञा न भवन्तीति पौनःपुन्येन यत्र तत्र गच्छन्तीति द्योतनार्थम्। अत्रोपमालङ्कारः॥६॥

ध्यानलयेन पुरः परिकल्प्य भवन्तमतीव दुरापम्।
विलपति हसति विषीदति रदिति चञ्चति मुञ्चति तापम्॥ सा वि॰ ७॥

अपि च–ध्यानलयेनेति। हे कृष्ण! सा मत्सखी भवन्तं विलिखति। किं विशिष्टं भवन्तम्? अतीव दुरापं दूतीप्रेषणादिना दुरापं दुर्लभम्। किं कृत्वा विलिखति? ध्यानलयेन ध्यानैकाग्रतया पुरोऽग्रे परिकल्प्य। लिखित्वा च दृष्टो मयेति हसति। आश्लेषादिकं न करोतीति विषीदति। तन्न कुरुतां नाम; प्रेम्णा दृष्टिमपि न प्रयच्छतीति रोदिति। दृष्टायामपि नास्य सन्तोष इति चञ्चति स्थानात्स्थानान्तरं गच्छति पुनरागत्य दृष्टश्चेत्स वश्यो भविष्यतीत्याशयेन तापं मुञ्चति इति। अत्र दीपकमलङ्कारः॥७॥

प्रतिपदमिदमपि निगदति माधव! तव चरणे पतिताहम्।
त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहम्॥ सा वि०॥८॥

प्रतिपदमिति। हे माधव! सा मत्सखी प्रतिपदं प्रतिचरणन्यासं प्रतिस्थानं वा इदमेव निगदति। अत्रापिरेवार्थे। इदमिति किम्? अहं तव चरणे निपतिता। सपदि मयि विषये त्वयि विमुखे सति सुधानिधिरपि सुधानिधानमपि तनुदाहं शरीरदाहं तनुते। अथवा, सुधानिधिश्चन्द्रोऽप्यतनुदाहं स्मरतापं तनोति। अतनु यथा स्यादिति च। अत्रातिशयोक्तिरलङ्कारः॥८॥

श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयम्।
हरिविरहाकुलबल्लवयुवतिसखीवचनं पठनीयम्॥ सा वि०॥9॥

श्रीजयदेवेति। हे वैष्णवाः! इदं श्रीजयदेवभणितं यदि मनसाधिकं नटनीयमभिनेतव्यम्। 'नट' शब्देनात्र नाट्यस्याभिनयप्राधान्यादभिनयो विवक्षितः। अथवा–नटनीयमित्यास्वादनीयम्, रसनीयमिति यावत्। 'नाट्यशब्दो रसे मुख्यः' इति भरतीये। किम्भूतमिदम्? सखीमधिकृत्य वर्तमानम्। तर्हि हरिविरहाकुलबल्लवयुवत्या राधायाः सख्याः वचनं पठनीयम्। जयदेवभणितिष्विदमेव सारमित्यर्थः॥९॥

आवासो विपिनायते प्रियसखीमालापि जालायते
तापोऽपि श्वसितेन दावदहनज्वालाकलापायते।
सापि त्वद्विरहेण हन्त हरिणीरूपायते हा कथं
कन्दर्पोऽपि यमायते विरचयञ्शार्दूलविक्रीडितम्॥१०॥

'प्रतिमण्ठकतालेनरागे देशाङ्कसंज्ञिते। पदात्तुर्याक्षरैर्युक्तः पदात्सङ्ग-मतस्तथा।। आकारोपचितालापगमकाकुलविग्रहः। आभोगात्तेनकैः पाटैः प्रचुरैरतिपेशलः।। हरिवल्लभपूर्वोऽयमशोकपल्लवः स्मृतः'।। इति हरिवल्लभाशोकपल्लवनामाष्टमः प्रबन्धः।।८।।

किं बहुना, इदानीं मत्सख्यास्त्वदृते त्वयि विपरीते सर्वमेव विपरीतमित्याह–आवास इति। 'हन्त' इति खेदे। हे माधव! सा मत्सुखी त्वद्विरहेण हरिणीरूपायते मृगीरूपमिवाचरति स्वभावतो विरहेण पाण्डुवर्णो भवत्येवेति तथाविधं रूपमधिकृत्य हरिणीरूपेणोपमीयत इत्युक्तम्। कथमिति प्रश्ने हरिणीविशेषणेनाह–आवासो विपिनायते। हरिण्यः किल वने वसन्ति, तस्या मे सख्या आवासो विपिनायते। अत्र 'आवास' शब्देन निलय उच्यते। प्रियसखीनां माला श्रेणिः जालायते; इतस्ततो गमनाय तद्रोधकत्वात्। अथवा–प्रियसखीदत्ता मालापि जालायते। हरिणीबन्धनार्थं जालं क्षिप्यते तद्वदाचरति। अपि च–तापोऽपि देहतापोऽपि श्वसितेन निःश्वसितेन दावाग्निज्वालाबलीवाचरति। एवं तस्या हरिणीत्वं निरूप्य खेदमभिनयन्त्याह–'हा' इति कष्टे। सा मत्सखी कथं वर्तते? यतः कामोऽपि शार्दूलविक्रीडितं विरचयन् यमायते यम इवाचरति। शार्दूलः किल हरिणीं हन्तीत्युक्तिः। अत्र च हरिणीवन्मत्सख्यास्त्वयि दृढानुरागोऽस्ति। निःस्नेहे स्नेहवत्तया पशुरूपत्वेन हरिणीरूप-मौचितीमावहति। निःस्नेहेऽस्नेहवति सैवेत्यवधारणार्थः। वृत्तमपि शार्दूलविक्रीडितम्। अत्र लुप्तोपमा। विरोधाभासश्चालङ्कारः।।१०।।

स्तनविनिहितमपि हारमुदारम्।
सा मनुते कृशतनुरिव भारम्।
राधिका तव विरहे केशव!।।ध्रुवपदम्।।१।।

इदानीं राधासखी स्वसखीविरहचेष्टितं देवे विनिवेदयति–पूर्वं ध्रुवपदं व्याक्रियते। राधिकेति। हे केशव! राधिका तव विरहे वर्तते। अनुकम्प्या राधा राधिका, तस्यां अनुकम्पां विधेहीत्यनुकम्पार्थेन द्योत्यते। इति ध्रुवः।। विरहे वर्तमाना राधा किं किं करोतीत्यपेक्षायां पदानामारम्भः।

स्तनविनिहितमिति। हे केशव! सा कृशतनुः स्तनविनिहितमप्युदारं मनोहरं हारं भारमिव मनुते विरहाधिक्यात्कृशतनोर्हारोऽपि भारोपमो भवति॥१॥

सरसमसृणमपि मलयजपङ्कम्।

पश्यति विषमिव वपुषि सशङ्कम्।राधिका०॥२॥

अपि च–सरसेति। सा मत्सखी वपुषि वर्तमानं मलयजपङ्कं सशङ्कं यथा स्यात्तथा विषमिव पश्यति। किंविधम्? सरसमसृणमपि सरसं च तन्मसृणं च सरसमसृणं द्रवरूपात्स्निग्धकोमलमपि॥२॥

श्वसितपवनमनुपमपरिणाहम्।

मदनदहनमिव वहति सदाहम्॥ राधिका०॥३॥

अपि च–श्वसितेति। सा मत्सखी श्वसितपवनं मदनदहनमिव कामाग्निमिव वहति। किम्भूतम्? सदाहं दाहसहितम्। विरहेणान्तस्तापो विद्यते तेन सहितम्। किम्भूतम्? अनुपमपरिणाहम्; निःश्वासानामतिदीर्घत्वात्॥३॥

दिशि दिशि किरति सजलकणजालम्।

नयननलिनमिव विगलितनालम्।राधिका०॥४॥

अपि च–दिशि दिशीति। सा राधा नयननलिनं दिशि दिशि किरति विक्षिपति। त्वद्दर्शनाकाङ्क्षयेति शेषः। सजलकणजालं जलकणसमूहेन सह वर्तमानम्। उत्प्रेक्षते–विगलितनालमिव विक्षिप्तं नयनं विनालेन नलिनेनोपमीयते। अथवाऽउच्छूनत्वात्कज्जलरहितत्वाद्दीनत्वाच्च विनालेन कमलेनोपमीयते॥४॥

त्यजति न पाणितलेन कपोलम्।

बालशशिनमिव सायमलोलम्॥ राधिका०॥५॥

त्यजतीति। सा राधा पाणितलेन कपोलं न त्यजति; चिन्तावशात्। किम्भूतं कपोलम्? अलोलम्। क्व? सायम्। सायं हि विशेषविरहोद्रेको भवति। कमिव? बालशशिनमिव। अलोलमिति बालचन्द्रो हि पाण्डुर्निः-श्रीकश्च भवति। कपोलस्य हस्तेनाच्छादितत्वाद्बालशशिनोपमा॥५॥

नयनविषयमपि किसलयतल्पम्।

कलयति विहितहुताशविकल्पम्।। राधिका०।।३।।

अपि च–नयनेति। सा राधा किसलयतल्पं विहितहुताशविकल्पं कलयति हुताशमिव जानाति। किम्भूतं तल्पम्? नयनविषयमपि। अनुमितार्थे संसर्गे वा भ्रान्तिर्जायते। नयनविषयेऽपि भ्रमेर्निर्निमित्तत्वान्नयनयोस्त्वय्या -रोपितत्वं द्योत्यते।।६।।

हरिरिति हरिरिति जपति सकामम्।

विरहविहितमरणेव निकामम्।।राधिका०।।७।।

अपि च–हरिरितीति। सा मत्सखी निकाममतिशयेन सकामं साभिलाषं यथा स्यात्तथा हरिरिति जपति त्वन्नाम गृह्णन्त्यास्ते। किम्भूता? विरहविहितमरणेव विरहेण विहितं मरणं यस्याः सा। अर्थात्त्वर्वव। अन्योऽपि विहितमरणो हरिरिति हरिरिति जपत्येव।।७।।

श्रीजयदेवभणितमिति गीतम्।

सुखयतु केशवपदमुपनीतम्।। राधिका०।।८।।

अपि च–श्रीजयदेवेति। श्रीजयदेवभणितं वर्णितं हरेः कृष्णस्य गीतं सुखयतु। भक्तानित्यध्याहारः। किं विशिष्टं गीतम्? केशवपदमुपनीतं प्रापितम्। इदं श्रीजयदेवभणितं हरिगीतं केशवपदं सुखयतु। केशवः पदं स्थानं यस्यासौ केशवपदः, तं केशवपदं वैष्णवं सुखयतु। किम्भूतं गीतम्? उपनीतम्; उप समीपं नीतं प्रापितमित्यर्थः। अत्र मात्राचतुष्पदी छन्दः। सर्वत्रोपमालङ्कारः।।८।।

सा रोमाञ्चति सीत्करोति विलपत्युत्कम्पते ताम्यति

ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मूर्च्छत्यपि।

एतावत्यतनुज्वरे वरतनुर्जीवेन्न किं ते रसा-

त्स्ववैंद्यप्रतिम! प्रसीदसि यदि त्यक्तोऽन्यथा हस्तकः।।९।।

इदानीं भक्त्याख्या भावितमरणशंसनमिषेण तन्मनः प्ररोचयति–सेति। हे स्ववैंद्यप्रतिम अश्विनीकुमारसदृशरूप! एतावत्यतनुज्वरे एतावतीमवस्थां

प्राप्तवत्यतनुज्वरे। पक्षे–अतनुज्वरे महति ज्वरे सति यदि प्रसीदसि ततः सा वरतनुः तव रसात् शृङ्गारात्किं न जीवेत्? अपि तु जीवेदेव। अन्यथा चेन्न प्रसीदसि तदा अन्त एवान्तकः मरणमसि, मरणहेतुत्वात्त्वमेव मरणमिति। अथवा–हे स्ववैंद्यप्रतिम अश्विनीकुमारतुल्य वैद्य! यदि प्रसीदसि ततस्ते रसात्पारदादिनिष्पन्नौषधात्सा वरतनुर्न जीवेत्? अपि तु जीवेदेव। अन्यथा अन्तको यमो नासि? अपि तु यम एव। 'वरतनुः' इति हेतुगर्भ विशेषणम्। तेन सा तनुरूपेति कृत्वाऽवश्यं जीवनीयेति तात्पर्यम्। सा राधा न केवलं बाह्यवृत्त्या त्वय्यनुरक्ता, किन्तु सात्त्विकभावेनापि त्वदायत्तजीवितेति दर्शयन्त्याह। तानेव सात्त्विकान्भावान्विवृणोति–सा रोमाञ्चतीति। 'स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः। वैवर्ण्यमश्रुप्रलयावित्यष्टौ सात्त्विका मताः'। सा राधा रोमाञ्चति। रोमाञ्चो विद्यते यस्य स रोमाञ्चः, रोमाञ्चित इत्यर्थः; तद्वदाचरति रोमाञ्चति। अकारोऽत्र मत्वर्थीयः। रोमाञ्चतीत्यादिना रोमाञ्च उक्तः। सीत्करोतीति वैवर्ण्यम् विलपत्युद्यातिभ्यामश्रु, उद्यातीति निःसरति; उत्कम्पत्युद्भ्रमतिभ्यां वेपथुः, ताम्यतिना स्वेदः, ध्यायतिपततिभ्यां स्तम्भः, पततीति वैपरीत्येन तपतिर्वैवर्ण्ये योजनीयः। प्रमीलतिना स्वरभङ्गः, मूर्च्छतिना प्रलयः, इत्येवमष्टौ सात्त्विका भावाः प्रदर्शिता भवन्ति। सन्मनस्तत्प्रभवाः सात्त्विकाः। इदमाकूतम्–त्वय्यारोपितमनस्का त्वया जीवनीयेति; अन्यथा आश्रितत्यागलक्षणं दूषणमपीति भावः। शार्दूलविक्रीडितं वृत्तम्। अत्र दीपकमलङ्कारः। विप्रलम्भाख्यः शृङ्गारो रसः। अत्र पूर्वार्धेन स्थायिभावा उक्ताः। तदुक्तम्–'रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्साविस्मयशमाः स्थायिभावाः प्रकीर्तिताः'॥ इति। सात्त्विकाश्च पूर्वत एव उक्ताः। अहमित्याद्यनुकूलो नायको दक्षिणो वा। उत्कण्ठिता नायिका। सखी दूतीत्वेन सहायिनी। तल्लक्षणम्–'प्रवृत्तिकुशला धीरा गूढमन्त्रदृढप्रिया। स्वतन्त्रा विधवा दासी दुष्टा प्रव्रजिता सखी। मालाकारादिनारी च कार्या दूतीष्टसिद्धये'॥९॥

स्मरातुरां दैवतवैद्यहृद्य! त्वदङ्गसङ्गामृतमात्रसाध्याम्।
निवृत्तबाधां कुरुषे न राधामुपेन्द्र! वज्रादपि दारुणोऽसि॥१०॥

तदेव पूर्वसूचितदूषणमुद्भावयति–स्मरेति। हे उपेन्द्र! दैवतवैद्यहृद्य अश्विनीसुतसुन्दर! ततोऽप्यधिकचिकित्सक! यदि त्वं पूर्वोक्तलक्षणां राधां निवृत्तबाधां निवृत्ता बाधा यस्यास्तां न कुरुषे तर्हि वज्रादपि दारुणोऽसि कठिनोऽसि। कठिनः खलु कथमपि न स्निह्यतीति। किं विशिष्टां राधाम्? स्मरातुराम्। पुनः किम्भूताम्? रोगिणां चिकित्सा भविष्यतीत्याशङ्क्याह–त्वदङ्गेति?। त्वदङ्गसङ्ग एवामृतकल्पस्तन्मात्रसाध्याम्। अतोऽल्पप्रयासे बहुतरपुण्ये च प्रयोजने महान्तो नावसीदन्तीति। वृत्तमप्युपेन्द्रवज्रा॥१०॥

कन्दर्पज्वरसञ्ज्वरातुरतनोराश्चर्यमस्याश्चिरं
चेतश्चन्दनचन्द्रमः कमलिनीचिन्तासु सन्ताम्यति।
किन्तु क्लान्तिवशेन शीतलतनुं त्वामेकमेव प्रियं
ध्यायन्ती रहसि स्थिता कथमपि क्षीणा क्षणं प्राणिति॥११॥

ईदृशीमवस्थां प्राप्तापि त्वत्सङ्गमाकाङ्क्षयैव प्राणितीत्याह–कन्दर्पेति। हे माधव! अस्याश्चेतश्चिरं चन्दनचन्द्रमःकमलिनीचिन्तासु यत्सन्ताम्यति तदाश्चर्यम्। किं विशिष्टायाः? कन्दर्पज्वरसञ्ज्वराकुलतनोर्मदनसन्तापा-कुलशरीरायाः। तापे सति शीतवस्तुषु स्पृहा नास्तीत्याश्चर्यम्; किन्तु आश्चर्यान्तरमपि। क्लान्तिवशेन क्षीणा रहस्येकान्ते स्थिता त्वामेवैकं प्रियं शीतलतनुं कथमपि ध्यायन्ती क्षणं क्षणमात्रं प्राणिति जीवति। अत्र शीतलेषु द्वेषः, शीतलादपि जीवतीति विरोधालङ्कारः। अद्भुतश्च रसः। शार्दूलविक्रीडितं वृत्तम्॥११॥

क्षणमपि विरहः पुरा न सेहे
नयननिमीलनखिन्नया यया ते।
श्वसिति कथमसौ रसालशाखां
चिरविरहेण विलोक्य पुष्पिताग्राम्॥१२॥

इदानीं त्वदागमनहेतुं मनसि स्थिरीकृत्य प्राणितीत्याह–क्षणमिति। हे माधव! यया राधया पुरा ते विरहः क्षणमपि न सेहे न सोढः। किम्भूतया? नयननिमीलनखिन्नया नयननिमीलनेनापि खिन्ना सा तया। भवद्दर्शनान्तरे निमिषेऽपि या दुःखं प्राप्नोति, असौ साम्प्रतं चिरविरहेऽपि रसालशाखां चूतशाखां विलोक्य, कथं श्वसिति प्राणिति तन्न जाने। किंविधां रसालशाखाम्? पुष्पिताग्रां पुष्पिताग्रभागाम्। अत्र पुष्पितया चूतशाखया वसन्तो लक्ष्यते। वसन्ते हि विरहिणो न जीवन्तीत्यत्राकूतम्। सा कथं श्वसितीति चिरविरहेऽपि रसालशाखां विलोक्य। रसालो रससमूहो भवान्, तस्य शाखाम् अन्तिकं समीपं तां विलोक्य। किंविधां शाखाम्? पुष्पिताग्रां पुष्पितं सञ्जातपुष्पमग्रमुत्तरकालो यस्याः सा ताम्। तवान्तिकं लप्स्ये इत्यभिकाङ्क्षया श्वसिति। अथवा–पुष्पिताग्रां चूतशाखां दृष्ट्वा श्वसितीति युक्तार्थः। एवंविधां चूतशाखां दृष्ट्वा स्मरशरजर्जरितशरीरः सोऽवश्यं मामेष्यतीति। वृत्तमपि पुष्पिताग्रा॥१२॥

वृष्टिव्याकुलगोकुलावनरसादुद्धृत्य गोवर्धनं
बिभ्रद्बल्लववल्लभाभिरधिकानन्दाच्चिरं चुम्बितः।
दर्पेणेव तदर्पिताधरतटीसिन्दूरमुद्राङ्कितो
बाहुर्गोपतनोस्तनोतु भवतां श्रेयांसि कंसद्विषः॥१३॥

इदानीं 'मङ्गलान्तानि च शास्त्राणि प्रथन्ते' इति न्यायमाचरन् कविराशिषमाह–वृष्टीति। कंसद्विषः कृष्णस्य बाहुर्भवतां श्रोतृणां श्रेयांसि तनोतु। किं कुर्वन्? उद्धृत्य गोवर्धनं गिरिं बिभ्रत्। कस्मात्? वृष्टिव्याकुलगोकुलावनरसात्। वृष्ट्या व्याकुलं यद्गोकुलं तस्य यदवनं पालनं तत्र रसो रागो वीर्यं वा तस्मात्। पुनः किम्भूतो बाहुः? बल्लवव-ल्लभाभिर्गोपाङ्गनाभिरधिकानन्दाच्चिरं चुम्बितः। पुनः किम्भूतो बाहुः? तदपितावस्तटीसिन्दूरमुद्राङ्कितः। ताभिश्चुम्बनार्थमर्पिता या अधरतटी तस्याः सिन्दूरमुद्रयेव शोणितत्वेनाङ्कितः। उत्प्रेक्षते–गोवर्धनोद्धरणलक्षण-जातगर्वेणेव शोणितः किंविधस्य कंसद्विषः? गोपतनोः गोपस्य तनुरिव तनुर्वस्य सः; गोपवेषस्येत्यर्थः। अत्राद्भुतो रसः। उत्प्रेक्षोपमे अलङ्कृती। शार्दूलविक्रीडितं वृत्तम्॥१३॥

# पञ्चमः सर्गः

## ( आकाङ्क्षपुण्डरीकाक्षः )

अहमिह निवसामि याहि राधा-
मनुनय मद्वचनेन चानयेथाः।
इति मधुरिपुणा सखी नियुक्ता
स्वयमिदमेत्य पुनर्जगाद राधाम्॥१॥

पुरीमिव पालयिताखिलभुवं कुम्भनरेशो नत्वा शिवम्।
गायति धातुं रसिकामृतं जयदेवोदितं मातौ वृतम्॥

इदानीं सखीनिवेदितो माधवस्तदभिमुखीभूय तदानयनाय सखीं प्रहितवान्। अयमिति। सेत्यध्याहार्यम्। या पूर्व प्रहिता राधया सखी सैव स्वयमेव पुना राधामेत्य वक्ष्यमाणं जगाद। किम्भूता सखी? मधुरिपुणा इति नियुक्ता इत्यादिष्टा। इतीति किम्? अहमिह यमुनाकुञ्जे निवसामि। 'यावदागमिष्यति तावत्प्रतीक्षां करिष्ये' इति। त्वं याहि, मद्वचनेन राधामनुनय, अनुनीय च आनयेथाः। पुष्पिताग्रावृत्तम्॥१॥

वहति मलयसमीरे मदनमुपनिधाय।
स्फुटति कुसुमनिकरे विरहिहृदयदलनाय॥१॥
तव विरहे वनमाली सखि! सीदति॥ ध्रुवपदम्॥

तदेव वक्ष्यमाणमाह—अत्राभिसारिका नायिका वर्णनीया; 'संस्कृतात्प्राकृतमिष्टं ततोऽपभ्रंशभाषणम्। ततः प्रियतरा वेश्या सर्वतश्चाभिसारिका'॥ इति भरतः। तल्लक्षणमुक्तं भरतेन—'लज्जां हित्वा समाकृष्टा यौवनेन व्रजेत्तु या। अभिसारगतं कान्तं कीर्तिता साऽभिसारिका॥' अत्र पूर्वं 'तव विरहे' इति ध्रुवः। अथ पदानि। वहतीति। क्व सति? मदनमुपनिधाय मदनस्य स्पृहामुत्पाद्य मलयसमीरे वहति सति। पुनः क्व सति? विरहिहृदयदलनाय कुसुमनिकरे स्फुटति सति विकसति सति॥१॥

दहति शिशिरमयूखे मरणमनुकरोति।

पतति मदनविशिखे विलपति विकलतरोऽति। तव वि०॥२॥

अपि च–दहतीति। शिशिरमयूखे हिमरश्मौ दहति सति मरणमनुकरोति मृतकल्पो भवति। तत एवं मदनविशिखे पतति सति विकलतरोऽतिशयेन विकलः सन्नत्यतीव विलपति॥२॥

ध्वनति मधुपसमूहे श्रवणमपिदधाति।

मनसि कलितविरहे निशि निशि रुजमुपयाति। तव वि०॥३॥

अपि च–ध्वनतीति। मधुपसमूहे ध्वनति सति श्रवणमपिदधाति आच्छादयति। निशि निशि प्रतिरात्रौ मनसि कलितविरहे सति झटिति रुजं पीडामुपयाति प्राप्नोति॥३॥

वसति विपिनविताने त्यजति ललितधाम।

लुठति धरणिशयने बहु विलपति तव नाम। तव वि०॥४॥

अपि च–वसतीति। विपिनविताने वनविस्तारे चण्डविषकल्पे वने वसति सन्तिष्ठते। त्वद्विरहेण ललितं मनोहरमपि धाम त्यजति। पुनः किं करोति? धरणिशयने तव नाम कृत्वा परिदेवनं करोति॥४॥

भणति कविजयदेवे विरहविलसितेन।

मनसि रभसविभवे हरिरुदयतु सुकृतेन। तव वि०॥ ५॥

अपि च–भणतीति। कविजयदेवे भणति सति विरहविलसितेन वियोगविलासेन रभसविभव उत्साहसम्पन्ने मनसि। अर्थात्तव सुकृतेन हरिरुदयतु उदयं प्राप्नोतु तव मनसि हरेरनुरागो वसतु॥५॥

अत्र वाक्यौचिती सङ्गीतराजे–'निःसारतालरचितो रागे केदारसंज्ञके। कविनामाङ्कितपदात्पाटैः स्वल्पतरैश्चितः॥ ततः पद्यं विलासं सोल्लासते जगतीपतेः। इत्थं हरिसमुदयागरुडपदसंज्ञकः प्रबन्धः पृथिवीभर्त्रा हरिभक्तेन वर्णितः॥' इति हरिसमुदयागरुड-पदनामा दशमः प्रबन्धः॥१०॥

पूर्वं यत्र समं त्वया रतिपतेरासादिताः सिद्धय-

स्तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे पुनर्माधवः।

ध्यायंस्त्वामनिशं जपन्नपि तवैवालापमन्त्रावलीं

भूयस्त्वत्कुचकुम्भनिर्भरपरीरम्भामृतं वाञ्छति॥२॥

इदानीं त्वय्येव माधवमनोऽस्तीति तां राधा प्रगुणीकरोति–पूर्वं यत्रेति। हे राधे! माधवस्तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे भूयो बाहुल्येन पुनरपि त्वत्कुचकुम्भनिर्भरपरीरम्भामृतं वाञ्छति। त्वत्कुचयोर्निर्भरो यः परिरम्भः स एवामृतमिव तत्तीर्थादमृतं जलम्। जलं हि कुम्भेनैव ग्राह्यं भवतीत्युक्तिलेशः। किं कुर्वन्? अनिशमनवरतं त्वां ध्यायंस्तवैवालापमन्त्रावलीं जपन्। एकान्तध्यानजपाभ्यां हि देवताग्रतो जाग्रतः पुरः स्फुरत्येव। तस्मिन्निति कस्मिन्? यत्र निकुञ्जमन्मथमहातीर्थे कामतीर्थे पूर्वं रतिपतेः कामस्य त्वयोपलक्षितास्त्वय्येव प्रसन्नायां लभ्याः सिद्धयः समं समकालमविलम्बेनैव प्राप्ताः। 'रतिपतेः' इत्यत्र कामस्याभिलषितस्येति वक्तव्ये 'रति' ग्रहणं तस्यामतिशयितप्रीत्युपादानार्थम्। अथवा–रतिपतेः कामात्त्वया सहायभूतया समं सिद्धय आसादिताः। तदाप्तये पुनः सहायभूतां त्वामेव वाञ्छति। अथ च यत्र निकुञ्जादौ कामपूरकतीर्थे येन यस्मात्सिद्धिराप्ता स तमेव ध्यायञ्जपन् निर्भरपरीरम्भामृतं मोक्षं वाञ्छतीत्युक्तिलेशः। शार्दूलविक्रीडितं वृत्तम्। अत्र काव्यलिङ्गमलङ्कारः॥२॥

रतिसुखसारे गतमभिसारे मदनमनोहरवेषम्।

न कुरु नितम्बिनि! गमनविलम्बनमनुसर तं हृदयेशम्॥१॥

साम्प्रतं तमभिमुखमभिसर्तुं राधा त्वरयति। तत्र पूर्वं ध्रुवपदं व्याक्रियते–धीरसमीर इति। इति पदार्थपाठः। कुत्रचिदस्ति। गोपीपीनपयोधरमर्दनचपलेन करयुगलेनाढ्य इत्यर्थः। 'आढ्यः शालिनि विख्यातः'। हे राधे! यमुनातीरे वने। यमुनातीरविषये वने। अथवा–वेतसवने वनमाली श्रीकृष्णो वसति। किम्भूते वने? धीरसमीरे

मन्दवायुनि। एतेन वायोस्त्रैविध्यमुक्तम्। तस्याश्च स्थानेनोत्कण्ठा जनिता। इति ध्रुवः॥ रतिसुखेति। हे नितम्बिनि! तं वनमालिनमनुसर। गमनविलम्बनमभिसाराय कालातिक्रमं न कुरु, नितम्बिनी हि बृहन्नितम्बत्वाच्चलितुं न शक्नोतीति तां त्वरयति। किम्भूतम्? अभिसारे सङ्केतस्थाने गतम्। किम्भूतेऽभिसारे? रतिसुखसारे रतिसौख्यप्रधाने। किम्भूतं तम्? मदनवत्कामवन्मनोहरवेशम्। पुनः किम्भूतम्? हृदयेशं मनस ईशम्। तव मनस्तदधीनमित्यर्थः। अथवा–हृदये वर्तमानं तं वनमालिनमिति योज्यम्। किम्भूतम्? आयुरेवेदमितिवत्सुखहेतुत्वाच्छ-मेव॥१॥

धीरसमीरे यमुनातीरे वसति वने वनमाली।

गोपीपीनपयोधरमर्दनचञ्चलकरयुगशाली॥ ध्रुवपदम्॥

नामसमेतं कृतसङ्केतं वादयते मृदुवेणुम्।

बहु मनुतेऽतनु ते तनुसङ्गतपवनचलितमपि रेणुम्॥ धीर०॥२॥

अपि च–नामसमेतमिति। हे राधे! स हरिर्मृदुवेणुं कोमलवंशीं वादयते। मृद्विति क्रियाविशेषणं वा। कथम्? नामसमेतं यथा स्यात्तथा च नामाक्षरसंयुक्तं कृतसङ्केतं यथा स्यात्तथा च। पुनस्ते तव तनुः शरीरं शरीरसङ्गतपवनचलितं रेणुमपि बहु मनुते। कथम्? अतनु अनल्पं यथा भवति तथा॥२॥

पतति पतत्रे विचलति पत्रे शङ्कितभवदुपयानम्।

रचयति शयनं सचकितनयनं पश्यति तव पन्थानम्॥ धीर०॥३॥

अपि च–पततीति। हे राधे! हरिः शयनं रचयति। तव पन्थानं पश्यति। कथम्? सचकितनयनं यथा भवति तथा। किम्भूतं वन्थानम्? शङ्कितभवदुपयानम्। शङ्कितं भवत्या उपयानमागमो यस्मिंस्तत्। क्व सति? पतत्रे पक्षिपत्रे पतंति सति। पुनः क्व सति? पत्रे वृक्षपत्रे विचलति सति॥३॥

मुखरमधीरं त्यज मञ्जीरं रिपुमिव केलिसुलोलम्।

चल सखि! कुञ्जं सतिमिरपुञ्जं शीलय नीलनिचोलम्। धीर.॥४॥

अपि च–मुखरमिति। हे सखि राधे! कुञ्जं चल। अभिसारानुरूपां सामग्रीं शिक्षयति–मञ्जीरं नूपुरं त्यज। किम्भूतं मञ्जीरम्? अधीरमङ्गम्। अत एव मुखरं वाचालमभिसारोचितं न जानाति। अथवा–साध्वेतन्मञ्जीरस्य मुखरत्वं यतो निमित्तनैमित्तिकं, कुतो मञ्जीरध्वनावित्यत उत्पत्तेः। पुनः किम्भूतम्? केलौ क्रीडायां सुलोलमतिलोलम्। अत एव रिपुमिव। अपि च–नीलनिचोलं नीलं रक्तकृष्णं वस्त्रं शीलय परिधेहि। किम्भूतम्? कुञ्जे तिमिरपुञ्जेन सहितम्। अथवा–सतिमिरपुञ्जं यथा स्यात्तथा चल॥४॥

उरसि मुरारेरुपहितहारे घन इव तरलबलाके।

तडिदिव पीते! रतिविपरीते राजसि सुकृतविपाके। धीर०॥५॥

उरसीति। हे राधे! हे पीते पीतवर्णे गौरि! त्वं मुरारेरुरसि सुकृतविपाके पुण्यपरिणामे राजसि राजिष्यसि। वर्तमानसामीप्ये वर्तमानवत्। किम्भूत उरसि? उपहित आरोपितो हारो यस्मिन्। का कस्मिन्निव? तरलबलाके चञ्चलपक्षिविशेषे घन इव मेघ इव। केव? तडिदिव। कदा? रतिविपरीते पुरुषायितरतिसमये। उपहित-हारमुरस्तरलबलाकघनेनोपमीयते। सा पीता तडित्। तस्याःपुरुषायिते चञ्चलत्वम्॥५॥

विगलितवसनं परिहृतरसनं घटय जघनमपिधानम्।

किसलयशयने पङ्कजनयने निधिमिव हर्षनिदानम्। धीर०॥६॥

विगलितेति। हे राधे! किसलयशयने शय्यायां वर्तमाने पङ्कजनयने पुण्डरीकाक्षे जघनं घटय। किम्भूतं जघनम्? विगलितवसनम्, स्वयमेव ततः परिहृतरसनं त्यक्तमेखलम्। अत एव वसनपिधानरहितम्। अत एव निधिना उपमीयते। कमिव? निधिमिव। किम्भूतं निधिं जघनं च? हर्षनिदानं हर्षस्यादिकारणम्॥६॥

हरिरभिमानी रजनिरिदानीमियमपि याति विरामम्।

कुरु मम वचनं सत्वररचनं पूरय मधुरिपुकामम्। धीर०॥७॥

हरिरभिमानीति। हे राधे! सत्वररचनं शीघ्रसाधनं यथा स्यात्तथा मम वचनं कुरु। किम्भूतं वचनम्? मधुरिपुकामं कृष्णवाञ्छां पूरय। न पूर्यते चेत् किं स्यात्? हरिरभिमानी, त्वत्तो लाघवं न सहते, पश्चत्त्वां त्यक्ष्यति। पधदपि करिष्यसि चेदिदानीमेव कुरु। अन्यथेदानीमियं रजनिरपि विरामं याति। अभिसारकालोऽपि यास्यति। वर्तमानसामीप्याद्व र्तमानवत्॥७॥

श्रीजयदेवे कृतहरिसेवे भणति परमरमणीयम्।

प्रमुदितहृदयं हरिमतिसदयं नमत सुकृतकमनीयम्॥ धीर०॥८॥

श्रीजयदेवेति। हे वैष्णवाः! हरिं नमत नमस्कुरुत। किम्भूतं हरिम्? जयदेवे अतिसदयम्। किम्भूते जयदेवे? परमरमणीयमिदं पूर्वोक्तं भणति। तत एव प्रमुदितहृदयम्। पुनः किम्भूते जयदेवे? कृतहरिसेवे। किम्भूतं हरिम्? सुकृतमिव कमनीयं मनोहरम्॥८॥

विकिरति मुहुः कुश्वासानाशाः पुरो मुहुरीक्षते

प्रविशति मुहुः कुञ्जं गुञ्जन्मुहुर्बहु ताम्यति।

रचयति मुहुः शय्यां पर्याकुलं मुहुरीक्षते

मदनकदनक्लान्तः कान्ते! प्रियस्तव वर्तते॥३॥

इदानीं सत्वरागमनाय प्रोत्साहयति—विकिरतीति। हे कान्ते! तव प्रियो मदनकदनक्लान्तो वर्तते मदनेन क्लान्तिं प्राप्तो वर्तते। तथाविधः सन्किं करोतीत्याह-त्वं नागतैवेति कृत्वा मुहुः श्वासान्विकिरति निःश्वासधारां मुञ्चति। नागतैवेति कृत्वाग्रे मुहुर्वारंवारमाशा ईक्षते विलोकयति। व्याकुलतया कस्या दिशः समेष्यतीति सर्वा एककालमिवावलोकयति। तत्राप्यदृष्ट्वा भ्रान्तः सन्कुञ्जं प्रविष्टा भविष्यतीति मुहुर्वारंवारं कुञ्जं प्रविशति। मुहुर्मुहुरिति कोऽर्थः? तत्राप्यदृष्ट्वा बहिर्निर्यातस्तत्रैव निह्नुत इव तिष्ठतीति मुहुर्मुहुः प्रविशतीति। मुहुर्मुहुर्वारंवारं 'कुतो नागता, किं केनचिन्निवारिता, उत कुतो भयाद्वा?' इत्यादि तस्या अनागमनहेतुं विमृश्य मुहुर्वारंवारं बहु बहुविधं गुञ्जन् अव्यक्तशब्दं कुर्वन् ताम्यति ग्लायति। अथवा—वृथेदं विमर्शनम्, आगमिष्यत्येवेति मुहुः शय्या रचयति।

तथाप्यदृष्ट्वा पर्याकुलं यथा स्यात्तथा ममानुरागादागमिष्यत्येवेति मुहुरीक्षते इति 'कदन' शब्दतात्पर्यम्। हरिणी छन्दः। दीपकालङ्कारः॥३॥

त्वद्वाम्येन समं समग्रमधुना तिग्मांशुरस्तं गतो
गोविन्दस्य मनोरथेन च समं प्राप्तं तमः सान्द्रताम्।
कोकानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना
तन्मुग्धे! विफलं विलम्बनमसौ रम्योऽभिसारक्षणः॥४॥

इदानीं साम्प्रतमेव गन्तुं साम्प्रतमिति हेतुमाह—त्वद्वाम्येनेति। हे मुग्धे! समग्रं यथा स्यात्तथाधुना त्वद्वाम्येन समं तव वक्रतया सहितं रविरस्तं गतः (रविः) तदाभिमानश्चोभयमेवाभिसारविलम्बकर्तृ गतमित्यर्थः। च पुनर्गोविन्दस्य मनोरथेन सह तमः सान्द्रतां प्राप्तम्। तिग्मांशावस्तं गते चन्द्रे चानुदिते तमः सान्द्रं भवत्येव। अयं कालोऽभिसारत्वरायै। अनु च सान्द्रे तमसि मत्प्रियाऽऽगमिष्यतीति गोविन्दस्य मनोरथो वृद्धिं प्राप्तः। अनु च मम प्रार्थना कोकानां करुणस्वनेन सदृशी दीर्घा जाता। सदृशीति विरहाधिक्यात्करुणनिवेदकस्वरत्वाच्च। तत्तस्मात्कारणाद्विलम्बनं विफलम्, अभिसरणक्षणातिपातो निरर्थकः। असावभिसारक्षणो रम्यो वर्तते। ईदृशी प्रियवादिनी प्रियसखी, सान्द्रान्धतमसं चानुकूलं, नीलनिचोलादि साधनं, प्रियतमस्त्वदेकतानः। एवं सति गमनविलम्बने 'मुग्धे' इति सम्बोधनमौचितीमावहति। सहोक्तिरलङ्कारः। शार्दूलविक्रीडितं वृत्तम्॥४॥

आश्लेषादनु चुम्बनादनु नखोल्लेखादनु स्वान्तज-
प्रोद्बोधादनु सम्भ्रमादनु रतारम्भादनु प्रीतयोः।
अन्यार्थं गतयोर्भ्रमान्मिलितयोः सम्भाषणैर्जानतो-
र्दम्पत्योरिह को न को न तमसि व्रीडाविमिश्रो रसः॥५॥

तत्रागतायास्ते बहुविधकामकौतुकं भविष्यतीति प्रलोभयति—आश्लेषादिति। इह तमसि वर्तमाने दम्पत्योर्व्रीडाविमिश्रः कः को रसो न इति न, अपि तु सर्व एव रसो भवतीति। व्रीडाविमिश्रत्वे हि सर्वमपि सर्वरसागमं भवतीति। किम्भूतयोर्दम्पत्योः? अन्यार्थं गतयोः परस्त्रीपरपुरुषत्वेन प्राप्तयोः।

पुनः किम्भूतयोः? भ्रमान्मिलितयोः प्रतिकुञ्जमितस्ततः परिभ्रमणान्मिलितयोः। सान्द्रे तमसि परस्परालापैरेव जानतोः। अथवा–आलापैरित्यत्र सात्त्विकभावेन स्वरभङ्गादेवावगमात्। अथवा–अन्यमर्थं प्रयोजनमुद्दिश्य गतयोः। परस्त्रीपरपुरुषौ हि व्याजान्तरेणैव मिलतः। अन्येषां भ्रान्तिमुत्पाद्य मिलितयोः। तमेव रसमाह–आश्लेषादनु भयस्थायिभावो भयानकः प्रादुर्भावमासादयति। चुम्बनादनु मा मेति क्षामाक्षरोल्लापिनीं कान्तां कामलप्य कृतं हठवृत्त्येति शोकमिवानुभवन्करुणाकलितान्तःकरणो भवति। तदनु प्रोत्साहनार्थमुत्साहात्मा नखोल्लेखादनु वीरोऽवतरति। एवं साधने सम्मिलिते किमिदमपूर्वं सुखमन्वभवमिति भावान्तरं गमितयोर्विस्मयसहचरोऽद्भुत उद्भटतामाटीकते। एवं च कामोद्बोधे नानाविलासविलसितादनु हाससहावस्थानो हास्यः समुल्लसति। एवं कृतपरिकरसङ्करः सकलरसचक्रवर्ती आनन्दमधुसन्दोहमधुरो रतिसहचरः शृङ्गाररसः समुन्मिषपि। तद्व्यतिकरादनु प्रीतयोरुक्तरसः सर्वोऽपि व्रीडासंवलितः शृङ्गारत्वे समुन्मिषति। अत्राश्लेषानन्तरं चुम्बनं, ततो नखक्षतं, ततः कामविकाराः, ततो मैथुनं, ततः प्रीतः, ततो रसभावनेति क्रमोऽपि कामशास्त्रकथितः। तदुक्तं भरतेन–'आश्लेषचुम्बननखक्षतकामबोधशीघ्रत्वमैथुनमनन्तसुखप्रबोधम्। प्रीतिस्ततोऽपि रसभावनमेव कार्यमेवं नितान्तचतुराः सुचिरं रमन्ते॥' शार्दूलविक्रीडितं छन्दः। दीपकमलङ्कारः समुच्चयो भ्रान्तिमांश्च॥५॥

सभयचकितं विन्यस्यन्तीं दृशं तिमिरे पथि
प्रतितरु मुहुः स्थित्वा मन्दं पदानि वितन्वतीम्।
कथमपि रहःप्राप्तामङ्गैरनङ्गतरङ्गिभिः
सुमुखि! सुभगः पश्यन्स त्वामुपैतु कृतार्थताम्॥६॥

इदानीं त्वत्प्राप्तिरेव श्रीकृष्णस्य सर्वस्वमिति दर्शयन्त्याह–सभयेति। हे सुमुखि राधे! स सुभगः श्रीकृष्णस्त्वां पश्यञ्जानन्कृतार्थतामुपैतु कृतकृत्यो भवतु। अत्र दृशिर्ज्ञाने वर्तते। किम्भूतां त्वाम्? तिमिरे तिमिरयति पथि मार्गे सभयचकितं यथा स्यात्तथा दृशं विन्यस्यन्तीम्।

सभयचकितमिति भयविस्मयस्थायिभावौ भयानकाद्भुतावुक्तौ भवतः। निबिडे हि तमसि भयं भवत्येव। तादृशी च भावितभयानके पथि सङ्केतस्थानं यामीति विस्मयः। एवं प्रियस्यापि प्रियतमेन समं समागमो भविष्यति न वेति शङ्कावकाशोऽपि। किम्भूतां त्वाम्? प्रतितरु तरुं तरुं प्रति स्तननितम्बभारभरालसतया मुहुर्वारंवारं स्थित्वा कोऽपि मां मा द्राक्षीदिति मन्दं पदानि वितन्वतीम्। प्रतितरु अत्र वा स मे प्रियो भविष्यतीत्याशङ्कया मुहुः स्मित्वेति योजनीयम्। किम्भूताम्? कथमपि केनचित्प्रकारेण पूर्वोक्तसखीवचननीलनिचोलादिसाधनसत्पत्त्याऽभिमान-परित्यागेन मय्यनुकम्पा वा रहःप्राप्ताम्। पुनः किम्भूताम्? अनङ्गतरङ्गिभिः कामकल्लोलकलैरङ्गैरुपलक्षिताम्। अत्र तमसो नैबिड्याद्दर्शनायोग्य-त्वेऽङ्गस्पर्शनादेव ज्ञातेति कृत्वा दृशेर्ज्ञानार्थो व्याख्यात इत्याकूतम्। अत्र हरिणी वृत्तम्। अतिशयोक्तिरलङ्कारः॥६॥

राधामुग्धमुखारविन्दमधुपस्त्रैलोक्यमौलिस्थली-
नेपथ्योचितनीलरत्नमवनीभारावतारान्तकः।
स्वच्छन्दं व्रजसुन्दरीजनमनस्तोषप्रदोषोदयः
कंसध्वंसनधूमकेतुरवतु त्वां देवकीनन्दनः॥७॥

इदानीं सम्भोगाख्यं शृङ्गारमवतारयंस्तदापातनिकाद्वारेण सर्गान्ताशिषमाह–राधामुग्धेति। देवकीनन्दनः श्रीकृष्णस्त्वामवतु रक्षतु। किम्भूतो देवकीनन्दनः? राधामुग्धमुखारविन्दमधुपः। मुखमरविन्दमिव मुखारविन्दं, मुग्धं च तत् मुखारविन्दं च मुग्धमुखारविन्दम्। राधाया मुग्धमुखारविन्दं तस्मिन्मधुप इव मधुपः। अनेन भावी सम्भोगो द्योतितः। पुनः किम्भूतो हरिः? त्रैलोक्यमौलिस्थलीनां किरीटदेशादीनां नेपथ्योचितं भूषणोचितं नीलरत्नमिव। पुनः किम्भूतो देवकीनन्दनः? अवन्या भूमेर्भारायावतारो जन्म येषां शिशुपालदन्तवक्त्रादीनां तेषामन्तक इवान्तकः। यमसदृशोऽभूदित्यर्थः। पुनः किम्भूतो देवकीनन्दनः? व्रजे सुन्दर्यः व्रजसुन्दर्यः। व्रजसुन्दरीणां जनस्तस्य मनस्तोषप्रदोषोदय इव। पुनः किम्भूतो हरिः? कंसध्वंसनधूमकेतुः कंसस्य ध्वंसनं विनाशस्तत्र

धूमकेतुरिव विनाशसूचकस्ताराविशेष इव। जातमात्र एव कंसविनाशं सूचितवानित्यर्थः। अत्र कंसध्वंसने गोपीनां परमेश्वरादन्यत्र गतिविनाशे धूमकेतुर्बृहद्भानुरिव प्रकाशकत्वात्। प्रकाशे हि स्वेच्छाविहारभङ्गो जायते। अथवा–कसेः शातनार्थत्वाद्राधायाः कामेन यच्छातनं तत्र धूमकेतुरिव। स्वच्छन्दप्रदोषोदय इति यदा यदा प्रदोषोदयं वाञ्छति तदा तदा स एवेति। अथवा–प्रगतो दोषोदयो यस्मात्तेन सह क्रीडतीनां दोष एव नास्तीति। अथ च राधामुग्धमुखारविन्दे मधु माधुर्यं पाति रक्षतीति। चिरं विप्रलम्भे हि प्रियदर्शनान्माधुर्यमुपपद्यत एवेति पदानामौचिती। अत्र श्लेषलुप्तोपमापरिकरवर्णोपमालङ्कारः। शार्दूलविक्रीडितं वृत्तम्। पाञ्चाली रीतिः। आरभटी वृत्तिः। गीत्यादि पूर्वोक्तमेव॥७॥

# षष्ठः सर्गः
# ( धन्यवैकुण्ठकुङ्कुमः )

अथ तां गन्तुमशक्तां चिरमनुरक्तां लतागृहे दृष्ट्वा।

तच्चरितं गोविन्दे मनसिजमन्दे सखी प्राह॥१॥

इदानीं कुत्रचित्कुञ्जे राधां संस्थाप्य दूती तच्चेष्टितं कृष्णे विनिवेदयति–अथ तामिति। अथानन्तरं राधासखी तच्चरितं राधायाश्चरितं गोविन्दे निवेदयामास। किम्भूते गोविन्दे? मनसिजमन्दे। किं कृत्वा? तां राधां गन्तुमशक्तां ज्ञात्वा। शरीरान्तर्वातन्याः शक्तेर्दर्शनाविषयत्वेन दृष्ट्वेति दृशिरत्र ज्ञानार्थः। किम्भूताम्? तां चिरं गोविन्देऽनुरक्ताम्। अथवा–लतागृहे इति तस्याधिकरणत्वेन व्याख्येयम्। अत्रैव लतागृहे सङ्केतस्य कृतत्वात। आर्याछन्दः॥१॥

पश्यति दिशि दिशि रहसि भवन्तम्।

तदधरमधुरमधूनि पिबन्तम्॥

नाथ हरे! सीदति राधाऽऽवासगृहे॥ ध्रुवपदम्॥१॥

पूर्वं ध्रुवपदं व्याक्रियते–नाथ हरे इति। हे नाथ! आवासगृहे सङ्केतस्थाने राधा सीदति अवसादं प्राप्नोति॥ अथ पदानि–पश्यतीति। सा राधा रहसि रहोनिमित्तान्तरनिमित्तम् एकान्तनिमित्तं वा दिशि दिशि भवन्तं पश्यति। सर्वा दिशस्तस्यास्त्वन्मया एव जाता इत्यर्थः। त्वदद्वैतमभवदित्यर्थः। 'सङ्गमविरहविवेके वरमिव विरहो न सङ्गमस्तस्याः। सङ्गे सापि तथैका त्रिभुवनमपि तन्मयं विरहे।' किं कुर्वन्तम्? तदधरमधुरमधूनि पिबन्तम्। तस्या राधाया एव अधरमधूनि पिबन्तम् एवमवस्थमेवेत्यर्थः। तदधरसंसर्गान्मधुराणि मधूनि यान्यक्षराणि तानि शृण्वन्तम्। अत्यादरं श्रवणं पानमुच्यते। तस्यादरश्रवणेन तस्यालोकत्वं द्योत्यते। प्रतिवञ्चनाभावात्॥१॥

त्वदभिसरणरभसेन वलन्ती।

पतति पदानि कियन्ति चलन्ती॥ नाथ हरे०॥२॥

त्वदभिसरणेति। हे माधव! सा राधा त्वदभिसरणे रभसेन वलन्ती सम्भजमाना। अर्थादभिसारवेगम्। कियन्ति पदानि चलन्ती सती पतति। तस्मात्स्थानादधिकं गन्तुमशक्तेत्यर्थः॥२॥

विहितविशदबिसकिसलयवलया।

जीवति परमिह तव रतिकलया॥ नाथ हरे०॥३॥

विहितेति। सा परं तव रतिकलया रतिविज्ञानेन रतिशिल्पेन परं जीवति, नान्य उपायः। किम्भूता सा? कृतपाण्डुरमृणालाङ्कुरकटका॥३॥

मुहुरवलोकितमण्डनलीला।

मधुरिपुरहमिति भावनशीला॥ नाथ हरे०॥४॥

मुहुरिति। सा मुहुर्वारंवारमवलोकिता मण्डनानां लीला विलासो यया सा। इमानि तानि मण्डनानि तत्सुरतसमारम्भयोग्यानीति मुहुर्मुहुः कानिचित्परिदधाति। किम्भूता सती? अहं मधुरिपुरिति भावनशीला ध्यानस्वभावा। एतेन स्त्रीयोग्यानि मण्डनानि मुक्त्वा त्वद्विरहदुःखापनोदाय पुरुषायितसुरतयोग्यानि मण्डनानि दधाना स्वयमेव त्वद्रूपीभूय कालमतिवाहयतीत्यर्थः। अथवा त्वदलाभात्स्वयमेव त्वं च राधा च भूत्वा। 'स्त्रीणां प्रियालोकफलो हि वेशः' इति त्वच्चेतोहराणि मण्डनानि आदधाना वर्तते॥४॥

त्वरितमुपैति न कथमभिसारम्।

हरिरिति वदति सखीमनुवारम्॥ नाथ हरे०॥५॥

त्वरितमिति। सा राधा अनुवारं वारंवारं सखीमिति वदति। इतीति किम्? हे सखि! हरिस्त्वरितं शीघ्रम् अभिसारं सङ्केतस्थानं कथं नोपैति कथं न याति?

श्लिष्यति चुम्बति जलधरकल्पम्।

हरिरुपगत इति तिमिरमनल्पम्॥ नाथ हरे०॥६॥

श्लिष्यतीति। हे हरे! सा हरिरुपगत इति कृत्वा स्निग्धनीलत्वसाम्यादनल्पं स्थूलं तिमिरमन्धकारं श्लिष्यति चुम्बति च। किम्भूतं तिमिरम्। किञ्चिज्जलधरसदृशम्॥६॥

भवति विलम्बिनि विगलितलज्जा।

विलपति रोदिति वासकसज्जा॥ नाथ हरे०॥७॥

भवतीति। हे हरे! सा वासकसज्जा नाम नायिका। भवति त्वयि विलम्बनकारिणि सति विलपति विलापान्करोति। रोदिति अश्रूणि विमुञ्चति। 'दूतीमहरहः प्रेष्य सज्जिते वासवेश्मनि। यस्या न मिलति प्रेयान्सा हि वासकसज्जिका॥' इति॥७॥

श्रीजयदेवकवेरिदमुदितम्।

रसिकजनं तनुतामतिमुदितम्॥ नाथ हरे०॥८॥

श्रीजयदेवेति। श्रीजयदेवकवेरिदमुदितं रसिकजनम् अतिमुदितं हृष्टतरं तनुताम्। अथवा–रसिकजने मुदितं हर्षं तनुताम्॥८॥

तथा च सङ्गीतराजे–'मालवीयः स्मृतो गौडो रागस्तालोऽड्डतालकः। शृङ्गारो विप्रलम्भाख्यो रसो देवादिवर्णनम्। पदसन्ततितस्तेनाः पाटाः स्वरसमुच्चयः॥ ततः पद्यानि यत्र स्युर्लयमध्यममानतः। स प्रबन्धवरो ज्ञेयो धन्यवैकुण्ठकुङ्कुमः॥' इति धन्यवैकुण्ठकुङ्कुमनामा द्वादशः प्रबन्धः। शठो नायकः। गूढविप्रियकृच्छठः। चिन्तात्वरावती वासकसज्जा नायिका। तल्लक्षणं–'केलीगृहमथात्मानं मण्डयत्येष्यति प्रिये। सखी दूती......समाप्तिं समगादिति' (?)॥८॥

विपुलपुलकपालिः स्फीतसीत्कारमन्त-

र्जनितजडिम काकुव्याकुलं व्याहरन्ती।

तव कितव! विधायामन्दकन्दर्पचिन्तां

रसजलनिधिमग्ना ध्यानलग्ना मृगाक्षी॥१॥

इदानीं तस्यास्तदेकपरत्वमाह–विपुलेति। हे कितव धूर्त! सा मृगाक्षी तव अमन्दकन्दर्पचिन्तामतिशयितकामचिन्तां कृत्वा विधाय ध्यानलग्ना

सती स्मरजलनिधिमग्ना शृङ्गारसागरे लीना। किम्भूता सा? विपुला महती रोमाञ्चपङ्क्तिर्यस्याः सा। अपि किम्भूता? स्फीतसीत्कारं प्रवृद्धसीत्कारं यथा स्यात्तथा। अन्तः अर्थात् विरहेणैव जनिताभ्यां जडिमकाकुभ्यां व्याकुलं यथा स्यात्तथा। व्याहरन्ती भाषमाणा। 'ननमयययुतेयं मालिनी भोगिलोकैः' इति मालिनी छन्दः। रसवदलङ्कारः॥१॥

अङ्गेष्वाभरणं करोति बहुशः पत्रेऽपि सञ्चारिणि
प्राप्तं त्वां परिशङ्कते वितनुते शय्यां चिरं ध्यायति।
इत्याकल्पविकल्पतल्परचनासङ्कल्पलीलाशत-
व्यासक्तापि विना त्वया वरतनुर्नैषा निशां नेष्यति॥२॥

इदानीं सा राधा ध्यानादिना त्वया सह रममाणापि साक्षात्त्वामलभमाना न कथञ्चिन्निर्वृतिमेष्यतीत्याह–अङ्गेष्विति। हे माधव! एषा मत्सखी। एषेति एतत्पदप्रत्यक्षे व्यापाराद्बुद्धौ प्रत्यक्षीकृत्याह। एषा वरतनुरित्येवं क्रमेण आकल्पविकल्पतल्परचनासङ्कल्पलीलाशतव्यासत्तापि नेपथ्य-वितर्ककिसलयशय्याविरचनत्वत्प्राप्त्युचितबिलासशयनेष्वासक्तापि सती त्वया विना निशां न नेष्यति निशां नेतुं न शक्ता भविष्यतीति। इतीति किम्? तान्येव कानिचिदाह–अङ्गेषु अवयवेषु त्वचिंत्तापहारि आभरणं करोति। कथं? बहुशः। बहुश इति अननुरूपपरित्यागेन त्वच्चित्तप्रीतिकरपरिग्रहो द्योत्यते। अपि च–पत्रे वृक्षत्रे पतत्रिपक्षेऽपि वा। 'अपि' शब्दात्तृणादिपरिस्पन्दो लभ्यते। तस्मिन्सञ्चारिणि सञ्चरणशीले त्वामेव प्राप्तं परिशङ्कते विचारयति। अत्र एवकारं विनापि 'पार्थो धनुर्धरः' इतिवत्सर्वाणि वाक्यानि सावधारणान्येवेति कृत्वा एवकाराक्षेपः। अपि च अवश्यमागमिष्यतीति कृत्वा शय्यां वितनुते। ततस्त्वामपश्यन्ती चिरं त्वामेव ध्यायति। शय्यां विरचय्य तेन सह मयात्रैव कामकेलयः कर्तव्या इति चिरं ध्यायति। अन्योऽपि यः कश्चिन्मानसव्यथाभिभूतो रजन्यतिवाहनेऽसमर्थः स तदतिवाहनार्थं कार्यान्तरव्यासक्त्या चेतो रमयति। शार्दूलविक्रीडितं वृत्तं, समुच्चयोऽलङ्कारः॥२॥

किं विश्राम्यसि कृष्णभोगिभवने भाण्डीरभूमीरुहि
भ्रातर्यासि न दृष्टिगोचरमितः सानन्दनन्दास्पदम्।
राधाया वचनं तदध्वगमुखान्नन्दान्तिके गोपतो
गोविन्दस्य जयन्ति सायमतिथिप्राशस्त्यगर्भा गिरः॥३॥

इदानीमाशीर्व्याजेन सर्गान्तमाविष्करोति–किमिति। गोविंन्दस्य गिरो जयन्ति सर्वोत्कर्षेण वर्तन्ते। भावगर्भतया वक्तुर्वैदग्ध्यख्यापनेन सर्वोत्कृष्टत्वम्। तत्त्वेन च नमस्कार्यत्वम्। किम्भूता गिरो वाचः? सायमतिथिप्राशस्त्यगर्भाः। सायंकालेऽतिथयः सायमतिथयः तेषां प्राशस्त्यं स्वागतादिसम्भारेण प्रशंसा, तद्गर्भे यासां ताः। तथा–किंविशिष्टस्य गोविन्दस्य? नन्दान्दिके नन्दसमीपे तत्तादृक्सङ्केतसूचनारूपमध्वगमुखान्निःसृतं राधाया वचनं गोपतः गोपायितुः। गां पालयतीति गोपः, गोपायतेः पचाद्यच्। 'आदायः–' इति तलोपे सार्वविभक्तिकस्तसिः। तस्य गोपतः। अत्र पितुः सङ्केताशङ्का मा प्रासाङ्क्षीदिति गोपने तात्पर्यम्। अत्र तदपह्नवादपह्नुतिरलङ्कारः। प्रशंसाछद्मना व्याजोक्तिरपि। पितुः समीपे तादृग्वचो लज्जावहमिति तदपाकरणार्थम् अप्रस्तुतप्रशंसापि। तदिति किम्? हे भ्रातः पथिक! भाण्डीरभूमीरुहि इतः वटवृक्षे। किं विश्राम्यसि? अत्र विश्रामं मा कृथाः। कुत इति हेतुगर्भविशेषणमाह। किंविशिष्टे वृक्षे? कृष्णभोगिभवने। कृष्णश्चसौ भोगी च कृष्णभोगी, तस्य भवनं तस्मिन्। कृष्णसर्पावासे इत्यर्थः। अत्र 'भ्रातृ' पदेन भ्रातृव्यत्वम्। तेन च मत्सङ्केतस्थानमेतदिति व्यज्यते। पक्षे–कृष्णश्चासौ भोगी शृङ्गारी च तस्य निवासः। अत्रार्थद्वयाश्लेषिकृष्णशब्देन श्लेषोऽलङ्कारः। तर्हि किं कुर्वित्याशङ्क्याह–इतो वटात्सानन्दनन्दास्पदं न यासि अपि तु याहि इति लोडर्थलक्षणो लट्। सानन्दमृद्धिमच्च तन्नन्दास्पदं चेति। अनेनात्र अन्यपरित्यागेन यत्प्रार्थ्यते तत्सुलभमिति। तर्हि दूरे भविष्यतीत्याशङ्क्याह–दृष्टिगोचरम् आसन्नमेव। सानन्देति पथिकविशेषणं वा। साम्प्रतमानन्देऽपि सर्पदंशादकुशलतामाप्स्यसीति औचितीमाह। अत्र कृष्णवटाद्यैरालम्बनैर्विभावैस्तदपाकृतिनिषेधाभिव्यक्तो रतिस्थायी विप्रलम्भाख्यः शृङ्गारो रसः। आशीरुत्तरे अलङ्कृती॥

निसर्गचित्रोज्ज्वलयुक्तिसर्गं व्याचष्ट षष्ठं रसिकप्रियायाः।
सर्गं नृपग्रामकिरीटरत्नं श्रीकुम्भकर्णस्तृणितस्मरोऽत्र॥३॥
इति श्रीमहाराजाधिराजाभिनवभरतश्रीकुम्भकर्णविरचिते
श्रीकुम्भस्वामिमन्दरस्वादरे गीतगोविन्दविवरणे
वासकसज्जावर्णने धन्यवैकुण्ठो नाम षष्ठः सर्गः॥६॥

# सप्तमः सर्गः

## ( नागरनारायणः )

अत्रान्तरे च कुलटाकुलवर्त्मघात-
सञ्जातपातक इव स्फुटलाञ्छनश्रीः।
वृन्दावनान्तरमदीपयदंशुजालै-
र्दिक्सुन्दरीवदनचन्दनबिन्दुरिन्दुः॥१॥

नृपः कुम्भकर्णः श्रुतं वाचि धत्ते मनोऽधीश्वरासेवने सन्निधत्ते।
हृदीशं परं वासुदेवं निधत्ते वरं गीतगोविन्दगानं विधत्ते॥

इदानीं मानिनीमानखण्डनाखण्डमण्डलं चन्द्रोदयं वर्णयन्नाह– अत्रान्तर इति। अत्रान्तरे एतस्मिन्नवसरे इन्दुर्वृन्दावनान्तरमंशुदीपैरदीपयत् प्रकाशितवान्। किं विशिष्टः? स्फुटलाञ्छनश्रीः स्फुटकलङ्कशोभः। उत्प्रेक्षते–कुलटाकुलवर्त्मघातसञ्जातपातक इव। अन्योऽपि यः कश्चन यस्य कस्यचन मार्गघातं करोति स कलङ्की भवत्येव। किम्भूत इन्दुः? दिक्सुन्दरीवदनश्रीखण्डतिलक इव। वसन्ततिलका। अत्र रूपकोत्प्रेक्षे अलङ्कृती॥१॥

# अमरुशतकम्

ज्याकृष्टिबद्धखटकामुखपाणिपृष्ठ-
प्रेङ्खन्नखांशुचयसंवलितोऽम्बिकायाः
त्वां पातु मञ्जरितपल्लवकर्णपूर-
लोभभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः॥१॥

तत्रादिमोऽयमाशंसनश्लोकः–ज्याकृष्टीति।

'यद्गतागतिविश्रान्तिवैचित्र्येण विवर्तनम्। तारकायाः कलाभिज्ञास्तं कटाक्षं प्रचक्षते॥' सर्वमङ्गलायाः कटाक्षस्त्वां पातु रक्षतु। किंविशिष्टः?

ज्याकृष्टीत्यादि। बाणासनगुणाकर्षणेन रचितो यः खटकामुखो नाम हस्तस्तस्य पृष्ठं तत्र परिस्फुरन् यः करजकिरणकलापस्तेन संवलितः करम्बितः। खटकामुखलक्षणं चैतत्–'अस्या एव यदा मुष्टेरूर्ध्वोऽङ्गुष्ठः प्रयुज्यते। हस्तकः शिखरो नाम तदा ज्ञेयः प्रयोक्तृभिः॥ शिखरस्यैव हस्तस्य यदाङ्गुष्ठनिपीडिता। प्रदेशिनी भवेद्वक्रा कपित्थो जायते तदा॥ उत्क्षिप्ता च यदा वक्रानामिका सकनीयसी। एतस्यैव कपित्थस्य तदा स्यात्खटकामुखः॥' अथ कटाक्षस्योपमानगर्भं विशेषणमाह–पुनः किंविशिष्टः? मञ्जरितेत्यादि। मञ्जरी उद्भिद्यमानमुकुलसंततिः। सा संजातास्येति तारकादिभ्य इतच्। मञ्जरितो यः पल्लवः स एव कर्णपूरस्तत्र लोभस्तेन भ्रमन्यो भ्रमरस्तस्य विभ्रमो विलासस्तं विभर्तीति क्विम्। इति तावद्वाक्यार्थः। रहस्यं चैतत्परमार्थसहृदया मन्यन्ते-यं रसमुपनिबद्धुमेष कविः प्रवृत्तः स यद्यप्यकृत्रिमानुरागस्त्रीपुंसपर-स्परानुरागकल्लोलितः परां कोटिमधिरोहति तथापि नायिकायाः प्राधान्यम्। तत्प्राधान्यप्रकाशनपरश्चायमौचित्यात्कटाक्षमुख्यत्वेनाभीष्टदेवताशंसनश्लो-कोऽपि प्रथमं लिखितः, 'क्षिप्तो हस्तावलग्नः' (श्लो.२) इत्यादिश्लोकस्तु चरमम्। किं च धर्मार्थयोरुपरिवर्तमानस्य मोक्षात्किंचिदर्वाचीनस्य पुरुषार्थविशेषस्य निधानमपत्येनैव पितॄणामानृण्यहेतुभूता नितम्बिनीर्विहाय किमन्यदुपादेयम्। यदुक्तमुपाध्यायेन बालसरस्वत्यपरनाम्ना मदनेन–'संसारे यदुदेति किंचन फलं तत्कृच्छ्रसाध्यं नृणां, किं त्वेतत्सुखसाध्यमस्ति युगलं सम्यग्यदि ज्ञायतो यल्लक्ष्मीसमुपार्जनं पुलकिनां रक्तस्वरं गायतां, यत्कान्तारतिनिस्तरङ्गमनसामुपद्यते नन्दनः॥' कामशास्त्रेऽप्युक्तम्–'किं स्यात्परत्रेत्याशङ्का यस्मिन्कार्ये न जायते। न चार्थघ्नं सुखं चेति शिष्टास्तस्मिन्व्यवस्थिताः॥ परस्त्रीगतोऽप्ययं रस उपनिबध्यमानो न पातकाय। एवंविधसंविधानकैः स्त्रीणां चारित्रखण्डनं भवति, तस्मात्प्रयत्नेनैताः संरक्षणीया इत्युपदेशपर्यवसितत्वात्। अन्यथा वात्स्यायनो महर्षिस्तत्तदुपायैः परस्त्रीसाधनं कथं प्रणीतवान्। उक्तं च–'संदृश्य शास्त्रतो योगान्पारदारिकलक्षितान्। न याति च्छलनं कश्चित्स्वदारान्प्रति शास्त्रवित्॥' यद्यपि धनुर्वेदे खटकामुखः प्रणीतोऽस्ति, तथाप्यत्र नृत्यसंस्कार एवायं हस्तको देव्याः। एवं च महान्विशेषः। लास्यलीलयैव

देव्या दुरतिक्रमदैत्यकुलक्षयः कृत इति प्रभावातिशयप्रतीतेः। 'यतो हस्तस्ततो दृष्टिर्यतो दृष्टिस्ततो मनः' इत्युक्तत्वात्खटकामुखे कटाक्षनिवेशनं युक्तम्। सहृदयंमन्यैश्च पुनरत्र मुरटाप्रभृतिपञ्चमुष्टीनां मध्ये केयं मुष्टिः कैशिकप्रमुखपञ्चन्यायेषु कश्चायं न्याय इत्यादिशरासनशास्त्रचर्चा क्रियते। वयं त्वेवं ब्रूमः–यत्र शृङ्गारैकरसः कविः पुरुषायितप्रवृत्तकामिनीवदनमेव त्वां पातु किं हरिहरस्कन्दादिभिर्दैवतैरिति देवताशंसनमप्यपार्थप्रायं प्रतिपादयति तत्र को नाम धनुर्वेदमनिर्वेदः पल्लवयितुमुत्सहत इति। प्रेङ्खन्नखांशुपाणिपृष्ठकटाक्षयोर्मञ्जरितपल्लवकर्णपूरभ्रमराभ्यां सहापमानोपमेयभावः। तेन कोमलारुणपाणिनिर्मलनखान्तरतरङ्गितचपलापाङ्गचमत्कारेण चन्द्रचूडचित्तानुमोदननिबन्धिनी देव्याः सौन्दर्यविभ्रमसंपत्तिः प्रतिपादिता। देवीनां हि लावण्यवर्णनाभिनिवेशस्तत्प्राणेश्वरप्रीतिप्रतिपादनाकाङ्क्षयैव कवीनाम्। इतराकाङ्क्षया तु कलङ्किन एव ते स्युः। उपनिबद्धं च भट्टबाणेनैवंविध एव सङ्ग्रामप्रस्तावे देव्यास्तत्तद्भङ्गिभिर्भगवता भर्गेण सह प्रीतिप्रतिपादनाय बहुधा नर्म। यथा–(चण्डी. श.)–"दृष्ट्वावासक्तदृष्टिः प्रथममथ तथा सम्मुखीनाभिमुख्ये, स्मेरा हासप्रगल्भे प्रियवचसि कृतश्रोत्रपेयाधिकोक्तिः। उद्युक्ता नर्मकर्मण्यवतु पशुपतेः पूर्ववत्पार्वती वः, कुर्वाणा सर्वमीषद्विनिहितचरणालक्तकेब क्षतारिः॥" अत एवाम्बिकाया इति पदं न्यस्तम्। कोऽभिप्रायः? अन्येषां सर्वेषामापि मातुर्भगवतश्च नीलकण्ठस्य प्रियायाः। अन्यथा कटाक्षादिवर्णनप्रस्तावे कोऽवकाशोम्बिकादीनां पदानामिति। संवलितोऽम्बिकाया इत्यत्र, लोभभ्रमद्भ्रमरेत्यादौ चानुप्रासो नाम शब्दालंकारः। यदाह भट्टरुद्रटः–'एकद्वित्र्यन्तरितं व्यञ्जनमविवक्षितस्वरं बहुशः। आवर्त्यते निरन्तरमथवा यदसावनुप्रासः॥' अत्र वीररसस्यानुगुणो विकटपदानां प्रकृष्टो न्यासोऽनुप्रासः। अलंकाराणां सामान्यलक्षणं चैतत्–'काव्यशोभाकरान्धर्मानलंकारान्प्रचक्षते।' ज्याकृष्टीत्यादौ मञ्जरीत्यादौ च यथाशक्तिसमासाद्गौडीया रीतिः। यदुक्तम्–'द्वित्रिपदा पाञ्चाली लाटीया पञ्च सप्त वा यावत्। शब्दाः समासवन्तो भवति यथाशक्ति गौडीया॥' ये द दण्डिनाचार्येण (काव्या° १/४९।)–'श्लेषः प्रसादः समता माधुर्यं सुकुमारता। अर्थव्यक्तिरुदारत्वमोजः–कान्तिसमाधयः॥

इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः॥ इति गुणाः प्रतिपादितास्ते चात्र श्रृङ्गाररसोचिता बाहुल्येन भविष्यन्ति। तस्माद्वैदर्भमार्गे सर्वथा समास एव न स्यादिति न वाच्यम्। ओजसः समासभूयस्त्वात्। तर्ह्योजोगुण एव गौडीयो मार्ग इति चेत्, गौडीये केवलं यथाशक्ति समास एव, वैदर्भे पुनः श्लेषप्रसादादयोऽपीति। ननु गुणा अपि काव्यशोभाहेतवस्तत्कथं 'काव्यशोभाकरान्' इत्याद्यलंकारलक्षणं समानजातीयव्यवच्छेदकं स्यात्। उच्यते–न हि गुणाः कटककेयूरादिवदाभरणत्वेनालंकुर्वन्ति। किं तु शौर्यौदार्यवत्प्रकर्षमादधते। उक्तं चानन्दवर्धनाचार्येण–'उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्। हारादिवदलंकारास्तेऽनुप्रासोपमादयः॥ तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः। अङ्गाश्रितास्त्वलंकारा मन्तव्याः कटकादिवत्॥' अर्थालंकारश्चात्र कल्पितोपमा। यदुक्तम्–'सा कल्पितोपमाख्या यैरुपमेयं विशेषणैर्युक्तम्। तादृग्भिस्तावद्भिः स्यादुपमानं तथा यत्र॥' यथा–'मुखमापूर्णकपोलं मृगमदलिखितार्द्रपत्रमेतत्ते। भाति लसत्सकलकलं सलाञ्छनं चन्द्रबिम्बमिव॥" सामान्यलक्षणं चैतत्– 'उभयोः सामनमेकं गुणादिसिद्धं यथा यदेकत्र। अर्थेऽन्यत्र तथा तत्साध्यत इति सोपमा ज्ञेया॥' श्रुतालंकारैरत्रोत्प्रेक्षा कैश्चिदुक्ता। सा च न भवति। सिद्धोपमानसद्भावाभावात्। यदुक्तं–'अतिसारूप्यादैक्यं विधाय सिद्धोपमानसद्भावम्। आरोप्यते च तस्मिन्नतद्गुणादीति सोत्प्रेक्षा॥' यथा–'चम्पकशिखराग्रमिदं कुसुमसमूहच्छलेन मदनशिखी। अयमुच्चैरारूढः पश्यति पथिकान्दिधक्षुरिव॥' यत्र संभावनमात्रेण 'लिम्पतीव तमोऽङ्गानि' (मृच्छ.१।३४) इत्यादिवदुपमानोपमेयभाव एव नास्ति तत्रातिशयोत्प्रेक्षाव्यवहारः। भट्टरुद्रटमते हि चतस्रोऽलंकाराणां जातयः–वास्तवमौपम्यमतिशयः श्लेष इति। अत्र यद्यपि दैत्यदलनोपक्रमे भ्रूमङ्गलोचनलौहित्यादिविकाराभावादुपमायाः सौन्दर्यविभ्रमसंपत्तिं धैर्यातिशालिनीं प्रतिपादयन्त्या 'उत्साहात्मा वीरः स च त्रिधा धर्मयुद्धदानेषु' इति वचनाद्युद्धवीररसे गौडीरीतिव्यञ्जितौजसि तत्परता। तथापि न रसस्य प्राधान्यम्, किं तु त्रयस्त्रिशत्कोटित्रिदशैरप्यशक्ये कर्मण्यध्यवसिता देव्याः प्रभावातिशयमात्रात्मनो वाक्यार्थस्य। तेनोपमाया रसवदलंकारत्वम्। तदुक्तम्–'प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्ग तु रसादयः। काव्ये तस्मिन्नलंकारो

रसादिरिति मे मतिः॥' भ्रमरसाधर्म्यारोपणेन कवेरसितः कटाक्षोऽभिप्रेतः। वर्णयन्ति सितमसितं सितासितं च कटाक्षम्। तत्र सितो यथा धनंजयस्य–'उज्जृम्भाननमुल्लसत्कुचतटं लोलभ्रमद्भ्रूलतं, स्वेदाम्भःस्नपिताङ्गयष्टि विगलद्व्रीडं सरोमाञ्चया। धन्यः कोऽपि युवा स यस्य वदने व्यापारिताः सांप्रतं, मुग्धे दुग्धमहाब्धिफेनपटलप्रख्याः कटाक्षच्छटाः॥' असितो यथा कस्यापि–'गतः कालो यत्र प्रणयिनि मयि प्रेमकुटिलः, कटाक्षः कालिन्दीलघुलहरिवृत्तिः प्रभवति। इदानीमस्माकं जरठकमठीपृष्ठकठिना मनोवृत्तिस्तत्किं व्यसनिनि मुधैव क्षपयसि॥' सितासितो यथा–'अदृश्यन्त पुरस्तेन खेलाः खञ्जनपङ्क्तयः। अस्मर्यन्त विनिःश्वस्य प्रियानयनविभ्रमाः॥' इति॥

क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण।
आलिङ्गन्योऽवधू तस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शांभवो वः शराग्निः॥२॥

स शांभवः शराग्निर्युष्माकं दुरितं दहतु हरतु। स कः? य आर्द्रापराधः। कामीव त्रिपुरयुवतिभिर्बाष्पझलज्झलायितलोचनेन्दीवराभिः करव्यतिषक्तः प्रेरितः। बलात्कारेण वस्त्राञ्चलमवलम्बमानस्ताडितः। निरस्तश्च शिरोरुहेषु लगन्। पादप्रणतस्तु पर्याकुलतया नावलोकितोऽपि। निर्भर्त्सितश्च परिष्वजमान इति। अत्र भगवतः पिनाकपाणेर्बाणानलभस्मीकृतोद्भट-दानवेन्द्रस्य प्रभावातिशयद्योतको वीररसोऽङ्गीकृतः। क्षिप्तो हस्तावलग्न इत्यादिना दनुजेन्द्रदयितानामीर्ष्यारूपो विप्रलम्भशृङ्गारः, साश्रुनेत्रोत्पला-भिरित्यनेन प्राणेश्वरशोकात्मा करुणरसश्चाङ्गम्। न चानयोरन्योन्यं विरोधः, अन्यपरत्वात्। यथाहि महर्षीणामाश्रमेष्वहिनकुलादीनाम्। यदुक्तम्–'विवक्षिते रसे लब्धप्रतिष्ठे तु विरोधिनाम्। वाच्यानामङ्गभावं च प्राप्तानामुक्तिरच्छला॥' विशेषतस्तु प्रस्तुतपरिपोषकारिणावेतौ। ईर्ष्यारूपस्तावदत्र विप्रलम्भशृङ्गारः करुणामेव पुष्णाति। यदुक्तम–"प्रकृतिरमणीयाः पदार्थाः शोचनीयतां प्राप्ताः प्रागवस्थाभाविभिः

संस्मर्यमाणैर्विलासैरधिकतरं शोकावेशमुपजनयन्ति। यथा–अयं स रशनोत्कर्षी पीनस्तनविमर्दनः। नाभ्यूरुजघनस्पर्शी नीवीविस्त्रंसनः करः॥" इति। इह हि यास्तत्तदुपायपरिचर्याचतुरेण कान्तेन कुपिताः प्रसादितास्ता एव दनुजराजराजीवलोचनाश्चिरमननुभूतान्यविषयतया विपद्व्यसनेऽपि मानिनीमानदर्शनम् दर्शयन्त्यो दारुणदहनेन परिभूयन्त इति प्रतीतेः करुणोऽपि प्रतिपक्षगतस्त्रिपुररिपोरभिनन्द्यवन्द्योदयस्य वीरं पुष्णाति। अत्रासूयाश्रुणी व्यभिचारिसात्त्विकौ भावौ प्रकर्षेण रसतां गतौ। यदुक्तम्–'निर्वेदोऽथ तथा ग्लानिः शङ्कासूयामदश्रमाः। आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः॥ व्रीडा चपलता हर्ष आवेगो जडता तथा। गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च। सुप्तं विबोधो हर्षश्चाप्यवहित्थमथोग्रता। मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च। त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः। त्रयस्त्रिंशदमी भावाः प्रयान्ति रससंस्थितम्॥ स्मम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः। वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः॥' अलंकारश्च क्षिप्तो हस्तावलग्न इत्याद्येकैकवाक्यप्रतिपादितशराग्निसापराधकामिवृत्तान्तेनार्थश्लेषेणानु-ग्राह्योपमा। अर्थश्लेषलक्षणम्–'एकार्थवाचकानामेव शब्दानां यत्रानेकोऽर्थः सोऽर्थश्लेषः' इति। तेन 'यत्रैकमनेकार्थैर्वाक्यं रचितं पदैरनेकस्मिन्। अर्थे कुरुते निश्चयमर्थश्लेषः स विज्ञेयः॥' इति भट्टरुद्रटेन यल्लक्षणं कृतं तच्छव्दश्लेषमेव प्राप्नोति। अनेकार्थानां हि शब्दानामन्वयव्यतिरेकाभ्यां तस्य प्रवृत्तिनिवृत्ती। यथा–'तवैष विद्रुमच्छायो मरुमार्ग इवाधरः। करोति कस्य नो बाले पिपासाकुलितं मनः॥' अत्र हि प्रवालशब्देन श्लेषो न भवति। अभग्नपदो यथा–'तव तन्वि! कुचावेतौ भूधराविव राजतः। अन्योन्यमण्ड-लाक्रान्तौ संधिहीनौ करार्थिनौ॥' अत्रापि परिणाहान्तरशब्दैः श्लेषो न भवति। अर्थश्लेषे तु 'क्षिप्तो हस्तावलग्नः' इत्यादिषु प्रेरितः करव्यति-षक्त इत्यादिभिः पदैः श्लेषो न निवर्तते। संकरश्चायम्। यदुक्तम्–

'मिश्रालंकाराणां तिलतण्डुलवच्च दुग्धजलवद्वा। व्यक्ताव्यक्तांशत्वा त्संकर उत्पद्यते द्वेधा॥' अत्रापि वाक्यार्थस्यैव प्राधान्यम्, संकीर्णस्य रसादेश्चाङ्गत्वम्। तेन रसवदलंकारस्थितिः पूर्ववदेव। यच्च प्राग्वीररसस्याङ्गत्वं

प्रतिपादितं तद्विप्रलम्भकरुणावेक एव। 'आर्द्र' शब्दोद्भिन्नकिसलयादौ प्रसिद्धः। अत्र तु स्वार्थे स्खलद्गतित्वादमूर्तस्यापराधस्य नूतनत्वं लक्षयति! तेन चातिदुःसहत्वं व्यङ्ग्यम्। अत एवार्द्रापराधः कामी वह्निसमानत्वेन प्रतिपादितः। संतापातिशयजनकत्वात्। लक्षणा चेयं वृत्तिः। यदुक्तं काव्यप्रकाशे (२/९)–'मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्। अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया॥' इति। इयमेव च विदग्धवक्रोक्तिरिति स्पृहणीया कवीनाम्। वाचकलाक्षणिकव्यञ्जकानां शब्दानामभिधालक्षणा व्यक्तिरिति तिस्रो वृत्तयः। अर्था अपि तावन्त एव वाच्यलक्ष्यव्यङ्ग्या इति। आददानोंऽशुकान्तमित्यत्र 'आङो दोऽनास्यविहरणे' (पा.१।३।२०) इत्यात्मनेपदम्। तेन व्यादानं मुखप्रसारणे वर्तत इति दोषो नाशङ्कनीयः। गृह्णन्केशेष्वित्यत्र क्रियायास्त्रिपुरयुवतय एव कर्मत्वेनावधार्याः, न तु केशः। यथा–'गृहीत इव केशेषु–' इति। आलिङ्गन्योऽवधूत इत्यत्र चरणनिपतितोऽपि दृष्टिमात्रेणापि न संभाव्यते स कथमालिङ्गितुमिच्छतीत्यर्थः। कस्यांचित्कृते कृत्वा (?) प्रतिपादितः कामातुरस्तस्यालिङ्गनमुचितमिति समाधानम्। अस्य कवेस्तावदन्यः कोऽपि प्रबन्धो न दृश्यते। तन्नूनमनयोः श्लोकयोः संकीर्णरसोपनिबन्धोऽनेन दर्शितः। अग्रे सर्वत्र श्रृङ्गाररसस्यैवोपनिबन्धनीयत्वात्। संकीर्णरसोपनिबन्धस्तु निकषो रसकवीनाम्। कि चामीषां श्लोकानां तावती रसोपकरणसामग्री यावती प्रबन्धेषु भवति। अत एवोक्तं भरतटीकाकारैः- 'अमरुककवेरेकः श्लोकः प्रबन्धशतायते' इति॥

आलोलामलकावलीं विलुलितां बिभ्रच्चलत्कुण्डलं
किंचिन्मृष्टविशेषकं तनुतरैः स्वेदाम्भसः शीकरैः।
तन्व्या यत्सुरतान्ततान्तनयनं वक्त्रं रतिव्यत्यये
तत्त्वां पातु चिराय किं हरिहरस्कन्दादिभिर्दैवतैः॥३॥

तत्कृशाङ्ग्याः पुरुषायितसंभोगमध्ये खेदालसलोचनं मुखं त्वामनेककालं त्रायताम्। किं वैकुण्ठशितिकण्ठषण्मुखप्रमुखैर्नाकिभिः, अपि तु न किमपि। नहि ते रसातिरेकोन्मत्तपुरुषायितसंरब्धविदग्धनितम्बिनी-

वदनचन्द्रविरहदहनदन्दह्यमानं रक्षितुं क्षमन्ते। एतेनानुरागविह्वला तरुणी तवाभिलाषोचितमानुगुण्येन संपादयत्वित्यर्थः। यदुक्तम्–"'पातु वो दयितामुखम्' इति सांमुख्ये।" किं कुर्वाणम्?। चञ्चलां चूर्णकुन्तलमालां विलुप्तरचनाविशेषां दधानम्। पुनश्च कोदृशम्। कम्पमानकर्णाभरणम्। भूयः कथंभूतम्?। स्तोकोत्पुंसिततिलकम्। कैः?। सूक्ष्मसूक्ष्मैः श्रमसात्त्विकसंकीर्णैर्जलबिन्दुभिः। अनुशयाक्षेपोऽलंकारः। 'मुखेन्दौ तव सत्यस्मिन्नितरेण किमिन्दुना।' परमत्र वाक्यार्थस्य न प्राधान्यम्, किंतु रसस्यैव। नापि रसवदलंकारव्यवहारः, अपि तु रसोऽलंकार्यः। अलंकारश्च यथार्थ एव 'नायकस्य संतताभ्यासात्परिश्रममुपलभ्य रागस्य चानुपशममनुमता च तेन तमवपात्य पुरुषायितेन साहायकं दद्यात्।' इति वात्स्यायनः। अत्र प्रगल्भा नायिका। 'यौवनान्धा स्मरोन्मत्ता प्रगल्भा दयिताङ्गके। विलीयमानेवानन्दाद् रतारम्भेऽप्यचेतना॥' परित्यक्तव्रीडा चेयम्। यदुक्तम्–'एवमन्येऽपि परित्यक्तव्रीडायन्त्रणा वैदग्ध्यप्रागल्भ्यप्रायाः प्रगल्भा व्यवहारा वेदितव्याः।' संभोगशृङ्गारो रसः। यदुक्तम्–'अनुकलौ निषेवेते यत्रान्योन्यं विलासिनौ। दर्शनस्पर्शनादीनि स संभोगो मुदान्वितः।' शृङ्गारस्य सामान्यलक्षणमेतत्–'रम्यदेशकलाकालवेषभोगादिसेवनैः। प्रमोदात्मा रतिः सैव यूनोरन्योन्यरक्तयोः॥ प्रकृष्यमाणः शृङ्गारो मधुराङ्गविचेष्टितैः। अयोगो विप्रयोगश्च संयोगश्चेति स त्रिधा॥' रसस्यैवाथ सामान्यलक्षणमेतत्–'विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः। आनीयमानः स्वाद्यत्वंस्थायिभावो रसः स्मृतः॥' स च व्यङ्ग्यव्यञ्जकभावेन भाव्यभावकभेदेन वा चर्व्यमाणात्मकोऽसंलक्ष्यक्रमध्वनिसंज्ञितः। यदुक्तं ध्वनिकृता–'यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ। व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥' अस्ति ध्वनिः। स चाविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति द्विविधः। 'अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम्। अविवक्षितवाच्यस्य ध्वनेर्वाच्यं द्विधा मतम्॥ असंलक्ष्यक्रमद्योत्यः क्रमेण द्योतितोऽपरः विवक्षिताभिधेयस्य ध्वनेरात्मा द्विधा मतः॥ रसभावतदाभासभावशान्त्यादिरक्रम्ः। ध्वनेरात्माङ्गिभावेन भासमानो व्यवस्थितः॥ [क्रमेण परिपाट्या यः स्वानुस्वानाभसंनिभः। शब्दार्थशक्तिमूलत्वाद् द्विधा सोऽपि व्यवस्थितः॥'

यदाह भरतः–'बहवोऽर्था विभाव्यन्ते वागर्थाभिनयाश्रयाः। अनेन यस्मात्तेनायं विभाव इति संस्मृतः॥ वागङ्गसत्त्वाभिनयैरस्मादर्थो विभाव्यते। वागङ्गोपाङ्गसंयुक्तः सोऽनुभाव इति स्मृतः।' विविधमाभिमुख्येन रसं चरन्तीति व्यभिचारिणः। विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणैः स्थायी रत्यादिको भावो जनितोऽनुभावैः कटाक्षभ्रूभुजाक्षेपादिभिः सह-कारिभिरुपचितो रसः। यदाह भरतः–' सर्वथा नास्त्येव हृदयहारिणः काव्यस्य स प्रकारो यत्र प्रतीयमानमर्थसंस्पर्शनसौभाग्यं तदिदं काव्यरहस्यं परम्' इति॥ ]

परपुरुषप्रथमानुरागिणीं कामपि नायिकां रहःसहचरी प्राह–

अलसवलितैः प्रेमार्द्रार्द्रैर्मुहुर्मुकुलीकृतैः
क्षणमभिमुखैर्लज्जालोलैर्निमेषपराङ्मुखैः।
हृदयनिहितं भावाकूतं वमद्भिरिवेक्षणैः
कथय सुकृती कोऽयं मुग्धे! त्वयाद्य विलोक्यते॥४॥

हे मुग्धे! कथय क एष पुण्यराशिर्भवत्या वीक्ष्यते। कद्रा?। अद्य। कोऽभिप्रायः?। अद्य प्राक्नोऽप्येवं त्वया नावलोकित इति। कैः? ईक्षणैः। भावभेदाद्बहुवचनम्। किं कुर्वद्भिरिव?। उद्गिरद्भिरिव। किं तत्?। हृदयनिहितं भावाकूतमभिलाषोचितं संकल्पविशेषम्। वयःसंघौ हि नायिकाश्चिरसंचितं लज्जासंवृतं बहुतरमभिलाषं हृदये धारयन्ति। यश्च येनाध्मातो भवति स तमुद्गिरतीति युक्तमेवः पुनः किंविशिष्टैः?। अलसवलितैरसौष्ठवतिरश्चीनैः। मन्थरतिर्यग्भूतैरिति भावः। यथा कश्चित्केनापि लोभेन स्थानमत्यक्तुकाम इतरेण कार्यवशाद्बलात्कारेण प्रेर्य उत्थाप्यते न च प्राञ्जलो गच्छति तथेक्षणान्यपि हि स्फारोत्फुल्लानि भूत्वा प्रियदर्शनरसपानोद्युक्तानि साध्वसेन प्रसह्य साचीक्रियन्ते। पुनः किंभूतैः?। प्रेमार्द्रार्द्रैः प्रीतिस्निग्धैः। यदाह भगवान्भरतः-स्थायिभावदृष्टीनामुपक्रमे–'व्याकोशा स्नेहमधुरा स्मितपूर्वाभिभाषिणी। अपाङ्गभ्रूकृता दृष्टिः स्निग्धेयं रतिभावजा॥' पुनः कीदृशैः?। मुहुर्मुकुलीकृतैर्दर्शनसुखविशेषानुभवेन वारंवारमर्धनिमी-लितैः यथा कश्चिदभिलषितं वस्तु चिरप्राप्यमास्वाद्य नितान्तसौहित्येन

मान्द्यमाप्रोति, न तु निमीलितैरेव। निमेषपराङ्मुखैरित्यत्रानुपपद्यमानत्वात्। पुनस्तर्षातिरेकेण क्षणमभिमुखैः। न तु चिरम्। यतस्त्रपातरलैः। कोऽभिप्रायः?। आभिमुख्ये प्रियस्यानुरागरूपचेष्टाविशेषात् (षं) किंचिदुपलभ्य लज्जालोलानि जातानीत्युभयानुरागः। नहि निरनुरागे पुंसि नायिकानां दृष्ट्यो लज्जामनुभवन्ति। पुनः किंभूतैः?। दर्शनरसान्तरायकातर्येण निमेषपराङ्मुखैः। अनुभवैकवेद्याश्चैवंविधा दृष्ट्यः। यथास्मत्पूर्वजरूपवर्णने नाचिराजस्य–'सत्रासा इव सालसा इव लसद्गर्वा इवार्द्रा इव, व्याजिह्मा इव लज्जिता इव परिभ्रान्ता इवार्ता इव। त्वद्रूपे निपतन्ति कुत्र न जगद्देवप्रभो सुभ्रुवां, वातावर्तननर्तितोत्पलदलद्रोणिद्रुहो दृष्ट्यः॥' त्वयेति पदं न युष्मदर्थमात्रम्। किं त्वर्थान्तरसंक्रमितवाच्यम्। क एवंविधः पुण्यराशिरस्ति यस्त्वया जगदेकस्पृहणीयसौन्दर्यसंपदानेकाभ्युपायेनाशक्यापहारचित्तत्वान्निर्विकारया सस्पृहमवलोक्यते। अत एव सुकृतीति। 'मुग्धे' इति पदस्य पुनरयमभिप्रायः–यदित्थं मुग्धा त्वं यदेवमभिमतं जनं स्वच्छन्दमवलोकयसि। एवं हि लोकैः सूक्ष्मेङ्गितज्ञैरुपलक्षिप्यसे। तस्मात्प्रच्छन्नमास्स्व अहमेव ते समीहितं संपादयिष्यामीति। अत्र कविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नोऽर्थशक्तिव्यङ्ग्यः। यदेनमेवमवलोक यसि तत्त्वमस्मिन्ननुरक्तेत्यनुमानालंकारः प्रथमानुरागदर्शनात्मकसंभोगशृङ्गारस्याङ्गम्। यदुक्तम्–'अर्थशक्तेरलंकारो यत्राप्यन्यः प्रकाशते। अनुमानोपमाव्यङ्ग्यः स प्रकारोऽपरोध्वनेः॥ ध्वन्यात्मभूते शृङ्गारे समीक्ष्य विनिवेशितः। रूपकादिरलंकारवर्गो याति यथार्थताम्॥' यथा–'लावण्यकान्तिपरिपूरितदिङ्मुखेऽस्मिन्, स्मेरेऽधुना तव मुखे तरलायताक्षि!। क्षोभं यदेति न मनागपि तेन मन्ये, सुव्यक्तमेव जडराशिरयं पयोधिः॥' अत्र मुखं चन्द्र एवेति रूपकम्। अनुमानस्योदाहरणं चैतत्–'वचनमुपचारगर्भं दूरादुद्गमनमासनं सकलम्। इदमद्य मयि यथा ते तथासि नूनं प्रिये कुपिता॥' परमेष वाच्योऽलंकारः। अत एवोक्तम्–'शरीरकरणं येषां वाच्यत्वेन व्यवस्थितम्। तेऽलंकाराः परां छायां यान्ति ध्वन्यङ्गतां गताः॥' नाट्यालंकारस्तु हावो नाम। हेवाकस्तु सशृङ्गारो भावोऽक्षिभ्रूविलासकृत्।' इयं स्वस्त्री न भवति। नाप्यनुरक्तः पुरुषो वक्ता। कोऽयं सुकृतीत्यनुपपद्यमानत्वात्। दूती चात्र निसृष्टार्था। यदुक्तम्–'निसृष्टार्था

परिमितार्था पत्रहारिणी स्वयंदूती भार्यादूती मूकदूती बालदूती चेति दूतीविशेषाः। नायकस्य नायिकायाश्च यथामनीषितमर्थमुपलभ्य स्वबुद्ध्या कार्यसंपादिनी निसृष्टार्था। सा प्रायेण संस्तुतभाषणयोर्नायक-नायिकयोरप्रयुक्ता। संस्तुतसंभाषणयोरपि कौतुकादनुरूपाविमौ युक्तौ परस्परस्येति। प्रथमानुरागलक्षणं चैतत्–'तत्संमुखी तं न वीक्षते। प्रेक्षिता व्रीडां दर्शयेत्। रुच्यमात्मनोऽङ्गमन्यापदेशेन प्रकाशयति। प्रमत्तं प्रच्छन्नं नायकमतिक्रान्तं च वीक्षते। पृष्टा च किंचित्सस्मितमव्यक्ताक्षरमनवसितार्थं मन्दमन्दमन्यतोमुखी कथयति। तत्समीपे चिरं स्थानमभिनन्दति। दूरे स्थिता पश्यतु मामिति मन्यमाना परिजनं समुखविकारमाभाषते। तं च देशं न मुञ्चति। यत्किंचिद् दृष्ट्वा विहसितं करोति। तत्र कथामवस्थानार्थमनु-बध्नाति। बालस्याङ्कगतस्य चुम्बनकंमालिङ्गनं च करोति। परिचारिकायास्तिलकं च रचयति। परिजनानवष्टभ्य तास्ताश्च लीला दर्शयति। तन्मित्रेषु विश्वसिति। वचनं तेषां बहु मन्यते करोति च। तत्परिचारकैः सह प्रीतिं संकथां द्यूतं चारभते। स्वकर्मसु चैतान्प्रभविष्णुरिव नियुङ्क्ते। तेषु च नायकसंकथामन्यस्य कथयत्स्ववहिता तां शृणोति धात्रेयिकया प्रोत्साहिता नायकस्योदवसितं प्रविशति। तामन्तरा कृत्वा तेन सह द्यूतं क्रीडामालापं चायोजयितुमिच्छति। अनलंकृता दर्शनपथं परिहरति। कर्णपत्रङ्गुलीयकं स्त्रजं वा तेन याचिता स धीरमिव गात्रादवतार्य सख्या हस्ते ददाति। तेन च दत्तं नित्यं धारयति। अन्यवरसंकथासु विषणा भवति। तद्विपक्षैश्च सह न संसृज्यत इति। "दृष्ट्वैतान्भावसंयुक्तानाकारानिङ्गितानि च। कन्यायाः संप्रयोगार्थं तांस्तान्योगान्विचिन्तयेत्॥" सा च मुग्धा नायिका।–'मुग्धा नववयःकामा रतौ वामा मृदुःक्रुधि।' यथा–'दृष्टेः सालसतां बिभर्ति न शिशुक्रीडासु बद्धादरा, श्रोत्रे प्रेषयति प्रवर्तितसखीसंभोगवार्तास्वपि। पुंसामङ्कमपेतशङ्कमधुना नारो-हति प्राग्यथा, बाला नूतनयौवनव्यतिकरावष्टभ्यमाना शनैः॥' नर्मस्फोटस्तु भावानां सूचितात्परसो लवैः' इत्यनेन नर्मस्फोटः। यथा मालतीमाधवेमकरन्देन माधवस्य मालत्यामनुरागो लक्षितः (माल॰ मा॰ १।२०)–'गमनमलसं शून्या दृष्टिः शरीरमसौष्ठवं, श्वसितमधिकं किं त्वेतत्स्यात्किमन्यदितोऽथवा। भ्रमति भुवने कंदर्पाज्ञा विकारि च यौवनं, ललितमधुरास्ते ते भावाः क्षिपन्ति च धीरताम्॥' प्रथमानुरागश्लोकोऽप्येष क्रमौचित्यात्प्रथमं लिखितः।।

अङ्गुल्यग्रनखेन बाष्पसलिलं विक्षिप्य विक्षिप्य किं
तूष्णीं रोदिषि कोपने! बहुतरं फूत्कृत्य रोदिष्यसि।
यस्यास्ते पिशुनोपदेशवचनैर्मानेऽतिभूमिं गते
निर्विण्णोऽनुनयं प्रति प्रियतमो मध्यस्थतामेष्यति।।5।।

कुपितनायिकाप्रसादने साम दानं भेदः प्रणतिरुपेक्षा रसान्तरं चेति षडुपायाः। तन्मध्येऽत्र भेद एव। इह हि नायकेनानुपविश्य शिक्षिता सखी वक्त्री वक्ष्यमाणप्रकारेण मानत्याजनाय नायिकां भीषयति। हे कोपने ईर्ष्यावति! अङ्गुल्यग्रनखेन बाष्पसलिलमपनीयापनीय लाघवलज्जातिशयेन मानाध्मातहृदया किं कण्ठार्धनिरुद्धगद्गदं रोदिषि। 'किं'-शब्दोऽल्पार्थः, न तु हेतुप्रेरणार्थः। मानरूपस्य हेतोः स्वयं ज्ञातत्वात्। आत्मीयचरितेन प्रचुरतरमुच्चैःशब्दं रोदिष्यसि। यस्यास्तव परगृहोपप्लावकानां पिशुनानां शिक्षाकर्णजापैर्माने मर्यादामतिक्रान्ते विफलप्रसादनोपायतया निर्वेदं यावत्प्राप्तो बहुमानं प्रति प्रियतम औदासीन्यं गमिष्यति। न त्वन्याङ्गनाम् यस्मात्त्वं पिशुनोपदेशेषु लग्नासि। तस्यापराधगन्धोऽपि नास्तीति भावः। विक्षिप्य विक्षिप्येति वीप्सया बाष्पनैरन्तर्यमुक्तम्। अत्र प्रियतमोऽथ च निर्विण्ण इति नायिकायाः सविशेषं भयोत्पादनकारणमुक्तम्, न तु निर्वेदो व्यभिचारिभावः। तस्य शृङ्गारे निषिद्धत्वात्। शृङ्गारश्चात्र विप्रलम्भ एव यदुक्तम्–'विप्रलम्भस्तु विश्लेषो रूढविस्त्रम्भयोर्द्विधा। मानप्रवासभेदेन मानो हि प्रणयेर्ष्ययोः।। तत्र प्रणयमानः स्यात्कोपवश्यतया द्वयोः। स्त्रीणमीर्ष्याकृतो मानः स्यादन्यासंगिनि प्रिये। श्रुते चानुमिते दृष्टे श्रुतिस्तत्र सखीमुखात्। उत्स्वप्नायितभोगाङ्कगौत्रस्खलनकल्पितः। त्रिधानुमानिको दृष्टः साक्षादिन्द्रियगोचरः।' न च निर्विण्णशब्देनैव निर्वेदव्यभिचारभावप्रतीतिः। रसादीनां वाच्यत्वाभावात्। यदुक्तम्तथा हि–वाच्यत्वं तस्य शब्दनिवेदितत्वेन वा स्याद्विभावादिप्रतिपादनमुखेन वा। पूर्वस्मिन्पक्षे स्वशब्दनिवेदितत्वाभावे रसादीनामप्रतीतत्वप्रसंगः। न च सर्वत्र तेषां स्वशब्दनिवेद्यत्वम्। यत्रापि तदस्ति तत्रापि विशिष्टविभावादिप्रतिपादनमुखेनैषां प्रतीतिः। स्वशब्देन सा केवलमनूद्यते, न तु तत्कृतैव सा। विषयान्तरे तस्या अदर्शनात्। न हि केवलशृङ्गारादिशब्दमात्रभाजि विभावादिप्रतिपादनरहिते काव्ये मनागपि

रसवत्त्वप्रतीतिः। केवलं स्वाभिधानमात्रादप्रतीतिः। तस्मादन्वयव्यतिरेकाभ्यामभिधेयसामर्थ्याक्षिप्तत्वमेव रसादीनाम्। न त्वभिधेयत्वंकथंचिदिति। एवं विधस्य रसध्वनेरुपनिबन्धक्षमा अमरुकप्राया एव महाकवयः। यदुक्तमभिनवगुप्तपादैः–"प्रतीयमानानुप्राणितकाव्यनिर्माणनिपुणप्रतिभाभाजनस्यैव महाकविव्यपदेशः। अन्यथा व्युत्पत्त्यभ्यासयोर्मध्ये प्रधानभूतया प्रतिभयापि कविरेवोच्यते। यदुक्तम्-"प्रज्ञा नवनवोल्लेखशालिनि प्रतिभा मता। तदनुप्राणनाजीवद्वर्णनानिपुणः कविः॥" अलंकारश्चात्राप्यनुमानम्। यदुक्तम्–'यत्र बलीयः कारणमालोक्याभूतमेव भूतमिति। भावीति वा तथान्यत्कथ्येत तदन्यदनुमानम्॥' यथा–'वहति यथा मलयमरुद्यथा च हरितीभवन्ति विपिनानि। प्रियसखि! तथैष न चिरादेष्यति तव वल्लभो नूनम्।' परमसौ वाच्यो व्यङ्ग्योऽप्यलंकारो रसस्याङ्गं भवतीत्याचार्याः। गुणस्तु प्रसाद एव। अत एवात्र यमकादयो निषिद्धाः। 'ध्वन्यात्मभूते शृङ्गारे यमकादिनिबन्धनम्। शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः॥'॥

दत्तोऽस्याः प्रणयस्त्वयैव भवतैवेयं चिरं लालिता
दैवादद्य किल त्वमेव कृतवानस्या नवं विप्रियम्।
मन्युर्दुःसह एव यात्युपशमं नो सान्त्ववादैः स्फुटं
हे निस्त्रिंश! विमुक्तकण्ठकरुणां तावत्सखी रोदितु॥६॥

अत्र नायकं प्रति मानिन्याः सखी वक्त्री। त्वयैवास्याः प्रणयो बहुमानो दत्तः। न पुनरियं मुग्धा बहुमानोत्पादनाय प्रत्यभियोक्तुं जानाति। अन्यञ्च भवतैवेयं चिरं लालिता। न पुनरनया लालनकारणं किंचिदारब्धम्। अत एव दैवात् न बुद्धिपूर्वकमद्य पुनस्त्वमस्या नवं व्यलीकं कृतवान्। यः खलु यस्याः स्वयं प्रणयं ददाति, स्वयं च प्रेमातिरेकेण लालयति, न तस्याः प्रतिकूलं बुद्धिपूर्वकमारभते। तत्रापि किलशब्दप्रयोगः। कोऽर्थः। विप्रियं विप्रियमिति श्रूयते न हि भवान्वस्तुतो विप्रियं करोतीति ज्ञातापराधेऽपि नायके नायिकाया धृत्युत्पादनम्। एवं सति मन्युरेव मानज. नितो दुःखविशेष एव दुःसहो न सामवादैरुपशमं याति। स्फुटमेतत्। तस्मात् हे निस्त्रिंश निरनुक्रोश! विमुक्त उचैः शब्दत्वात्कण्ठो यस्मिन्नसौ

विमुक्तकण्ठः स चासौ करुणो यथा भवत्येवं तावत्सखी रोदितु। विमुक्त-कण्ठविषये करुणा यत्रेति वा समासः। कोऽभिप्रायः?। एवं रोदितं यदि न प्राप्स्यति तदा मन्युनाध्मातमस्या हृदयं परिपाकोच्छ्वसितबीजविदीर्ण-दाडिमफलन्यायेन स्फुटिष्यति। तस्मादुच्चैःशब्दं रोदितुं देहि। पश्चाद्यथा जानासि तथा प्रसादय। अथ च यदि रुदित्वा जीवन्ती निर्वक्ष्यति तदा प्रसादनं घटत इत्यसूया। विषमोऽलंकारः। यदुक्तम्–'कार्यस्य कारणस्य च यत्र विरोधः परस्परं गुणयोः। तद्वत्क्रिययोरथवा संजायेतेति तद्विषमम्।' यथा–'आनन्दममन्दमिमं कुवलयदललोचने! ददासि त्वम्। विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे॥'

लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो
निराहाराः सख्यः सततरुदितोच्छूननयनाः।
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकै-
स्तवावस्था चेयं विसृज कठिने! मानमधुना॥७॥

हे कठिने! बहिः प्राणदयित आस्ते। किं कुर्वन्? शून्यतासूचकचिन्तासंतान-समुचितचेष्टाभावेनावनतो भूमिं लिखन्। अकृते प्रसादे द्वारं न मुञ्चतीत्यर्थः। तथा च वर्तन्तेऽनशनाः सख्यः। पुनः कीदृश्यः?। निरन्तरबाष्पेणोच्छूने लोकोक्त्या उच्छ्वसिते नयने यासां ताः सततरुदितोच्छूननयनाः। अत्र नायिकाया अमङ्गलचिन्तनमेव हेतुः। किं च, पञ्चरशुकैरपि हसितपठितं परित्यक्तम्। तथापि तवावस्था चेयम्। निरुद्धबाष्पारुणितनेत्राध्मायमान-निःश्वासकदर्थ्यमानाधरस्फुरणादिमन्युचेष्टाभिरधृष्या तथैव तिष्ठसीत्यर्थः। तस्मान्मानं परित्यज। कदा?। अधुनापि अपिशब्दोऽध्याहार्यः। एतावतीमपि दशां दुर्जनोपहसनीयां प्राप्ता मानं न मुञ्चसीति प्रतीयमानत्वात्। यस्याः कृते सख्योऽपि पञ्जरशुका अथाहारं हसितपठितं च परित्यजन्ति सा त्वं कथमिव प्रियाय न प्रतिभाषसे। प्रियोऽपि यस्यास्तव प्राणदयितस्त-दलमतिमानेनेति भावार्थः। अत एव कठिने इति संबोधनम्। अत्रार्थशक्त्युद्भवः सहोक्तिरलंकारः। नायिकायामाहारादिकं कुर्वत्यां सर्वेऽपि कुर्वन्ति, निवर्तमानायां च निवर्तन्त इति प्रतीतेः। सुप्तिङ्व्यङ्ग्यमात्रं चात्र

कर्मलकारभ्यामेवोद्भासितम्। अत्र न लिखतीति अपि तु लिखन्निति प्रसादनपर्यन्तम्। आस्ते इति, न त्वासित इति। भूमिमिति, न भूमाविति। नहि बुद्धिपूर्वकं किंचिल्लिखतीति तिङ्सुब्विभक्तिनां व्यङ्ग्यम्। हसितपठितमित्यत्र 'सर्वो हि द्वन्द्वो विभाषैकवद्भवति' इत्येकवचनम्। अत्र श्लोके त्वया तस्यापराधः सोढव्य इति क्वापि नोक्तम्। एतञ्च वक्तुः कौशलम्। अपराधस्मारणे हि मानिनी प्रतिनायिकां स्मरति। ततश्चाधिकं कुप्यति। न चैवंविधः प्रसाधननिर्बन्धः पूर्वमस्यां केवलेन दाक्षिण्येन अपि तु लोकोत्तरेण प्रेम्णा च। उक्तम्–'अक्खडइ पिआ हिअए अण्णं महिला-अणं रमंतस्स। दिट्ठे सरिसम्मि गुणेऽसरिसम्मि अईसंते॥"

नार्यो मुग्धशठा हरन्ति रमणं तिष्ठन्ति नो वारिता-
स्तत्किं ताम्यसि किं च रोदिषि मुधा तासां प्रियं मा कृथाः।
कान्तः केलिरुचिर्युवा सहृदयस्तादृक्पतिः कातरे!
किं नो बर्बरकर्कशैः प्रियशतैराक्रम्य विक्रीयते॥ ८॥

अङ्गनास्तावद्बहिर्मुग्धा अन्तः शठास्तव रमणमपहरन्ति। निषिद्धा अपि न निवर्तन्ते। तत्किमिति मुधा ताम्यसि कस्माच्च रोदिषि? उभयमपि व्यर्थमित्यर्थः। एवं हि तासामभीप्सितं भवति। अत एव तासां प्रियं मा कृथा इति। तर्हि किं समयोचितमित्याह–कान्त इत्यादि। हे कातरे! किं न विक्रीयते। लक्षणया अनन्याधीनः किं न क्रियते। अनन्याधीनं हि वस्तु विक्रेतुं याति। कोऽसौ? पतिः। किंविशिष्टः? कान्तः सुन्दरः। क्रीडारसिकः। तरुणः सहृदयस्तादृगनिर्वचनीयचेतनः। किं कृत्वा?। आक्रम्य, मुग्धशठाभ्य एव नायिकाभ्य आच्छिद्येत्यर्थः। कैः?। प्रियशतैः। किंविशिष्टैः? बर्बरककशैः सोल्लुण्ठनर्मनिरनुक्रोशैः। यदुक्तं गोवर्धनाचार्येण–'अन्यमुखे दुर्वादो यः प्रियवदने स एव परिहासः। इतरेन्धनजन्मा यो धूमः सोऽगुरुसमुद्भवो धूमः। अत एव केलिरुचिर्न चासंभावितो वश्यतां याति। यतस्तादृक्सहृदयः। 'दणिणोऽस्यां सहृदयः। अपमानितश्च नार्या विरज्यते। स पुनरुत्कृष्ट इति मया स्वयं मानमुत्सृज्य संगमयितुं कथं युज्यते। पतिरिति लाघवलज्जाभीरुत्वेन कातरे इति संबोधनम्। प्रशंसामनोज्ञानुनयप्रवर्तिका चेयमुक्तिः। यः कान्त इत्यादि गुणस्पृहणीयो वारिताभिरप्यङ्गनाभिरपह्रियते

स त्वयापराधोचितनिग्रहस्थानीयेन बर्बरकार्कश्येन विक्रेयकोटिमानीयते। तस्माद्युवतिषु धन्या त्वमिति प्रतीयमानत्वात्परिवृत्तिरलंकारः। बर्बरकर्कशं दत्वा पतिरपह्नियतामिति पर्यवसितत्वात्। यदुक्तम्– 'युगपद्दानादाने अन्योन्यं वस्तुनोः क्रियेते यत्। क्वचिदुपचर्येते वा प्रसिद्धितः सेति परिवृत्तिः॥' यथा– 'दत्त्वा दर्शनमेते मत्प्राणा वरतनु त्वया क्रीताः। किं त्वपहरसि मनो यद्ददासि रणरणकमेतदसत्॥'

कोपात्कोमललोलबाहुलतिकापाशेन बद्ध्वा दृढं
नीत्वा वासनिकेतनं दयितया सायं सखीनां पुरः।
भूयोऽप्येवमिति स्खलन्मृ दुगिरा सेसृच्य दुश्चेष्टितं
धन्यो हन्यत एव निह्नुतिपरः प्रेयान्रुदत्या हसन्॥ ९॥

हन्यते क्रीडाकमलादिना ताड्यते। कोऽसौ?। प्रेयान्। कीदृशः?। धन्य एव। कया?। दयितया। किं कुर्वत्या?। रुदत्या। किं कुर्वन्?। निह्नतिपरो हसन्। नाहं तत्र गत इत्यादिवचनेन मानोपशमं लक्षयित्वा स्मयमानः। किं कृत्वा हन्यते?! वासनिकेतनं नीत्वा। वासनिकेतनमेव किं कृत्वा नीतः?। कोपात्कोमललोलबाहुलतिकापाशेन बद्ध्वा दृढम्। बाहुलतिकाया लोल-त्वं सात्त्विको भावः। लतिकेत्यनेन दुःसहविरहक्लेशकार्श्यम्। अत एव बन्धनव्याजादौत्सुक्येन स्वयंग्रहाश्लेषः। क?। पुरः। कासाम्?। सखीनाम्। कदा?। सायम्। यदि मानमेव धृत्वाद्यतनीमपि रात्रिं प्रतिपालयिष्यामि तदा मा कदाचिदल- (य) मन्यत्र वत्स्यतीत्यौत्सुक्यप्रतिपादकः सायंशब्दप्रयोगः। अत एव लज्जापरित्यागद्योतकं सखीनां पुरः इत्युक्तम् पुनः किं कृत्वा। व्यलीकं संसूच्य। कथमिति। भूयोऽप्येवमिति। अर्थादिदानींतनोऽपराधः सोढ इति लभ्यते। भूयोऽप्येवं करिष्यसीति वाच्ये यदर्धोक्तं तत्र रोषसात्विकसंकीर्णसं भ्रमहेतुको वाक्स्तम्भः कारणम्। अत एव स्खलन्मृदुगिरा। अहो अन्यदेव किमपि दयितायाः प्रभुत्वं यत्समकालमेव निग्रहप्रसादौ। नहि बाहुलतिकाबन्धनं विहाय कश्चिदन्यः प्रसादोऽस्ति। अत्र कविर्वक्ता। ईर्ष्यामानात्मकविप्रलम्भारम्भः संभोगशृङ्गारपर्यवसितो रसः। अत्रालंकारो रसनिर्वाहणैकतानहृदयेन कविनात्यन्तं न निर्वाहं नीतः। यदाह ध्वनिकारः–अत्र हि बाहुलतापाशेनेति रूपकमाक्षिप्तमनिर्व्यूढं च परं रसपुष्ट्ये। अधीरा प्रगल्भा नायिका॥

कश्चिद्देशान्तरगमनोपक्रमं विहाय यथापूर्वमवस्थितः केनचिदगमन-कारणं पृष्ठः प्राह–

याताः किं न मिलन्ति सुन्दरि! पुनश्चिन्ता त्वया मत्कृते
नो कार्या नितरां कृशासि कथयत्येवं सबाष्पे मयि।
लज्जामन्थरतारकेण निपतत्पीताश्रुणा चक्षुषा
दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचित्:॥१०॥

भाविन्यावश्यके। निःसंदेह इति यावत्। मरणे उत्साहस्तया सूचितः। केन?। हसितेन। अर्थाद्वैलक्ष्यजन्मना। किं कृत्वा?। मां दृष्ट्वा। केन?। चक्षुषा, न तु चक्षुर्भ्याम्। एष निर्दयहृदयो मामेवंविधां विहाय जिगमिषतीत्यसूयाजन्यावधीरणव्यञ्जकम त्रैकवचनमिति वचनध्वनिः। किंविशिष्टेन? लज्जामन्थरतारकेण। अत्र मां त्यक्त्वा देशान्तरमसौ याति तदलमनुपादेयया मयेति लघुत्वसंभावनजन्या लज्जा। पुनः किंविशिष्टेन। निपतत्पीताश्रुणा निपतत्सत् पीतमपह्नुतमश्रु येन। प्राणैर्हि दुःखनिस्तारकामो न बाष्पमुत्सृजति। क्व सति। मयि सबाष्षे एवं कथयति सति। एवं किम्? हे सुन्दरि! याताः सन्तो भूयः किं न मिलन्ति। अपि तु मिलन्ति। तस्मात्त्वया मत्कृते चिन्ता न कार्या। यतो नितरां कृशासि। नह्येवंविधे कार्श्ये सचिन्तया वर्तितुं शक्यते। कार्श्यं तत्कालमापृच्छमानप्राणेश्वर-विरहसंभावनासंभवमेव। प्रिये सबाष्पे स्वयं निपतत्पीताश्रुणा चक्षषेत्यबाष्पा यदनुवृत्ति परिजहार तत्र 'त्यक्तश्चात्मा का च लोकानुवृत्तिः' इति न्यायेन प्राणनिरपेक्षतैव कारणम्। अथवा अमङ्गलसूचनमश्रु प्रस्थानकाले न प्रकाश्यत इति प्रीत्यतिशयः। यथा–'अद्यापि तन्मनसि संप्रति वर्तते मे रात्रौ मयि क्षुतवति क्षितिपालपुत्र्या। जीवेति मङ्गलवचः परिहृत्य कोपात्कर्णे कृतं कनकपत्रमनालपन्त्या॥' भविष्यत्प्रवासात्मको विप्रलम्भः। उत्तरालंकारः। यदुक्तम्–'उत्तरवचनश्रवणादुन्नयनं यत्र पूर्ववचनानाम्। क्रियते तदुत्तरं स्यात्प्रश्नादप्युत्तरं यत्र॥' उपायाक्षेपश्च। यदुक्तम्–'दुष्करं जीवितोपायमुपन्यस्योपरुध्यते। पत्युः प्रस्थानमित्याहूरुपायाक्षेपमीदृशम्॥'

तद्वक्त्राभिमुखं मुखं विनमितं दृष्टिः कृता पादयो-

स्तस्यालापकुतूहलाकुलतरे श्रोत्रे निरुद्धे मया।

पाणिभ्यां च तिरस्कृतः सपुलकः स्वेदोद्गमो गण्डयोः

सख्यः! किं करवाणि यान्ति शतधा यत्कञ्चुके संधयः॥११॥

हे सख्यः! किं करवाणि? अपि तु न किमपि। क्वविषये? यत्कञ्चुके संधयः शतधा यान्ति, दलन्तीत्यर्थः। यतो मानाभिव्यक्तये किं किं न मया कृतमित्याह–तस्य प्रियस्य वक्त्राभिमुखं सत्स्वमुखं विनमितं नम्रीकृतम्। दृष्टिः स्वपादयोर्न्यस्ता। अत्र 'तद्वक्त्राभिमुखं मुखं विनमितं, दृष्टिः कृता पादयोः' इति वाक्यद्वयेनापि दिदृक्षारसस्यैव निषेधो बोद्धव्यः; अभिमुखमुखतया तद्दर्शनाभिलाषिणी दृष्टिर्निवारितेत्यर्थः। न तु प्रथमवाक्ये विवक्षारसनिषेधः शङ्कनीयः। द्वितीयवाक्ये तद्दर्शनोत्सुका दृष्टिः कृता पादयोरिति तच्छब्दसहितपदस्यान्वेषणीयत्वात्। तृतीयवाक्ये विवक्षारससूचकचिह्नतिरस्काराञ्च। यद्वा मुखविनमनेनैव दृष्टेः पादगमने सिद्धे 'दृष्टिः कृता पादयोः' इति यदुक्तं तेन प्रेयानपाङ्गेनापि नावलोकित इत्यर्थः। पादयोरित्यत्र संबन्धपदाभावेन सखीषु वचनच्छलं व्यज्यते। तत्पादयोर्दृष्टिः कृतेत्यत्रापि प्रतीतिसंभवात्। न केवलमेतदेव कृतम्, तद्वचनश्रवणकौतुकचपले श्रोत्रे च कर्णकण्डूयनव्यपदेशेनाकुञ्चिते। अपरं च स्वविवक्षारससूचकः कपोलयोः सरोमाञ्चः स्वेदोद्गमो हस्ताभ्यामाच्छादितः। अत्रेदं प्रकर्षेण (?) प्रियविषये प्रीतिप्रकर्ष एव। मानाय नायिकया प्रयत्ने क्रियमाणेऽप्यवयवानां प्रियसंगमोत्सुकत्वात्। अत्राप्युत्तर एवालंकारः। यथा–'भण मानमन्यथा मे मौन भ्रुकुटिं विधातुमहमसहा। शन्कोमि तस्य पुरतः सखि न खलु पराङ्मुखी भवितुम॥' यत्राक्षेपश्च। यदुक्तम्–'यत्नाक्षेपः स यत्नस्य कृतस्यानिष्टवस्तुनि। विपरीतफलोत्पत्तेरानर्थक्योपदर्शनात्॥' यथा–'गच्छेति वक्तुमिच्छामि त्वत्प्रियं मत्प्रियैषिणी। निर्गच्छति मुखाद्वाणीं मा गा इति करोमि किम्॥'

प्रहरविरतौ मध्ये वाह्नस्ततोऽपि परेण या

किमुत सकले याते वाह्नि प्रिय! त्वमिहैष्यसि।

इति दिनशतप्राप्यं देशं प्रियस्य यियासतो
हरति गमनं बालालापैः सबाष्पगलज्जलैः॥१२॥

वासरशतप्राप्यं देशं प्रियस्य जिगमिषोः प्रस्थानं मुग्धा निषेधति। कैः। अश्रुगलज्जलैरालापैः। कथम्?। इत्यमुना प्रकारेण। हे प्रिय! प्रथमप्रहरावसाने त्वमिहागमिष्यसि। अथवा मध्याह्ने, उत स्वित्तस्मादपि परेण तृतीयप्रहरेणेत्यर्थः। अत्र 'विवक्षातः कारकाणि भवन्ति' इति करणे तृतीया। यथा–'समेन धावति', 'विषमेण धावति' इत्यादौ। अपिशब्दस्यायमभिप्रायः–हे निष्करुण! मध्याह्नादप्यनन्तरं बहिः स्थातुं न युज्यत इति। अत्र सप्तम्यन्तानां पदानामन्तरेऽस्य पदस्य तृतीयान्तत्वेनोपक्रमभङ्गो न दोष एव; अर्थस्यान्यथा प्रतीतेः। पददोष एवास्य रसकवेः क्वाप्यस्तु। यदुक्तमुपाध्यायेन–'पदविह्वलता क्वापि स्पृहणीया भवति रसकवीन्द्राणाम्। घनजघनस्तनमण्डलभारालसकामिनीनां च॥' अनेनापि प्रश्नेन यदा नायकोऽनभ्युपगमनसूचकं मौनमेव जग्राह, तदा नायिका पुनराह–अनन्तरमाहोस्वित्सर्वस्मिन्नेव दिनेऽतिक्रान्ते। अत्र मौग्ध्येन नर्मस्पर्शिन्यां विरहासहिष्णुतायां तात्पर्यम्। अत एव रात्रौ व्यतीतायामुदिते स्विदागमिष्यतीति प्रयोगो न कृतः विरहासहिष्णुतात्मकविप्रलम्भरसोत्कर्षहेतुर्जातिरलंकारः॥

धीरं वारिधरस्य वारि किरतः श्रुत्वा निशीथे ध्वनिं
दीर्घोच्छ्वासमुदश्रुणा विरहिणीं बालां चिरं ध्यायता।
अध्वन्येन विमुक्तकण्ठमखिलां रात्रिं तथा क्रन्दितं
ग्रामीणैः पुनरध्वगस्य वसतिर्ग्रामे निषिद्धा यथा॥१३॥

अर्धरात्रे निर्भरमम्भोधरस्य वर्षतः स्तनितमाकर्ण्य दीर्घोत्कटश्वासमुत्कटबाष्पाम्बुना विरहिणीं मुग्धां विरहातिवाहनोपायेष्वनभिज्ञतया शङ्कनीयां गद्गदलोलमनिशं तदेकतानेन स्मरता पथिकेन समस्तामपि रात्रिमसंकोचितकण्ठस्वरं तथा रुदितं तथा ग्रामनिवासिभिर्भूयः पान्थस्य वासो ग्रामे निवारित इति। यदि मार्गो वहति तदा प्रचलति। यदि च लोको जाग्रद्भवति तदा वाङ्मिश्रणेनापि

कियतीमपि विरहव्यथामतिवाहयति। निशीथे उभयस्थाप्यभावादप्रति-विधानस्तपस्वी पान्थः शब्दान्तराभावात्केवलं नीरदनिनादमेव दुःश्रवं श्रुत्वा मुक्तश्वासोऽनुद्यमद्योतकमश्रुपातं विधाय क्रन्दितुमेवारब्धवान्। मेघवृष्टिर्दृष्टिप्रतिबन्धको बाष्पयोगश्चेत्यपरं गमननिरोधे कारणद्वयम्। वारिधरस्य, न तु वारिमुचः। वारिमुच इत्यनेन हि पदेन क्रमात्सलिलक्षयोऽपि संभाव्यते, न तु वारिधरस्येत्यनेन। अतएव सान्द्रसलिलसंपदाध्माततया धीरं वारि किरत इति। बालां पूर्वाननुभूतविरहव्यथाम्। अखिलत्वं क्रन्दनविषयायाः पश्चिमाया एव रात्रेः, न तु सकलरात्र्यभिप्रायेण, अर्धरात्र एव मेघध्वनेः रुतत्वात्। ग्रामीणाः प्रायो नायिकानुरागविदग्धवक्रोक्तिविरहवेदनानर्मभङ्गिष्वनभिज्ञा भवन्ति; परं तैरप्यध्वगस्य वसतिर्ग्रामे निषिद्धा। 'ग्रामाद्यखञौ' (पा.४।२।६४)। 'आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्' (पा.७।१।१) इति स्वस्थाने ईनादेशः। प्रवासात्मको विप्रलम्भः। कविर्वक्ता। अत्र न तथालंकारः कश्चिदुद्भावनायामवतरति। अस्मिन्काव्ये तथाविधा अलंकाराः प्रायशो न दृश्यन्ते। प्राणात्मकेन रसेनैव चमत्कारः परां कोटिमधिरोहति। यदुक्तमुपाध्यायेन—'स्वभावरमणीयानां पदार्थानामलंक्रिया। प्रत्युताच्छादकत्वेन न प्रकर्षाय जायते'॥

कश्चित्तत्कालमागतो मानिनीं प्रत्याह<br>
कृतो दूरादेव स्मितमधुरमभ्युद्गमविधिः<br>
शिरस्याज्ञा न्यस्ता प्रतिवचनवत्यानतिमति।<br>
न दृष्टेः शैथिल्यं मिलन इति चेतो दहति मे<br>
निगूढान्तःकोपा कठिनहृदये! संवृतिरियम्॥१४॥

हे कठिनहृदये! इयं निगूढान्तःकोपा तवाकारगुप्तिर्मम चेतो दहति, कथं संवृतिः। इत्यमुना प्रकारेण। प्राय ईर्ष्यास्मितेनापि यन्माधुर्य तत्किमपि नायिकाया रामणीयकं द्योतयति। अभ्युद्गमविधिरित्यत्र विधिशब्दस्यायमभिप्रायः—षडर्घ्या भवन्ति। आचार्यो ऋत्विग्विवाह्यो राजा प्रियः स्नातक इति; श्रौताचारवतामागमनोचितमेतत्। न पुनः प्रणयोचितम्। शिरस्याज्ञा न्यस्ता, न तु हृदये। सापि पाषाणभारवदतिदुर्वहा। अतिदुर्वहं वस्तु मस्तके धार्यते। अतएवानतिमतीति शिरोविशेषणम्। मिलने दृष्टेर्न

शैथिल्यम्। मनसो मिलने तु शैथिल्यमेव अथ च दृष्टेः शैथिल्यं न। अमुना प्रकारेण त्वया दूरादेव स्मितमधुरं यथा भवत्येवमभ्युत्थानं कृतम्। इदं क्रियतामित्यादिकार्यनियोग आज्ञा। सापि प्रियवचनवती मे आनम्रशिरसि प्रतीष्टा। अन्यच्च तव दृष्टेर्मम दृष्टया सह मिलने शैथिल्यं नास्तीत्येतावत्संवृतिस्वरूपम्। दूरादेवाभ्युद्गमः कृतो न तु प्रत्यासत्तौ; शरीर-संपर्कसंभावनायामप्यसहनत्वात्। यः पूर्वं मम तथा वशीभूत आसीत्तस्यैव प्रियतमस्यान्याङ्गनासङ्गिनोऽप्यनुवृत्तिं करोमि प्राणांश्च धारयामीत्यात्मन्यसंभावना। अभ्युपगमोऽपि तस्या नास्ति, अपि तु साटोपत्वम्। तवौदासीन्यमात्रेऽपि मम चेतो दह्यते तत्कानामान्याङ्गनासङ्गसम्भावना? तस्मात्पिशुनविजृम्भितमेतत्। यच्च मम हृदये दह्यमानेऽपि तव हृदयस्य काठिन्यं तत्र निगूढान्तःकोपता हेतुः। अन्तर्निखातकर्कशपदार्थं हि कोमलमपि कठिनं भवति। मिलन इत्यत्र यद्यपि गुणप्रतिषेधो न प्राप्नोति तथापि रूढिरस्ति। अनुमानालंकारः। यथा–'वचनमुपचारगर्भ-' इत्यादि प्राग्दर्शितम्। औदार्यं प्रदर्श्य सदे ( ? ) त्यनेनौदार्यं नाट्यालंकारः। यथा–'अइदुक्किआए दिअहं सकलं काऊण गेहवावारं। गरुए वि मण्णुदुक्खे मरिमो पाअंतसुत्तस्स॥'

काचित्प्रणयकलहान्तरिता सहचरी प्रत्याह–

कथमपि सखि! क्रीडाकोपाद्व्रजेति मयोदिते
कठिनहृदयः शय्यां त्यक्त्वा बलाद्गत एव सः।
इति सरभसं ध्वस्तप्रेम्णि व्यपेतघृणे स्पृहां
पुनरपि हतव्रीडं चेतः करोति करोमि किम्॥१५॥

हे सखि! किं करोमि? अपि तु न किमपि। यतः पुनरपि मे निस्त्रपमन्तःकरणं तस्मिन्प्रियतमे स्पृहां करोति। किंविशिष्टे? यतो व्यपेतघृणे निःशङ्के। पुनरपि कीदृशे?। सरभसमपर्यालोचितमपास्त-प्रेम्णि। तस्मादिति कस्मात्?। यतः सकर्कशहृदयो बलात्कारेण गत एव। क्व सति?। कथमपि प्रणयरोषात् 'गच्छ' इति मयोक्ते सति। 'कथमपि' शब्दस्यायमभिप्रायः–क्रीडयापि कोपं न करोमि। क्रीडाकोपेऽपि मा कदाचिदसौ वैमनस्यं गच्छेत्। शय्यां त्यक्त्वा गतः, न तु माम्। उपनतेऽप्य-मङ्गले न कश्चिदात्मनः स्वयममङ्गलं शंसतीत्याशयः। बलाद्गतः सोऽपि

किं स्वभावेन गन्तुं शक्नोति?। अत एव सरभसं ध्वस्तप्रेम्णि। व्यपेतघृणे 'इयं मया विना न जीविष्यति' इति जानत्यप्युपेक्षितवति। किं करोमि? इति कर्तव्यतामोहेनोपायमपि न जानामीत्यर्थः। अत्रेदं विमृश्यते-ननु य एष क्रीडाकोपमात्रेण शय्योत्थाय गत एव स किं ग्राम्यः, उतान्यासक्तः? न तावदाद्यः; शृङ्गारोपनिबद्धस्याग्राम्यत्वात्। नापि द्वितीयः; सापराधस्य विटस्यापि वा नायिकायाः सुमहत्यपि कोपे प्रसादनैकपरत्वात्। न च सापराधे प्रेयसि क्रीडाकोपो भवति भामिनीनाम्, अपि तु वास्तव एव। तस्माद्यं क्रीडाकोपावमानितः सन्नुत्थाय कुड्यान्तरितो भूत्वा प्रियतमायास्तत्कालमदर्शनमात्रेण प्राणपरिहारं यावदध्यवसितायाः प्रेम-सर्वस्वनिधानमुद्राभङ्गकारिभिरमिमानवाक्यैः श्रवणेन्द्रियं चरितार्थयति। प्रणयमानात्मको विप्रलम्भः। 'कलहान्तरितामर्षाद्विधूतेऽनुशयार्तियुक्' इति कलहान्तरिता नायिका॥

दंपत्योर्निशि जल्पतोर्गृहशुकेनाकर्णितं यद्वच-
स्तत्प्रातर्गुरुसंनिधौ निगदतः श्रुत्वैव तारं वधूः।
कर्णालम्बितपद्मरागशकलं विन्यस्य चञ्च्वाः पुरा
व्रीडार्ता प्रकरोति दाडिमफलव्याजेन वाग्बन्धनम्॥१६॥

त्रपापर्याकुला वधूः श्रवणालम्बितशोणमणिशकलं विन्यस्य चञ्च्वाः पुरः प्रणिधाय दाडिमफलरूपेण च्छद्मना वाग्बन्धनं प्रयत्नेन करोति। किं कृत्वा?। श्रुत्वैव। किं तत्?। वचः। कस्य?। अर्थवशाद्वि-भक्तिविपरिणमेन शुकस्यैव। किं कुर्वतः? प्रभाते श्वशुरश्वश्रूप्रभृतीनां प्रत्यासत्तावुच्चैःस्वरं निगदतः। तत्किम्?। यद्रात्रौ स्त्रीपुंसयोः किंचिदे-कान्तोचितं वाच्यावाच्यं जल्पतोः संबन्धि तेनैव मन्दिरशुकेन श्रुतम्। दंपत्योर्मध्ये बधूरिति संबन्धः। तयोरेतावती लज्जा यन्निशि दंपत्योर्जल्पतोः दिवा पुनरौदासीन्येन दंपती इति न ज्ञायेते। न च परस्परं जल्पतोः। 'प्रातः श्रुत्वा' इत्यनेन सुरतालापैर्जामरितसकलरात्रिरपि प्रथमप्रबुद्धेयं नायिका। कुलाङ्गना हि चरमं शायिन्यः प्रथमं प्रबोधिन्यश्च भवन्तीति। एवंविधै-रालापैस्तु रजनिरज्ञातैव प्रयाति। यथोत्तरचरिते–'किमपि किमपि मन्दं मन्दमासक्तियोगादविचलितकपोलं जल्पतोरक्रमेण। अशिथिलपरिरम्भव्या-

पृतैकैकदोष्णोरविदितगतयामा रात्रिरेव व्यरंसीत्।' रुत्वैवेत्येवशब्दस्याव्ययानामनेकार्थत्वेनाविलम्बोऽर्थः। केचित् 'तस्यैव तारं वधूः' इति पठन्ति। तेन चान्वयः सुखावहो न भवति। यदुक्तम्–'वाक्यं यत्राभिमतं परस्परं सव्यपेक्षवृत्तीनाम्। समुदायः शब्दानामेकपराणामनाक्राङ्क्षः।। अन्यूनाधिकवाचकसक्रमपुष्टार्थशब्दचारुपदम्। क्षोदक्षममक्षुण्णं सुमतिर्वाक्यं प्रयुञ्जीत।।' उक्तं हि–'अभिहितान्वयवादिनां मते सामान्यरूपाणां पदार्थानामाकाङ्क्षापयोग्यतासंनिधिवशात्परस्परसंसर्गे पदार्थव्यतिरिक्तो वाक्यार्थः प्रकाशते' इति। अखण्डवाक्यवादिनां मते तु वाक्योपदेशः कर्तुं न युज्यते। व्यङ्ग्यव्यञ्जकभावाभावात्। यदुक्तम्–सोऽयमिषोरिव दीर्घदीर्घो व्यापारः शब्दस्य' इति। शब्दश्रुतेरनन्तरं यावानर्थो गम्यते तावता शब्दस्याभिधैव व्यापार इति चेत्, प्रष्टव्या यूयम् 'ब्राह्मण! पुत्रस्ते जातः, कन्या ते गर्भिणीः इत्यादौ हर्षशोकादीनामपि ( न ) वाच्यत्वम्। कस्माच्च लक्षणा?। लक्षणीयेऽप्यर्थे दीर्घदीर्घामिधाव्यापारेणैव प्रतीतिसिद्धेः। जाया च पतिंश्च दंपती। उत्तरपदाधिकारे 'जाया' शब्दस्य जंभावो दंभावश्च निपात्यते। दुर्गसिहाचायस्तु 'जंदंशब्दौ जायासमानार्थौ' इति मन्यते। शुकादयस्तु शृङ्गारिणां भवनेषु भवन्त्येव। यदुक्तम्–'वृक्षायुर्वेदयोगमेषकुक्कुटलावकयुद्धविधिशुकसारिकाप्रलापनम्' इत्यादि। दाडिमबीजमेव पद्मरागसदृशं भवति, न तु फलमित्याशङ्क्य यदि भवति तदा 'दाडिममृषाबीजेन' इति युक्तः पाठः। 'वाग्बन्धनम्' इत्यत्र कारणे कार्योपचारः, तेन मुखबन्धनमित्यर्थः। अन्योऽपि यः परमर्मोद्धाटनं करोति तस्य बन्धनं विधीयत इत्युक्तिलेशः। कविर्वक्ता। लज्जया व्यभिचारिभावेन पुष्टः संभोगशृङ्गारः। पद्मरागशकले दाडिमबीजभ्रान्तिरिति भ्रान्तिमानलंकारः। यदुक्तम्–'वस्तुविशेषं पश्यन्नवगच्छेदन्यमेव तत्सदृशम्। निःसंदेहं यस्मिन्प्रतिपत्ता भ्रान्तिमान्स इति'।। यथा–'पालयति त्वयि वसुधां विविधाध्वरधूमशालिनीः ककुभः। पश्यन्तो दूयन्ते घनसमयाशङ्किनो हंसाः।।'

**काचिन्मानिनी मन्यूपतापेन नायकं प्रति सोल्लुण्ठमभिधत्ते–**

**अज्ञानेन पराङ्मुखीं परिभवादाश्लिष्य मां दुःखितां**
**किं लब्धं शठ! दुर्नयेन नयता सौभाग्यमेतां दशाम्।**
**पश्यैतद्दयिताकुचव्यतिकरोन्मृष्टाङ्गरागारुणं**
**वक्षस्ते मलतैलपङ्कशबलैर्वेणीपदैरङ्कितम्॥१७॥**

हे कितव! त्वया किमुपार्जितम्? अपि तु न किमपि। किं कुर्वता?। मदालिङ्गनरूपेरग दुर्नयेनात्मनः सौभाग्यमेतामयोग्यामवस्थां प्रापयता। किं कृत्वा?। अन्याङ्गनासंगमलक्षणत्परिभवाद्दुःखितामनभिमुखीमाश्लिष्य। केन?। अज्ञानेन। कोऽर्थः?। यस्यां त्वमनुरक्तस्तद्भ्रमेण। कीदृशी सौभाग्यदुरवस्थेत्याह–पश्यैतदित्यादि। वर्तते। किं तत्?। तव वक्षः। कीदृशम्?। मलतैलपङ्कशबलैर्वेणीपदैरङ्कितं लाञ्छितम्। किंविशिष्टं पूर्वमासीत्?। दयिताकुचव्यतिकरोन्मृष्टाङ्गरागारुणम्। वल्लभास्तनयोर्व्यतिकरेण संबन्धेन प्रोञ्छितो योऽङ्गरागस्तेनारुणम्। अत्र दयिताया आज्ञाभङ्गो दुर्नयशब्दार्थः। तेन च तया त्वं निग्राह्योऽसीति व्यङ्ग्यम्। पश्येति क्रियाया वाक्यार्थ एव कर्म, न तु वक्षः। नहि वक्षरते पश्येत्युक्तिर्भवति, अपि तु वक्षस्त्वमिति। इयं च नायिका ऋतुस्नानोन्मुखी। अन्यथा तैलपङ्कादिप्रयोगः शृङ्गारोपनिबन्धे तत्रभवतां छान्दसानामेव सुकरः। तस्मिन्नेवावसरे नायकेन नूनमन्याङ्गनासङ्गः कृतः। ईर्ष्यामानात्मको विप्रलम्भः। आलिङ्गनेन स्पर्शनात्मकः संभोगोऽपि किं न स्यादिति चेत्–न; परस्परानुकूल्याभावात्। न चैवं प्रतीतिरपि नास्तीति वाच्यम्। पराङ्मुखत्वेऽपि नान्योऽयमिति प्रतीतेः यथोत्तरचरिते सीतायां वनं प्रेषितायां शम्बूकं हत्वा प्रतिनिवर्तमानो यानि दयितया सह पूर्वं निषेवितानि गोदावरीपरिसरस्थानानि तानि दृष्ट्वा मूर्च्छितो भागीरथीप्रभावाददृश्यसीताकरारविन्दस्पर्शमासाद्य साह्लादोच्छ्वासो रामः–हन्त भोः! किमेतत्। आश्च्योतनं नु हरिचन्दनपल्लवानां निष्पीडितेन्दुकरकन्दलजो नु सेकः। आतप्तजीविततरोः परितर्पणे मे संजीवनौषधिरसो नु हृदि प्रसिक्तः॥ स्पर्शः पुरा परिचितो नियतं स एष संजीवनश्च मनसः परिमोहनश्च। संतापजं सपदि यः प्रतिहत्य मोहमानन्दनेन जडतां पुनरातनोति॥'

उक्तं च–'अभ्यासादभिमानाच्च तथा संप्रत्ययादपि। विषयेभ्यश्च तत्त्वज्ञा विदुः प्रीतिं चतुर्विधाम्॥ प्रीतिः साभ्यासिकी ज्ञेया मृगयादिषु कर्मसु। अनभ्यस्तेष्वपि पुरा कर्मस्वविषयात्मिका॥ संकल्पाज्जायते प्रीतिर्या सा स्यादाभिमानिकी। नान्योऽयमिति यत्र स्यात्प्रतीतिः प्रीतिकारणम्॥ तत्त्वज्ञैः कथ्यते सापि प्रीतिः संप्रत्ययात्मिका। प्रत्यक्षा लोकतः सिद्धा स्यात्प्रीतिर्विषयात्मिका। प्रधानफलभूता सा यदर्थाश्चेतरा अपि॥'

एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद्दूरत-
स्ताम्बूलाहरणच्छलेन रभसाश्लेषोऽपि संविघ्नितः।
आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्यान्तिके
कान्तं प्रत्युषचारतश्चतुरया कोषः कृतार्थीकृतः॥१८॥

गृहागतं प्रियं प्रति विदग्धयानुवृत्तिरूपादुपचारादेव कोपश्चरितार्थतां नीतः। यतो दूरादेवाभ्युत्थानादेकस्मिन्पीठे उपवेशनं त्यक्तम्। ताम्बूलस्य वीटिकाया आहरणं तद्व्याजेन रभसालिङ्गनमपि सम्यग्विन्धितम्। सखीप्रभृतिपरिजनं सविधे नियुञ्जान वाङ्मिश्रणमपि न कृतम्। मीलितमलंकारः। यदुक्तम्–'तन्मीलितमिति यस्मिन्समानचिह्नेन कोपहर्षादि। अपरेण तिरस्क्रियते नित्येनागन्तुना वापि॥' यथा–'मदिरामदभरपाटल-कपोलतललोचनेषु वदनेषु। कोपो मनस्विनीनां न लक्ष्यते कामिभिः प्रभवन्॥' सावहित्थादरा नायिका प्रगल्भा।

दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरा-
देकस्या नयने निमील्य विहितक्रीडानुबन्धच्छलः।
ईषद्वक्रितकंधरः सपुलकः प्रेमोल्लसन्मानसा–
मन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति॥१९॥

एकासनोपविष्टे द्वे प्रियतमे दृष्ट्वा पृष्ठदेशं सप्रयत्नमागत्यैकस्या लोचने क्रीडानुबन्धव्याजेन मुद्रयित्वा दक्षिणो नायक इतरां चुम्बति। कथंभूतः सन्?। यथा द्वितीया न जानातीति मनाङ्नमितग्रीवः। पुनः कीदृशः?। सरोमाञ्चः। तां किंविशिष्टाम्?। प्रत्युल्लसच्चेतसम्?। पुनः कीदृशीम्?। मत्कारणेनेयं वञ्चितेत्यन्तर्निभृतहासलसद्गण्डमण्डलाम्। यस्या नेत्रे मुद्रिते

सा ज्येष्ठा। तस्यामपि नायकस्य प्रीतिरस्त्येव। यतः–'दक्षिणोऽस्यां सहृदयः' इति वचनात्पूर्वस्यामपि नायिकायां हृदयेन सह व्यवहरति। तस्माद्विहित-क्रीडानुबन्धच्छल इति योऽयं छलशब्दः स चुम्बितनायिकापेक्षयैव नायके न पुनर्वास्तवेनैव क्रीडानुबन्धेन प्रथमा। प्रथममेव संभाविता, द्वितीयस्यां च नेत्रमुद्रणाच्चुम्बनात्मकस्य संभावनाप्रकारस्य वैशिष्ट्यात्सपुलकत्वाञ्च विशिष्टा प्रीतिः। नूतननायिकायां च विशिष्टप्रीतिप्रतिपादनादेव पूर्वस्यां दाक्षिण्यमात्रादुपचार एवेत्येतेन; द्वयोरपि नायिकयोः प्रियतमे इत्युक्तत्वात्। विशेषोऽलंकारः। यदुक्तम्–'यत्रान्यत्कुर्वाणो युगपत्कर्मान्तरं च कुर्वीत। कर्तुमशक्यं कर्ता विज्ञेयोऽसौ विशेषोऽन्यः॥' इति।

चरणपतनप्रत्याख्यानप्रसादपराङ्मुखे
निभृतकितवाचारेत्युक्ते रुषा परुषीकृते।
व्रजति रमणे निःश्वस्योच्चैः स्तनार्पितहस्तया
नयनसलिलच्छन्ना दृष्टिः सखीषु निपातिता॥२०॥

कयाचित्कलहान्तरितया, सखीषु दृष्टिर्न्यस्ता। कीदृशी?। नयन-सलिलच्छन्ना। किंविशिष्टया?। उच्चैर्निःश्वस्य स्तनविनिहितहस्तया। क्व सति?। दयिते गच्छति सति। कुतो हेतोर्गच्छतीत्याह–चरणपतनस्य यन्निराकरणं तेनालब्धप्रसादे। पुनः कीदृशे?। निगूढशठचरितेत्यभिहिते। पुनरपि किंविशिष्टे? क्रुधा कर्कशतां यावन्नीते। 'अपमानितश्च नार्या विरज्यते यः स उत्कृष्टः' इति वचनादन्यत्र गच्छतो नायकस्य दक्षिणत्वम्। 'स्तनार्पितहस्तया' इति हृदयसंतापसूचकश्चेष्टाविशेषः। 'नयनसलिलच्छन्ना' इति सखीष्वेव प्रतिविधानसूचिका दीना दृष्टिः। यदुक्तम्–'अर्धस्रस्तोत्तरपुटा छन्नतारा जलाविला। मन्दसंचारिणी दृष्टिर्दीनेति परिकीर्त्यते॥'

काञ्च्या गाढतरावनद्धवसनप्रान्ता किमर्थं पुन-
र्मुग्धाक्षी स्वपितीति तत्परिजनं स्वैरं प्रिये पृच्छति।
मातः स्वप्तुमपीह वारयति मामित्याहितक्रोधया
पर्यस्य स्वपनच्छलेन शयने दत्तोऽवकाशस्तया॥२१॥

तया नायिकया शयने शय्यायामवकाशो दत्तः। अर्थात्प्रियस्य। किं कृत्वा?। परिवृत्य। केन?। स्वपनच्छलेन। आहितक्रोधयेव आहितः क्रोधो यथा। कथमिति?। हे मातः! निद्रातुमप्यत्र स्थाने निषेधति। क्व सति?। प्रिये पर्यनुयुञ्जाने सति। कम्?। प्रियायाः परिजनम्। कथम्?। स्वैरम्। 'मन्दस्वच्छन्दयोः स्वैरम्' इति वचनान्मन्थरमित्यर्थः। द्विकर्मकत्वेन पुनरिति पृच्छति सति। इतीति किम्?। किं पुनर्विह्वलाक्षी कटिसूत्रेण निबिडनियमितसिचयान्ता निद्रायते। अत्र गाढतरनितम्ब-वस्त्राञ्चलवहनाभ्यसूयागर्भो रम्भास्तम्भाभिरामोरुकाण्डस्पर्शलौल्यपर्यवसायी भणितेरुल्लेखः। इयं च साङ्गभङ्गैरलसचेष्टाविशेषैर्लम्बितपक्ष्मलोचनाञ्च-ला मदनमदविक्लवतामनुभवन्त्यासीत्; न पुनर्वास्तवीं निद्राम्। यदि वा मृषा सुप्तिरियम्। यदुक्तम्–'सापि भावजिज्ञासार्थिनी नायकस्यागमनकाले मृषा सुप्ता स्यात्।' अत एव मन्दमपि प्रियस्य प्रश्नवचनमश्रौषीत्। मातः स्वप्तुमपीति 'मातः' शब्दः स्त्रीणामुक्तिमात्रे। सूक्ष्मोऽलंकारः। यदुक्तम्–'इङ्गिताकारलक्ष्योऽर्थः सौक्ष्म्यात्सूक्ष्म इति स्मृतः' यथा–'कदा नौ संगमो भावीत्याकीर्णे वक्तुमक्षमम्। अवेत्य कान्तमबला लीलापद्मं न्यमीलयत्॥' का या गाढतरेत्यादि संभोगनर्म। यथा–'सालोए विवअ सूरे घरिणी घरसामिअस्स घेत्तूण। णेच्छंतस्स वि पाए धुवइ हसंती हसं-तस्स॥' एते च नर्मभेदाः।? 'वैदग्ध्यक्रीडितं नर्म प्रियोपच्छन्दनात्मकम्। हासेनैव सशृङ्गारभयेन विहितं त्रिधा॥ आत्मोपक्षेपसंभोगमानैः शृङ्गार्यपि त्रिधा। शुद्धमङ्गं भयं द्वेधा त्रेधा वाग्वेषचेष्टितैः॥ सर्वं सहासमित्येवं नर्माष्टादशधोदितम्।' मातः स्वप्तुमपीत्यादिना आत्मोपक्षेपनर्म। यथा–'मध्याह्नं गमय त्यज श्रमजलं स्थित्वा पयः पीयतां, मा शून्येति विमुञ्च पान्थ! विवशः शीतः प्रपामण्डपः। तामेव स्मर घस्मरस्मरशरत्रस्तां निजप्रेयसीं, त्वच्चित्तं तु न रञ्जयन्ति पथिक प्रायः प्रपापालिकाः॥'

एकस्मिञ्शयने विपक्षरमणीनामग्रहे मुग्धया
सद्यः कोपपराङ्मुखं ग्लपितया चाटूनि कुर्वन्नपि
आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणा-
न्मा भून्म्लान इवेत्यमन्दवलितग्रीवं पुनर्वीक्षितः॥२२॥

कयाचिन्मुग्धया प्रियतमस्तत्कालमेव पराङ्मुखं यथा भवत्येवमवज्ञातः। किं कुर्वन्नपि?। चाटूनि कुर्वन्नपि लालनवाक्यानि ब्रुवाणोऽपि। तथाभूतोऽपि कस्मादवधीरितः?। आवेगात्। तस्य लक्षणम्–'आवेगः संभ्रमोऽस्मिन्नभिसरजनिते शस्त्रनागाभियोगे, त्रासात्पांसूपदिग्धस्त्ववरितपद-गतिर्वर्षजे पिण्डिताङ्गः। उत्पातात्स्त्रस्तताङ्गेष्वहितहितकृते शोकहर्षानुभावा, वह्नेर्धूमाकुलाक्षः करिजमनुभयस्तम्भकम्पापसाराः॥' अत्र सपत्नीनामग्रहण-मेवाहितम्; तत्कृत आवेगः। किंविशिष्टया?। ग्लपितया। क्व सति?। एकस्यां शय्यायां सपत्नीनामोच्चारणे सति एकस्मिन् शयने प्रस्तुतायां रतिप्रवृत्तौ विपक्षस्त्रोनामग्रह इत्येव न, अपि तु विपक्षरमणीनामग्रहे भूताविष्टस्य ग्रह इव ग्रहे। अत एव नायिकाया आवेगः। मुग्धाश्च स्तोकेऽप्युपाये कोपं परिहरन्तीति। न केवलमवधीरितः। अवधीरण-हेतोस्तूष्णीं स्थितः सन्मा भून्म्लान इवेति द्रुतमेव वेगविवर्तितकंधरं यथा भवत्येवं पुनरवलोकितः। अत्रौत्सुक्यभावस्योदयः। यदुक्तम्–'भावस्य शान्तिरुदयः संधिः शबलता तथा।' उपायश्चात्र चाटूनि कुर्वन्नपीत्यनेन साम। यदुक्तम्–'नरः कथासु कुशलो वाचालश्चाटुकारकः। असंस्तुतोऽपि नारीणां चित्तमाश्वेव विन्दति।' यथास्मत्पूर्वजस्य वाक्पतिराजापरनाम्नो मुञ्जदेवस्य–'दासे कृतागसि भवत्युचितः प्रभूणां, पादप्रहार इति सुन्दरि नास्मि दूये। उद्यत्कठोरपुलकाङ्कुरकण्टकाग्रैर्यत्खिद्यते तव पदं ननु सा व्यथा मे॥' तृष्णीमित्यनेनोपेक्षामात्रं च। म्लान इवेत्यत्रेवकारेण म्लानसदृशोऽपि मा भूदिति प्रीत्यतिशयः। ईर्ष्यामानात्मकविप्रलम्भपूर्वको दर्शनात्मा संभोगशृङ्गारः। 'गूढविप्रियकृच्छठः' इत्यनेन शठो नायकः। यथा–'शठान्यस्याः काञ्चीमणिरणितमाकर्ण्य सहसा, यदाश्लिष्यन्नेव प्रशिथिलभुजग्रन्थिरभवः। तदेतत्क्काचक्षे घृतमधुमयत्वद्बहुवचो, विषेणा-घूर्णन्ती किमपि न सखी मे गणयति॥' मृदुकोपा मुग्धा नायिका॥

एकस्मिञ्शयने पराङ्मुखतया वीतोत्तरं ताम्यतो-
रन्योन्यं हृदयस्थितेऽप्यनुनये संरक्षतोर्गौरवम्।
दंपत्योः शनकैरपाङ्गवलनान्मिश्रीभवच्चक्षुषो-
र्भग्नो मानकलिः सहासरभसं व्यावृत्तकण्ठग्रहः॥२३॥

दंपत्योः प्रणयमानकलहो भग्नः। किंविशिष्टः?। सहासरभसं यथा भवत्येवं व्याघुटितः कण्ठाश्लेषो यत्र स तथा। अभग्ने मानकलहे कण्ठग्रहः किल निवृत्त आसीदिति हेतोर्व्यावृत्त इति भङ्गविशिष्टस्यैव मानकलेरिदं विशेषणम्। केवले मानकलहे कण्ठग्रहस्यानुपपन्नत्वात्। केन क्रमेण भग्न इत्याह–एकस्मिन्नित्यादि। 'एकस्मिञ्शयने त्वया किमित्येवं कृतम्?' इत्यादिकलहप्रश्नानामपगतान्युत्तराणि यत्र तद्वीतोत्तरं यथा भवत्येवं ताम्यतोः। उत्तरव्यय एव कथं जात इत्याह–पराङ्मुखतया। पुनः कथंभूतयोः?। परस्परं चित्तस्थितेऽपि प्रसादनप्रकारे गौरवं संरक्षतोः। स्वं स्वं लाघवमाशङ्कमानयोरित्यर्थः अथ च मानभङ्गहेतुगर्भं विशेषणमाह–पुनः कीदृशयोः?। स्तोकस्तोकं लोचनाञ्चलविवर्तनेन संघटमानदृष्ट्योरिति। प्रणयमानात्मकविप्रलम्भपूर्वकः स्पर्शनात्मा संभोगः। 'एकत्रासनसंस्थितिः-' इत्यारभ्यामुं श्लोकं यावत्षट्श्लोकेषु कविर्वक्ता॥

'कस्मात्त्वमद्य विमना इव लक्ष्यसे?' इत्यादि केनचित्पृष्टः कश्चिन्नायकः कान्ताप्रणयमानचेष्टामाचष्टे–

पश्यामो मयि किं प्रपद्यत इति स्थैर्यं मयालम्बितं
किं मा नालपतीत्ययं खलु शठः कोपस्तयाप्याश्रितः।
इत्यन्योन्यविलक्षदृष्टिचतुरे तस्मिन्नवस्थान्तरे
सव्याजं हसितं मया धृतिहरो बाष्पस्तु मुक्तस्तया॥२४॥

पश्यामस्तावदियं मयि स्वयं कीदृशीमालपनादिप्रतिपत्तिमुपक्रमत इत्यपेक्षया मया निर्व्यापारेण स्थितम्। एष निश्चयेन कितवः कस्मान्मां न भाषत इति मनसि विभाव्य तया कोपः स्वीकृतः। इत्यमुना प्रकारेणान्योन्यस्य या विलक्षा दृष्टिस्तत्र चतुरं यत्कोपप्रसादरूपाया अवस्थाया मध्यं तस्मिन्मया संप्रतिपत्तिप्रवृत्तेन किमपि मिथ्यैवोद्भाव्य हसितम्। तया पुनर्धृतिहरो बाष्पस्त्यक्तः। धृतिं हृतवान्। 'पचादिभ्यश्च' इत्यच्। अधृतिं सूचितवानित्यर्थः। नहि बाष्पः प्रथममुत्पद्य धृतिं जहार, अपि त्वधृतिसमनन्तरमुत्पन्नो नायकस्य धृतिं हृतवानिति चेत्,-मैवम्; मानिनीमानस्य प्रत्युताश्रुमोक्षान्तत्वात्। 'पश्यामः' इत्यत्र 'पश्येयम्'

इति पाठो युक्तः। मयीत्येकवचनव्यपदेशात्। 'किं मां नालपतीति' इत्यत्रेतिशब्दोऽस्थाननिवेशितः; शठशब्दानन्तरं प्रयोजनीयत्वात्। 'अन्योन्यविलक्षदृष्टिचतुरे तस्मिन्नवस्थान्तरे' इत्यत्रावस्थानन्तरं चतुरताधिकरणं भवितुमशक्तं सत्स्वसंबद्धं मिथुनं लक्षयति। तां विलक्षां दृष्टि तदेवावस्थान्तरं न जानाति न पुनरन्यः कोऽपीति दृष्टेरनिर्वचनीयत्वं चात्र प्रयोजनम्। प्रणयबहुमानलालिता मुग्धा नायिका॥

परिम्लाने माने मुखशशिनि तस्याः करधृते
मयि क्षीणोपाये प्रणिपतनमात्रैकशरणे।
तया पक्ष्मप्रान्तध्वजपुटनिरुद्धेन सहसा
प्रसादो बाष्पेण स्तनतटविशीर्णेन कथितः॥२५॥

तया प्रसादः कथितः, अनुमानेन प्रतिपादित इत्यर्थः। केन?। बाष्पेण। किंविशिष्टेन?। पक्ष्मप्रान्तध्वजपुटनिरुद्धेन। पक्ष्मप्रान्तावेव ध्वजौ तयोः पुटं तत्र निरुद्धेन अव्ययानामनेकार्थत्वान्निमेषमात्रं। रुद्धेन न तु निःशोषतो रुद्धेन। अत एव रोद्धुमशक्यत्वात्सहसा स्तनतटविशीर्णेन। अयमभिप्रायः—हृदये द्रुताया नायिकायास्तावदश्रूद्गमो जातः। पश्चात्तया संवरणार्थं रोद्धुमारब्धः। अथ दुर्वहतयासौ बलात्कारेण स्तनयोरुपरि पपात। पक्ष्मप्रान्तयोर्ध्वजपुटरूपेण दैर्घ्यं साधारणो धर्मः। पुटशब्दोऽश्रुनिरोधप्रयत्नप्रतिपादकः। तटशब्दः स्तनयोः परिणाहं द्योतयति, विशीर्णशब्दस्तु काठिन्यम्। अन्यथा कथं बाष्पः कणशो विशीर्णतां व्रजेत्?। अनुनयेन मानो गत उत स्वयमित्याह—तस्याः परिम्लाने माने अपराधातिशयात्पूर्वमनुनीयमानापि प्रसादं कथमपि न चकार पश्चाद्यथा कश्चित्तीव्रं रुदन्निवारितोऽपि न निवर्तते, किंतु परिश्रान्तः स्वयमेव, तथा तस्या मानः स्वयं शिथिलो बभूव। अत एव विषादद्योतकं मुखशशिनि करधृत इति। अर्थवशाद्विभक्तिविपरिणामेन तया करधृत इत्यर्थः। परिम्लानता कुसुमादिषु प्रसिद्धा अमूर्ते माने स्खलद्गतिः स्वसंबद्धं शैथिल्यं लक्ष्यति। व्यङ्ग्यं चात्र चमत्कारेण केवलमनुमेयं गूढमेव। यथा—'मुखं विकसितस्मितं वशितवक्रिम प्रेक्षितं, समुच्छलितविभ्रमा गतिरपास्तसंस्था मतिः। उरो मुकुलितस्तनं जघनमंसबन्धोद्धुरं, बतेन्दुवदनातनौ

तरुणिमोद्गमो मोदते।।' न केवलमेवं सति, अन्यच्च मयि क्षीणोपाये। ननुषण्णामुपायानां मध्ये प्रणतिरस्त्येव। तत्कथं 'क्षीणोपाये' इत्युक्त्वा 'प्रणिपतनमात्रैकशरणे' इत्युक्तम्। युक्तमेवैतत्। परमिदं प्रणिपतनमुपायतया नारब्धम्, किं त्वनन्यगतिकत्वेन। अत एव मात्रच्प्रत्ययः, शरणशब्दप्रयोगश्च। मुखशशिनीति काव्यालंकारो रूपकम्। नाट्यालंकारः कोपकालुष्येऽपि माधुर्यम्। यदुक्तम्–'यौवने सत्त्वजाः स्त्रीणामलंकारास्तु विंशतिः।' भावहावहेलास्त्रयोऽङ्गजाः। शोभा कान्तिर्दीप्तिर्माधुर्यं प्रागल्भ्यमौदार्यं धैर्यमित्ययत्नजाः सप्त। 'लीला विलासो विच्छित्तिर्विभ्रमः किलकिञ्चितम् मोट्टायितं कुट्टमितं विव्वोको ललितं विहृतम्।।' इति स्वाभाविका दश। अनुल्बणत्वं माधुर्यम्। यथा–'सरसिजमनुविद्धं शैवलेनापि रम्यं, मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति। इयमधिकमनोज्ञा धल्कलेनापि तन्वी, किमिव हि मधुराणां मण्डनं नाकृतीनाम्'।।

तस्याः सान्द्रविलेपनस्तनयुगप्रश्लेषमुद्राङ्कितं
किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते।
इत्युक्ते क्व तदित्युदीर्य सहसा तत्संप्रमार्ष्टुं मया
साश्लिष्टा रभसेन तत्सुखवशात्तस्याश्च तद्विस्मृतम्।।२६।।

सा मया परिरब्धा। किं कृत्वा?। क्व तदित्युदीर्य। क्व तत्सान्द्रविलेपनम्, अपि तु न क्वापीत्यर्थः। किं कर्तुम्?। वेगेन संप्रमार्ष्टुं तदेव विलेपनं स्वहृदयलग्नं प्रोञ्छितुम। विलेपनप्रोञ्छनमेव केवलमधिकृत्यालिङ्गिता, न तु प्रीत्येत्याह–रभसेन हर्षविशेषेण। क्व सति?। तया इत्युक्ते सति। इति किम्?। किमिति चरणप्रणामसंबन्धच्छद्मना हृदयमपह्नू यते। किंविशिष्टं वक्षः। तस्या यद्घनश्रीखण्डादिविलेपनं स्तनयुगं तस्य प्रकृष्टमालिङ्गनं तेन विलेपनमयी मुद्रा तया लाञ्छितम्। अन्यदपि यन्मुद्रालाञ्छितं निधानादिकं भवति तत्प्रयत्नेन गोपाय्यते। व्यतिकरव्याजेनेति ब्याज-शब्दस्यायमीर्ष्याद्योतकोऽभिप्रायः। तत्प्रियतमास्तनविलेपनलाञ्छितस्य वक्षसो रक्षणं तव महत्प्रयोजनम्, चरणानतिव्यतिकरस्तु मिथ्यारम्भ इति। यद्यपि तस्या इति पदस्य स्तनयुगपदेन सह संबन्धस्तथापि वक्षःपदेन

सह संबन्धविधायको भिन्नविभक्तिर्निदेश उचितः। तस्या अधीनं तव हृदयमिति प्रतीतेः। आश्लिष्टापि मानं तत्याज न वेत्याह-तस्याश्च परिम्भसुखवशात्तद्विलेपनं विस्मृतम्। चशब्दस्तुल्यकालताप्रतिपादनार्थे। यदैवालिङ्गिता तदैव कोपकारणं विस्मृतवतीति प्रीतिप्रकर्षः। अत्र कोपस्य शान्तिरित्यत्र भावशान्तिः। ईर्ष्यामानात्मकविप्रलम्भारम्भपर्यवसितः संभोगः। नायको वक्ता पूर्ववत्। पिहितमलंकारः। यदुक्तम्–'यत्रातिप्रबलतया गुणः 'समानाधिकरणमसमानम्। अर्थान्तरं विदध्यादाविर्भूतमपि तत्पिहितम्॥' व्यक्तागा वितथो धृष्टः' इत्यनेन धृष्टो नायकः। माननर्म चैतत्। यथा–'तदवितथमवादीर्यन्मम त्वं प्रियेति, प्रियजनपरिभुक्तं यद्दुकूलं दधानः। मदधिवसति मा गाः कामिनां मण्डनश्रीर्व्रजति हि सफलत्वं वल्लभालोकनेन'॥

त्वं मुग्धाक्षि! विनैव कञ्चुलिकया धत्से मनोहारिणीं<br>
लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासंस्पृशि।<br>
शय्योपान्तनिविष्टसस्मितसखीनेत्रोत्सवानन्दितो<br>
निर्यातः शनकैरलीकवचनोपन्यासमालीजनः॥२७॥

अलीकवचनानामुपन्यासो यत्र–तद्यथा भवत्येवं वयस्याजनः शनकैर्निर्गतः। किंविशिष्टः?। शय्योपान्तेत्यादि। कान्तशय्योपान्ते निविष्टा या सखी नायिका तस्य नेत्रोत्सवेन प्रमुदितः। क्व सति?। कञ्चुलिकया वीटिकासंस्पृशि प्रियतमे इत्यभिधायिनिसति। इतीति किम्। हे विह्वलाक्षि! त्वं कञ्चुलिकामन्तरेणैव रमणीयां शोभां दधासि। अत्र मदनालसलोचनां दृष्ट्वा ग्राम्येतरभङ्गीभणितिप्रक्रमेण रिरंसुः कामी मुग्धाक्षीति संबुबुधे। सत्यां कञ्चुलिकायामङ्गसौन्दर्यस्य प्रत्युत पिधानं भवतीति विनैवेत्येव-कारस्य तात्पर्यम्। कञ्चुलिका चेयं दाक्षिणात्यचोलिकारूपैव। तस्या एव ग्रथनपदार्थे वीटिकाव्यपदेशः। अन्यत्र कषातनिकेत्येवमादयः। भवतीष्वप्युपविष्टास्वयमेवंविधं चेष्टत इति सलज्जकृतस्मिताया नायिकायाः सखीजनं प्रत्यवलोकनमात्रमेव नेत्रोत्सवः। ननु स्पर्शसुखेन नयननिमीलनं नायिकानां प्रसिद्धम्। यदाह कालिदासः–'मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः। शृङ्गेण च स्पर्शनिमीलिताक्षीं

मृगीमकण्डूयत कृष्णसारः।।' इत्यादिषु तिर्यक्संभोगेऽपि तदेव श्लाघ्यम्। तत्कथमत्र विकस्वरदृष्टिता व्याख्यायते?। अत्रोच्यते–नहि सर्वासामेव नायिकानां स्पर्शसुखेन लोचननिमीलनं स्पृहणीयम्। प्रौढनायिकानामेव ोपवर्ण्यमानत्वात्। ता हि सुरतारम्भ एवाचेतना भवन्ति। इयं च मध्या नायिका। मुग्धाक्षीति मदनालसलोचनेति कान्तं प्रत्यनभियोगित्वात्। यदुक्तम्एवमपरेऽपि व्रीडानुपहताः स्वयमनभियोगकारिणो मध्याव्यवहारा भवन्ति। यथा 'स्वेदाम्भःकणिकाचितेऽपि वदने जातेऽपि रोमोद्गमे विस्रम्भेऽपि गुरौ पयोधरभरोत्कम्पेऽपि वृद्धिं गते। दुर्वारस्मरनिर्भरेऽपि हृदये नैवाभियुक्तः प्रियस्तन्वङ्ग्या हठकेशकर्षणघनाश्लेषामृते लब्धया।।' सद्भावरहःसहचरीणां परस्परसौभाग्यसाक्षात्कारेणाह्लादो भवतीत्यालीजन आनन्दितः। कविर्वक्ता। विनैव कञ्चुलिकया धत्से मनोहारिणीं लक्ष्मीमित्यनेन विभावनालंकारः। यदुक्तम्–'सेयं विभावनाख्या यस्यामुपलभ्यमानमभिधेयम्। अभिधीयते यतः स्यात्तत्कारणमन्तरेणापि।।' अत्रार्थशक्त्याक्षिप्तो रिरंसा-लक्षणोऽर्थः कविना सखीजनसव्याजगमनात्मिकया स्वोक्त्या भूयोऽपि व्यञ्जितः। यदुक्तम्–'शब्दार्थशक्त्याक्षिप्तोऽपि व्यङ्ग्योऽर्थः कविना पुनः। यत्राविष्क्रियते स्वोक्त्या सान्यैवालंकृतिर्ध्वनेः।।' यथा–'अम्बा शेतेऽत्र वृद्धा परिणवय-सामग्रणीरत्र तातो, निःशेषागारकर्मश्रमशिथिलतनुः कुम्भदासी तथात्र। अस्मिन्पापाहमेका कतिपयदिवसप्रोषितप्राणनाथा पान्थायेत्थं तरुण्या कथितमवसरव्याहृतिव्याजपूर्वम्।।' मनोहारिणीं लक्ष्मीमित्यनेन शोभा नाम नाट्यालंकारः–'रूपोपभोगतारुण्यैः शोभाङ्गाना विभूषणम्।' यथा–'तां प्राङ्मुखीं तत्र निवेश्य बालां क्षणं व्यलम्बन्त पुरो निषण्णाः। भूतार्थशोभाह्रियमाणनेत्राः प्रसाधने संनिहितेऽपि नार्यः।।' मुग्धाक्षीत्यनेन कान्तिश्च–'मन्मथाप्यायिता छाया सैव कान्तिरिति स्मृता'।।

यथा मानं त्याजिता सती तत्कालमवलम्ब्यमानेर्ष्यातिरेकेण संयुज्यमाना रहसि रमणे रतिरमणरहस्यसर्वस्वमुन्मुद्रयति न तथा नित्यमेवेत्यनुसंधाय सखीभिः प्रणयमानं शिक्षिता सती ताः प्रति काचिदाह–

भ्रूभङ्गे रचितेऽपि दृष्टिरधिकं सोत्कण्ठमुद्वीक्षते

रुद्धायामपि वाचि सस्मितमिदं दग्धाननं जायते।

कार्कश्यं गमितेऽपि चेतसि तनू रोमाञ्चमालम्बते

दृष्टे निर्वहणं भविष्यति कथं मानस्य तस्मिञ्जने ॥२८॥

लोचनगोचरे सति तस्मिञ्जने मानस्य निर्वाहः कथं भविष्यति, अपि तु न कथमपि। तस्मिन्नित्यनिर्वचनीय चमत्कारे जने इत्यर्थान्तरसंक्रमितत्वेन प्राणेश्वर इत्यर्थः। नहि कृत्रिमैरुपायैरयुतसिद्धं वस्तु निह्नोतं शक्यते। तदत्र क उपायाः किं च वस्त्वित्याह–भ्रूभङ्ग इत्यादिना। एवमेव तावत्प्रियतमं दृष्टिः सोत्कण्ठमुद्वीक्षते। भ्रुकुटिकौटिल्ये नाटिते पुनरधिकं सोत्कण्ठ-मुद्वीक्षते। यथा कश्चित्पक्षी बलात्कारेण रुध्यमानः कथंकथमप्युड्डीय यत्रत्यो भवति तत्रैव गत्वा रमते। अभिनीतेऽपि वाचंयमत्वे ममेदं दग्धमुखं सस्मितं भवति। धिक्कारे दग्धहतकादयः शब्दाः प्रयुज्यन्ते। अथ च तेन सार्धमालापनमन्तरेणाप्रयोजनमाननं दग्धमेव। काठिन्यं गत इत्येव न अपि तु काठिन्यं गमिते। तथाभूतेऽपि मनसि तनुः पुलकं बिभर्ति। अथ च प्रिये काठिन्यं गमिते चेतसि तनुः तनुः स्वे ( ? ) कृशेत्यर्थः। तस्मिन्दृष्टे मानस्य कथं निर्वाहो भविष्यति। कोऽर्थः? मया भ्रूभङ्गादीनि दुष्कराणि कृतानि, परंतु न मानो निर्व्यूढः। तस्मादतः परं मानार्थे यत्नमपि न करिष्यामीति प्रीतिप्रकर्षो भविष्यत्या व्यज्यते। उत्तरयत्नाक्षेपालंकारौ॥

सा पत्युः प्रथमेऽपराधसमये सख्योपदेशं विना

नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम्।

स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला

बाला केवलमेव रोदिति लुठल्लोलोदकैरश्रुभिः॥२९॥

सा बाला भर्तुर्व्यलीकप्रस्तावे केवलं रोदित्येव। कीदृशी। लम्बितपक्ष्मलोचनेन्दीवरा। कैर्विशिष्ट? अश्रुभिः। कथंभूतैः?। निर्मलकपोलयोर्यन्मूलं नेत्रयोरधोभागस्तत्र क्षरितैः। पुनः किंविशिष्टैः। लुठल्लोलोदकैः निमेषार्धबद्धबिन्दुजालतया लुठत्पतनशीलत्वेन लोलमुदकं येषां तैः। पुनः कीदृशैः?। नैरन्तर्येण प्रथममेवोन्मृष्टकज्जलत्वात्स्वच्छैः। अथवा ईर्ष्यामानेऽप्यनुपन्यस्तवक्रोक्त्यादेर्नायिकायाः स्वच्छतानुमापकैः। उपचारेणाश्रुभिपि स्वच्छैः। ननु किमिति रोदित्येवमुल्लुण्ठनादिकमेव

किमिति नारभत इत्याह–नो जानाति। किं तत्?। सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम् सहेलं भक्षेपादिभिरङ्गवलनादिभिरनृजुभणितिभिश्चापराधस्य सम्यगनुमानम्। तदेव किमिति न वेत्तीत्याह–सख्योपदेशं विना सख्येनोपदेशः अर्थात्सख्यास्तं विना। अत्र तावत्कविः प्रायस्तटस्थो वक्ता। सेति पदं च दूरीदूतप्रभृतिकस्य रतिवासनालिङ्गितान्तः करणस्य वा वक्तुर्युज्यते, न तु तटस्थस्य। तस्मात् 'कान्तस्य प्रथमेऽपराधसमये' इति पाठो युक्तः। अथानुरक्त एव वक्तास्तु। मैवम्; पत्युरित्यनुपपन्नत्वात्॥

काचिदन्यानायिकानुरक्तं नायकं प्रति ब्रूते–

भवतु विदितं व्यर्थालापैरलं प्रिय! गम्यतां
तनुरपि न ते दोषोऽस्माकं विधिस्तु पराङ्मुखः।
तव यदि तथारूढं प्रेम प्रपन्नमिमां दशां
प्रकृतितरले का नः पीडा गते हतजीविते॥३०॥

हे प्रिय! भवतु अनुनयोपक्रमैरालापैरास्ताम्। कोऽर्थः? ज्ञातं तव स्वरूपम्। प्रसादनप्रवृत्तस्यापि सर्वाकारमन्यासक्तिशंसिन्येव च्छाया बाह्याकारेण दाक्षिण्यमात्रमेतत्। अत एव व्यर्थालापैः पूर्यताम्। 'त्वदधीनं मे जीवितम्' इत्यादीनामालापानामर्थस्य विगतत्वाद्व्यर्थता। तस्माद्यत्रैव प्रतिभासते तत्रैव गम्यताम्। नहि प्रियस्यसमीहितप्रतिबन्धः कर्तुं युज्यते। अस्मिन्प्रेमवैशसे तव स्वल्पोऽपि दोषो नास्ति। अस्माकमेव दैवं वक्ष्यमाणमरणाध्यवसायेन प्रतिकूलम्। अस्माकमिति बहुवचनमौदासीन्यव्यञ्जकम्। अनेकार्थत्वादव्ययानाम्। तुशब्दोऽवधारणार्थः। केन प्रकारेण विधिः पराङ्मुख इत्याह-तव यदीत्यादी। तव यद्यनिर्वचनीयेन प्रेकारेण कोटिं प्राप्तं प्रेम इमां प्रसादनसमयेऽप्यन्यासक्तिशंसनलक्षणामवस्थां प्रपन्नमस्मादस्माकं स्वभावगत्वरे निन्द्यजीविते गते का व्यथा। अपि तु न कापि। प्रकर्षप्राप्तस्य प्रेम्णो विपर्यासे त्वेषैवं स्थितिः। यथा रत्नावल्याम्–'समारूढा प्रीतिः प्रणयबहुमानादनुदिनं व्यलीकं वीक्ष्येदं कृतमकृतपूर्वं खलु मया। प्रिया मुञ्चत्यद्य स्फुटमसहना जीवितमहो प्रकृष्टस्य प्रेम्णः स्खलितमविषह्यं हि भवति॥' तनुरपि न ते दोष इत्यत्र तवैव गरीयान्दोष इति

विपरीतलक्षणाया निषेधे विधिः। एवं च त्वयि निरनुक्रोशेऽस्माकं विधिः पराङ्- मुख इति प्रीत्यतिशयः। तवेत्यर्थान्तरसंक्रमितत्वेन शठस्येत्यर्थः। वयं त्वदेकशरणः, तस्मात्का नः पीडा? अपितु तवैव। प्रकृतितरले इत्यनेन संसारस्यानित्यता प्रतिपाद्यते। वैराग्यं च शृङ्गारोपनिबन्धे वयं तावदनुचितं मन्यामहे यथोदाहृतं दोषनिर्णये मम्मटालकाभ्याम्–'प्रसादे वर्तस्व प्रकटय मुदं संत्यज रुषं प्रिये शुष्यन्त्यङ्गान्यमृतमिव ते सिञ्चतु वचः। निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखं न मुग्धे प्रत्येतुं प्रभवति गतः कालीरिणः॥' अत्र शृङ्गारे प्रतिकूलस्य शान्त्यस्यानित्यताप्रकाशनरूपो विभावस्तत्प्रकाशितो निर्वेदश्च व्यभिचारी। यद्यपि शुद्धतार्किकाणां जातिघोटिक (?) वैयाकरणानामैकान्तिकच्छान्दसानां च दन्तकलहो न निवर्तिष्यते, यद्यपि च करणीय (?) सहृदयाः प्रस्त्रवणनिरीधवाधिता (?) इव नासासंकोचं करिष्यन्ति, तथापि परमार्थसहृदयैः कृतयोगक्षेमाः पाठान्तरमभिदध्महे–'अकृतविफले का नः पीडा गते हतजीविते' इति नायकस्यान्यासक्तिलक्षणस्य नायिकायाः प्रीतिलक्षणस्यान्तरस्य प्रतीतिजनको भावोनामालंकारः। यदुक्तम्–'अभिधेयमभिदधानं तदेव तदसदृशसकलदोषगुणम्। अर्थान्तरमवगमयति वाक्यं तदसौ परो भावः॥'

काचित्स्वैरिणी जरदभिसारिकया सोपदेशमभिधीयते–

उरसि निहितस्तारो हारः कृता जघने घने  
कलकलवती काञ्ची पादौ रणन्मणिनू पुरौ।  
प्रियमभिसरस्येवं मुग्धे! त्वमाहतडिण्डिमा  
यदि किमधिकत्रासोत्कम्पं दिशः समुदीक्षसे॥३१॥

हे मुग्धे! यदि त्वमित्थं वादितपटहा, प्रियं प्रत्याभिमुख्येन गच्छसि, तदा अधिक त्रासेनोत्कम्पो यत्र तद्यथा भवत्येवं ककुभः किमित्युत्कंधरमीक्षसे। एवमाहतडिण्डिमा। एवं कथमित्याह–वक्षसि पारिप्लवं मुक्तादाम न्यस्तम्। शब्दायमाना मेखला नितम्बे निवेशिता। किंविशिष्टे?। घने, प्रचुर-परिणाहिनीत्यर्थः। चरणौ च शिञ्जानरत्नमञ्जीरौ। हारश्चाकचक्यायमानतया प्रकाशकः, काञ्चीनू पुरौ च सशब्द त्वेन। पादौ रणन्मणिनूपुरावित्यत्र यद्यपि बहुव्रीहिणैव प्रकाशमाना त्मकोऽर्थः संघटते, तथाप्युरसि

हारवज्जघने काञ्चीवदाधाराधेयभावेनाप्रयोगादुपक्रमभङ्गो दूषणम्। ईषद्दूषणत्वाञ्चादूषणप्रायम्। मुग्धेइत्यत्र मोहः प्रियसंगमौत्सुक्यवती विह्वलतैव। अन्यथोपलम्भकारणानि भङ्क्त्वा किमित्यभिसरणमारभते। आहतडिण्डिमेत्यत्र लक्षणा सुप्रकाशकत्वमर्थः। अधिकत्रासोत्कम्पमित्यत्र च संकल्पकल्पितेन प्रियसमागमेन सात्त्विक एव तावदुत्कम्पः। त्रासेन पुनरधिक इति। अथ चाहतडिण्डिमा यदि प्रियमभिसरसि तदा किमद्यापि दिशः समुदीक्षसे?। वेगेन गत्वा समीहितं साधयेति साभ्यसूयं कार्यशिक्षा। विषमोऽलंकारः। यदुक्तम्–'विषम इति प्रथितोऽयं वक्ता विघटयति कमपि संबन्धम्। यत्रार्थयोरसन्तं वरमतमाशङ्क्य तत्सत्त्व॥' यथा–'यो यस्य नैव विषयो न स तं कुर्यादहो बलात्कारः। सततं खलेषु भवतां क्व खलाः क्व च सज्जनस्तुतयः॥' अभिसारिकाश्च प्रदोषेषु विवाहादिप्रकरणेष मध्याह्नशून्येषु मार्गेषु वसन्तोत्सवे उद्यानयात्रासु विदूरेषु चैवंविधेष्वन्येष्वपि संविधानकेषु कामुकमभिसरन्ति। यदुत्तम्–'अटव्यामन्धकारे वा शून्ये वापि सुरालये। उद्याने वा सरित्कुञ्जे प्रदेशे गर्हितेऽथवा॥ परादारेषु संकेतः कर्तव्यो रतिसिद्धये । दूतीवक्त्रेण निश्चित्य स्वयं तत्र पुरा व्रजेत्॥ ततः प्राप्तां प्रियां शीघ्रं सेवेत रतिकोविदः। प्रेषयेदन्यमार्गेण स्वयमन्येन च व्रजेत्॥ यथा न ज्ञायते कैश्चित्सुनिगूढो विचक्षणः।' अभिसारयन्ति च दूत्यो नायिकामनेककौतुकवासनाभिः। यदुक्तमीश्वरकामिते– 'प्रागेव स्वभवनस्थां ब्रूयात्। अमुष्यां क्रीडायां तव राजभवनस्थानानि रामणीयकानि दर्शयिष्यामीति। काले च योजयेत्। बहिः प्रवाल-कुट्टिमं ते दर्शयिष्यामि। मणिभूमिकां वृक्षवाटिकां मृद्वीकामण्डपिका चित्रकर्माणि यन्त्राणि क्रीडामृगान्-' इत्यादि। भवननर्म चैतत्। यथा रत्नावल्यामालेख्यदर्शनावसरे–'जणिदो मए एसो सव्वो वुत्तंतो समं चित्तफलएण। ता गदुअ देवीए कहइस्सं।' इत्यादि॥

मलयमरुतां व्राता वाता विकासितमल्लिका-
परिमलभरो भग्नो ग्रीष्मस्त्वमुत्सहसे यदि।
घन! घटयितुं तं निःस्नेहं य एव निवर्तने
प्रभवति गवां किं नश्छिन्नं स एव धनञ्जयः॥३२॥

हे घनः चैत्रीयाश्चन्दनसमीरा वहन्ति स्म। निदाघकालोऽपि पर्यवसितः। किंविशिष्टः। दलितकोमलविचकिलानां परिमलभरो यस्मिंस्तथा। उभयोरप्युद्दीपनविभावयोः सुगन्धित्वोक्तिः। ताभ्यामपि प्रियो न मेलितः। अत एव वाता इति भग्न इति चाक्षमत्वोक्तिः। लोके ह्यप्रयोजके वायुरिति व्यपदिश्यते परिश्रान्ते च भग्न इति। उभावाक्षिप्य मेघमुत्तेजयति–यदि परं तं प्रियमुद्दीपनविभावोद्‌गमेऽपि स्वस्थावस्थत्वात्यक्तानुरागं मेलयितुं त्वमुद्यच्छसे। मेघागमे हि यथाकथंचिद्‌दूरदेशान्तरादप्यागत्य पान्थाः कान्ताभिः सह संगच्छन्ते। अमुमेवार्थमाख्यानेन द्रढयति–य एव गवां निवर्तने प्रत्यानयने क्षमते स एव धनंजयः। किमस्माकं त्रुटितम्। कोऽर्थः? वनं जीवाम एव। धनंजयपदमुचितम् गोसमूहस्यापि धनशब्देन प्रसिद्धत्वात्। आख्यानकवाक्यान्तः पतितत्वात्किं नश्छिन्नमिति न गर्भितं नाम दूषण-माधत्ते। क्वचिदेवंविधस्य दोषस्यापि गुणप्रतीतेः! यथा काश्मीरकवि-ह्लणस्यः–'कृत्वा नूपुरमकतां चरणयोः। संयम्य नीवीमणीनुद्दामध्वनि-पण्डितान्परिजने किंचिञ्च निद्रायति। कस्मात्कुप्यसि यावदस्मि चलिता तावद्विधिप्रेरितः काश्मीरीकुचकुम्भविभ्रमधरः शीतांशुरभ्युद्‌गतः॥' इत्यत्र कस्मात्कुप्यसीति। अत्र हि संकेतप्राप्तस्य वैमनस्यमपनेतुं स्वविलम्बकारणमुदाहरन्ती स्वैरिणी वाक्यस्यान्तरेव प्रसत्तिजनकं कस्मात्कुप्यसीत्यवोचत्। तथा प्रोषितभर्तृकापि मेघात्संभाव्यमानेऽपि प्रियसमागमे संकल्पितसमीहितसिद्धिरसमाप्तेऽपि वाक्ये किं नश्छिन्नमिति संतोषव्यञ्जकं पदमुक्तवती॥

काचिदेकग्रामप्रवासेन मन्दमन्दोद्दीपितमन्मथानलज्वालाभिभूततनुर्व्याधि-व्यपदेशेन मानमन्युमनुभवन्ती सपत्ननायिकासक्तं नायकं प्रति सोल्लुण्ठ-करुणोपन्यासमाचष्टे–

प्रातःप्रातरुपागतेन जनिता निर्निद्रता चक्षुषो-<br>
र्मन्दाया मम गौरवं व्यपगतं प्रोत्पादितं लाघवम्।<br>
किं तद्यन्न कृतं त्वया मरणभीर्मुक्ता मया गम्यतां<br>
दुःखं तिष्ठसि यच्च पथ्यमधुना कर्तास्मि तच्छ्रोष्यसि॥३३॥

यद्यपि मानविषयस्यार्थस्यात्र मुख्यता तथापि संविधानकवशेन रुग्विषय एवार्थ आदौ प्रतिपाद्यते–प्रतिप्रभातमागतस्त्वम्। रोगिणो हि विशेषाविशेषपरिज्ञानमिष्टजनः प्रभात एवागत्य करोति। मम चक्षुषोर्निद्रा निवारिता। किंविशिष्टायाः?। मन्दायाः सरुजः। दिवास्वापो हि निषिद्धः; सव्याधेः। दृष्टौ हि मीलनोन्मीलनपरिज्ञानार्थमवनं कार्यमिति विशेषणं चक्षुषोरिति प्रसिद्धं युक्तम् (?)। अन्यथा जनिता निर्निद्रतेत्येतावतैव पूर्यते। उचितप्रतिविधानैरेव यत्र पारवश्यं व्यपगतम्। अन्तर्भूतकारितार्थत्वे व्यपग (मि) तमित्यर्थः। अन्यथा नायककर्तृकयोर्निद्रानिरोधलाघवोत्पादन-वाक्ययोरन्तरा गौरवं स्वयमेव व्यपगतमिति प्रयोक्तुं न युज्यते। स्फूर्तिमत्त्वं प्रकर्षेणोत्पादितम्। अथवा किं बहुना, किं तत्समयोचितं न कृतं त्वया? अपि तु सर्वं कृतम्। अत एव मृत्युभयं परित्यक्तं मया, अतःपरं निःसंशयंजीविष्यामीत्यर्थः। इदानीं गम्यताम्। यतः कृच्छ्रमास्ते भवान्। यच्चेदानीं मुद्गरसप्रायं पथ्यं करिष्यामि तदाकर्णयिष्यसि। कोऽर्थः? पथ्यं श्रुतिविषयमेवास्तु, न तु दृष्टिविषयम्। दृष्टिविषये किल भवदीयकार्यसंकोचल्केशकारिणी वेला लगिष्यति। अथ प्रातःप्रातरुपागतोऽसि, न तु रात्रौ। तदा हि कदाचित्संगमावकाशोऽपि संभवति। अन्यच्चान्याङ्गना-सङ्गशंसीन्यधरक्षतादीन्यपि प्रातर्दृश्यन्ते। तानि चाक्षिदुःखमुत्पादयन्ति। अत एव जनिता निर्निद्रता चक्षुषोः। अन्यथा विरहेवेदनाजागरितसकलरात्रेर्दिव। कदाचिन्निद्रापि मुहूर्तं घटते। कचाकर्षणताद्यकरणादक्षमाया मम बहुमानो व्यपगमितः। तुच्छता तु प्रकर्षेण जनिता। अथवा किं तद्यत्त्वया विरुद्धं न कृतम्। अत एव मया मरणे निश्चयः कृतः। तदितः स्थानाद्गम्यताम्। यतोऽत्र दुखः तिष्ठसि; तत्रैव ते सुखमित्यर्थः। यच्चेदानीं प्राणपरित्याग-लक्षणमुचितं करिष्यामि तदवश्यं श्रोष्यसि। न तु कर्णपिधानादिना शोकावेगं सूचयिष्यसि; तवैव समीहितत्वात्। कर्तास्मीत्यत्र लुटि उत्तमैकवचनम्। मन्दाशब्दशक्त्युद्भव उपमालंकारः। यथा सरागा वराकीति संभाव्यते तथा त्वयाहं संभावितेति प्रतीतेः। यदुक्तम्–'ननु शब्दशक्त्या यत्रार्थान्तरं प्रकाशते स यदि ध्वनेः प्रकार उच्यते तदानीं श्लेषस्य विषयोऽपहृत एव स्यात्।' नापहृत इत्याह–'आक्षिप्त एवालंकारः

शब्दशक्त्या प्रकाशते। यस्मिन्ननुक्तः शब्देन शब्दशक्त्युद्भवो हि सः॥'

कस्यांचिदनुरक्तः कश्चित्स्वयं सवितर्कमनुसंधत्ते। विस्रम्भपात्रस्य या प्रतिविधानप्रत्याशया कस्याप्यग्रे निवेदयति–

सा बाला वयमप्रगल्भमनसः सा स्त्री वयं कातराः
सा पीनोन्नतिमत्पयोधरयुगं धत्ते सखेदा वयम्।
साक्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं
दोषैरन्यजनाश्रयैरपटवो जाताः स्म इत्यद्भुतम्॥३४॥

सा अनिर्वचनीया मुग्धा, वयं च तदप्राप्तिपर्याकुलतया अप्रगल्भमनसः। अथ च यत्रैव बाल्यं तत्रैवाप्रगल्भमनस्कत्वं युज्यते। सा स्त्री, वयं च तां बिना स्थातुं न शक्नुम इति गतधैर्याः। अथ च यत्रैव स्त्रीत्वं तत्रैव कातरत्वमुचितं भवति। सा पीनं चोन्नतिमच्च एवविधं स्तनयुगलं बिभर्ति, वयं च तद्गाढालिङ्गनमप्राप्नुवन्तः सखेदाः। अथ च य एव गुरुपदार्थभारं वहति स एव सखेदो दृश्यते। 'भर' इति पाठे स्तनभारं बिभर्तीत्यर्थः। अत्र पाठे धरभरमित्यनुप्रासालंकारः। भारश्च साक्षादुक्तः। पूर्वत्र तु पाठे पीनोन्नतिमत्त्वेन भार आक्षिप्यत इति। सा महता नितम्बभरेणाक्रान्ता, वयं च तां तत्प्राग्भारलीलालसगामिनीं स्मरन्तो जडिम्ना गन्तुं न क्षमाः। अथ च य एव महता भारेणाक्रान्तो भवति स एव गन्तुं न शक्नोति। एवं सत्यन्य-जनावलम्बिभिर्दोषैर्वयमसौष्ठवाः संवृत्ता इत्याश्चर्यमेतत्। असंगतिरलंकारः। यदुक्तम्–'विस्पष्टं समकालं कारणमन्यत्र कार्यमन्यत्र। यस्यामुपलभ्येते विज्ञेयासंगतिः सेयम्॥' दोषैरित्यत्र विपरीतलक्षणयागुणैरित्यर्थः। अत एवानिर्वचनीयताद्योतकः सर्वत्र सा शब्दः। अथ च तस्या एव दोषो या यथा कथंचिदागत्य संकेते मया सह न संगच्छत इत्यभिप्रायः। अन्यच्च सा बाला चेष्टाविशेषानुमेयानुरागापि प्रच्छन्नचाराद्ययोग्यतया संगमोपायं न जानातीत्युभयानुरागः। एकानुरागे हि शृङ्गाराभास एव स्यात्। यथा बालरामायणस्योन्मत्तदशाननाङ्के। तत्र हि सुलभानेकस्त्रीरत्नस्यापि रावणस्य यदप्राप्तावुन्मादो जातस्तस्याः प्राणेश्वररामचन्द्रैकचेतसो जानक्याः स्पृहणीय-तातिशयः प्रतिपादितो भवति, न तु रसोपनिबन्धः; उभयानुरागाभावात्॥

काचिद्भाविप्रोषितभर्तृका आत्मानं प्रति सोपालम्भमाचष्ट–

प्रस्थानं वलयैः कृतं प्रियसखैरस्त्रैरजस्त्रं गतं
धृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः।
यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता
गन्तव्ये सति जीवित! प्रियसुहृत्सार्थः किमु त्यज्यते॥३५॥

हे जीवित!! कृत्याकृत्यविवेकपराङ्मुखतया प्रियतमे देशान्तरं गन्तुं निःसंदेहमनसि सति सर्वे सुहृदः सहैव प्रचलिताः। कथमित्याह-प्रस्थानं वलयैरित्यादि। दौर्बल्यवशेन पतनशीलतया हस्ताभरणैः प्रस्थानं कृतम्। किंविशिष्टैः?। प्रियसखैः वल्लभसहचरैः, प्रिये तिष्टति तिष्ठद्भिर्गच्छति गच्छद्भिरित्यर्थः। एवमस्त्रादिष्वपि प्रियसखत्वं योज्यम्। अस्त्रैरप्यनवरतं गतम्। अश्रूणामप्रवृत्तिरेवावस्थितिः। गतिश्च प्रवृत्तिरेव। न त्वभाव एव। तथा सत्यश्रूणामभाव एव स्यात्। संतोषेण क्षणमपि न स्थितम्। मनसापि पुनः प्रथममेव गन्तुमुपक्रान्तम्। तत्त्वयाप्यवश्यगन्तव्ये सति कुतो हेतोः प्रियसुहृत्संघातः परित्यज्यते, गम्यतामेवेत्यर्थः। आस्तां तावत्प्रियतमे गते, गन्तुं निश्चितचेतस्यापि नायिका जीवितनिरपेक्षा बभूवेति भावः। सहोक्तिरलंकारः। यदुक्तम्–'भवति यथारूपोऽर्थः कुर्वन्नेवापरं तथा रूपम्। उक्तिस्तस्य समाना तेन समं या सहोक्तिः सा॥' यथा–'कष्टं सखे! क्व यामः सकलजगन्मन्मथेन सह तस्याः। प्रतिदिनमुपैति वृद्धिं कुचकलशनितम्बमित्तिभरः'॥

संदष्टेऽधरपल्लवे सचकितं हस्ताग्रमाधुन्वतो
मा मा मुञ्च शठेति कोपवचनैरानर्तितभ्रूलता।
सीत्काराञ्चितलोचना सरभसं यैश्चुम्बिता मानिनी
प्राप्तं तैरमृतं श्रमाय मथितो मूढैः सुरैः सागरः॥३६॥

तैरेव पीयूषं लब्धं यैः सहर्षोत्तरलं मनस्विनी चुम्बिता, अधररस एवामृतमित्यर्थः। यावदप्रसादं हि मानिनी महान्तं संतापमुत्पादयति, प्रसन्ना च लोकोत्तरमानन्दम्। अत एवाचेतनैरमरैः खेदाय विलोडितः

क्षीरोदः। किंकुर्वती चुम्बिता? दष्टाधरत्वात्कराग्रं समन्ताद्धुन्वती। कथं?। सचकितम्। चकितमत्र चमत्कृतिरेव। क्व सति? ओष्ठप्रवाले हठात्खंडिते सति। किंविशिष्टा?। सविलासतरङ्गितभ्रूवल्लिः। कैर्विशिष्टा?। मा मा मुञ्चशठेति कोपवचनैः। मा मेति पर्याकुलताप्रतिपादकाभ्यां शब्दाभ्याम्, मुञ्चेति क्रियया च संभोगाभियोगस्य निषेधः; न तु ताभ्यां मुञ्चेति क्रियायाः। कोपस्य वचनैरेव, न तु वास्तवेन कोपेन। पुनः कीदृशी?। सीत्काराञ्चितलोचना सीत्कारपूर्वकं विलासदर्शास्पर्शे न कूणिते लौचने यया सा तथोक्ता। कलहरूपं चैतत्सुरतम्। यदुक्तम्–'कलहरूपं सुरतमाचक्षते। विवादात्मकत्वाद्वामशीलत्वाञ्च कामस्य' इति। सीत्कारः कामिनीनां दयितस्पर्शसुखातियेन हृदयोल्लासचमत्कारपूर्वकः श्वसितात्मा मन्मथोद्दीपनो मुखस्य चेष्टाविशेषः। आक्षेपोऽलंकारः। यथा–'कुतः कुवलयं कर्णे करोषि कलभाषिणी। किमपाङ्गमपर्याप्तमस्मिन्कर्मणि मन्यसे।।' अनुभवी वक्ता। यदपि चामी श्लोकाः संभोगमीर्ष्यामानं प्रणयमानेन, प्रणयमानमभिसरणेन, अभिसरणं प्रवासविप्रलम्भेन, तिरयन्ति तदपि कवेरभिसंधानम्। अतिनिरन्तरमेकरसोपनिबन्धोऽप्युद्वेजको भवति। यथा नाटकादावभिनेयः सान्तरोपनिबन्धो रसश्चमत्कारी स्यात्तथैवंविधकाव्येषु श्रव्योऽपीति। किलकिञ्चितं चात्र नाट्यालंकारः। यदुक्तम्–'कोधाश्रुहर्षभी-त्यादिसंकरः किलकिञ्चितम्।' यथा–'रतिक्रीडाद्यूते कथमपि समासाद्य समयं मया लब्धे तस्याः क्वणितकलकण्ठार्धमधरे। कृतभ्रूभङ्गासौ प्रकटित-विलक्षार्धरुदितस्मितक्रोधोद्भ्रान्तं पुनरपि विदध्यान्मयि मुखम्।।' 'सानन्दान्तः कुट्टमिते कुप्येत्केशाधरग्रहे' इत्यनेन कुट्टमितमपीति।।

सुप्तोऽयं सखि! सुप्यतामिति गताः सख्यस्ततोऽनन्तरं
प्रेमावेशितया मया सरलया न्यस्तं मुखं तन्मुखे।
ज्ञातेऽलीकनिमीलने नयनयोर्धूर्तस्य रोमाञ्चतो
लज्जासीन्मम तेन साप्यपहृता तत्कालयोग्यैः क्रमैः।।३७।।

हे सखि! अयं ते दयितः सुप्तस्तस्मादस्माभिरपि सुप्यतामिति मां प्रत्युक्त्वा सख्यो गताः। ततः प्रघटनानन्तरं प्रेमग्रहगृहीतया तत्रापि प्राञ्जलया मया प्रियमुखे स्वमुखं निवेशितम्। अथ तस्य धूर्तस्य

रोमाञ्चचिह्नेन नेत्रयोर्मिथ्यासंकोचने ज्ञाते मम व्रीडा बभूव। तेन च संभोगसमयोचिताभिर्नीवीव्यपनयनप्रायाभिः परिपाटीभिः सापि लुण्ठिता। कोऽर्थः? अहमपि तत्कालोचितप्रवृत्तिरभूवम्। सुप्यतामिति पदस्याग्रे उक्त्वेत्यध्याहरणीयम्। सुप्तमुखचुम्बनं च नायिकानां रागोद्दीपनम्। यदुक्तम्– 'सुप्तस्य मुखमालोकयन्त्याः स्वाभिप्रायेण चुम्बनं रागोद्दीपनम्' इति। यच्च तेन रिरंसुना विजनमाकाङ्क्षातालीकनिमीलनं कृतं तत्सख्यो जानन्ति, अत एवायमित्यर्थान्तरसंक्रमितत्वेन धूर्तोऽस्मन्निर्गमाय सुप्त इत्युपन्यस्य स्वयमुत्थाय गताः। अर्थान्तरसंक्रमितस्योदाहरणमेतत्– 'स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः। कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव॥' अत्र हि पितृमरणादिदुःखसहनक्षमत्वविशिष्टो राम इति संज्ञा प्रतीयते, न तु संज्ञिमात्रम्। यदुपज्ञेन ध्वनिवर्त्मना संचरमाणाः सचेतसः प्रहर्ष प्राप्नुवन्ति तेषामाचार्याणामुक्तिषु मीमांसायां के वयम्? परं तथाप्यात्मावबो-धार्थमिदमुदाहरणं परामृशामः–ननु सर्वसहत्वे हेतुभूतकठोरहृदयत्वेनैव राम इति संज्ञिनो वैशिष्ट्यमुच्यते। यदि कठोरहृदयत्वमत्र सर्वसहत्वे हेतुभूतमभविष्यत्तदा राम इति पदमेव न प्रायोक्ष्यत। वैदेही तु कथं भविष्यतीत्यनेनैव दाशरथिप्रतीतेः। तस्मात्कठोरहृदयत्वविशिष्टस्यैव संज्ञिनस्तत्त्वान्तरं ध्वननीयम्। येन मया प्रवासकाले मातृभिः स्थाप्यमाना त्वमयोध्यायामुपेक्षिता सोऽहं शतकोटिकोटिकर्कशचेताः सर्वंसहः। नहि मया त्वमाहूता, अपि तु स्वयमागता। यथा–'कृतककुपितैर्बाष्पा-म्भोभिः सदैन्यविलोकितैर्वनमपि गता यस्य प्रीत्या धृतापि तथाम्बया। नवजलधरश्यामाः पश्यन्दिशो भवतीं विना कठिनहृदयो जीवत्येव प्रिये स तव प्रियः॥' यच्चालोचनकारेण पितृमरणादिदुः खसहनक्षमत्वं ध्वनिविषयीकृतम्–तदसत्; दुःखस्य विजातीयत्वात्। नहि प्रियाविरहसंतप्तः पुमाञ्जीवतो लोकान्तरितस्य वा पितुः स्मरति॥ काचिन्मानिनी बहुभिरुपायैरतिनिर्बन्धप्रसादनेन गतकल्पं मानं परित्यक्तुमनाः प्रियं प्रति ब्रवीति–

कोपो यत्र भ्रुकुटिरचना निग्रहो यत्र मौनं
यत्रान्योन्यस्मितमनुनयो दृष्टिपातः प्रसादः।
तस्य प्रेम्णस्तदिदमधुना वैशसं पश्य जातं
त्वं पादान्ते लुठसि न च मे मन्युमोक्षः खलायाः॥३८॥

तस्यावयोरेवंविदितस्य प्रेम्णस्तदिदमतिगर्हितमधुना वैशसं विनाशो जातः। पश्य, मान्धो भूः। तस्य कस्येत्याह–यत्र प्रणयकलहेषु भ्रुकुटेरभिनय एव रोषः। वाक्पारुष्येणापि मनसो दूषयितुमशक्यत्वाद्वचननिरोध एव यस्मिन्निग्रहः। क्रीडाकमलादिनापि ताडनस्य दुष्करत्वात्परस्परमनुवृत्तिवशीकरणव्यञ्जकमीषद्धसितमेव प्रसादनम्। सामदानाद्युपायानामपि भेदसूचकत्वात्। उभयोरपि तुल्यकालमेव प्रसादनमभिलषितमिति प्रतिपादयितुमन्योन्यशब्दप्रयोगः। दृष्टिक्षेप एव यत्रानुग्रहः। चरणपतनाद्यसंभवे बाहौ धृत्वोत्थापनादिसंप्रतिपत्तेरभावात्। कीदृशं प्रेम्णो वैशसमित्याह–त्वमुरःस्थलैकधारणीयः पादसमीपे लुठसि, न तु पादयोः; अपराधातिशयाभावात्। न च मे दुर्जन्याः स्वान्तस्थस्य क्रोधशल्यस्य परित्यागः। कोऽर्थ? तथा निःशङ्केन किमप्याचरितं यथाहमप्यनन्यशरणा ते दुर्जनी जाता? अवसरोऽलंकारः। यदुक्तम्–'अर्थान्तरमुत्कृष्टं सरसं यदि वोपलक्षणीक्रियते। अर्थस्य तदभिधानं प्रसङ्गतोयत्र सोऽवसरः॥' यथा–'तदिदमरण्यं यस्मिन्दशरथवचनानुपालनव्यसनी। निवसन्बाहुसहायश्चकार रक्षःक्षयं रामः॥' धीराधीरा प्रगल्भा (मध्या) नायिका। चतुर्थवाक्ये 'यत्र' शब्दप्रयोगाभावादुपक्रमभङ्गः॥

सुतनु! जहिहि मौनं पश्य पादानतं मां
न खलु तव कदाचित्कोप एवंविधोऽभूत्।
इति निगदति नाथे तिर्यगामीलिताक्ष्या
नयनजलमनल्पं मुक्तमुक्तं न किंचित्॥३८॥

मानिन्या मानत्यागसूचकं बाष्पसलिलमस्तोकं दुर्निवारत्वेन मुक्तम्, प्रतिवचनं च न किंचिदुदीरितम्। किंविशिष्टया? तिर्यगामीलिताक्ष्या

अपराधक्षपणलक्षणयापमानलज्जया साचि यथा भवत्येवं बाष्पनिरोधबुध्द्या समन्तात्संकोचिते अक्षिणी यया सा तथोक्ता तया। क्व सति? नाथे निर्बन्धेनेति निगदति सति। इति किम्? हे सुतनु! मौनं त्यज। मानजनितातिकार्कश्याद्वाङ्निरोधहृदयाध्माननिरुच्छ्वासात्कुसुमशरजयश्री-कार्मणमङ्गनिर्माणमिदं दुर्दशां मा नैषीरिति भावः। अथवा यदि वचनामृतैरभिषिच्य मां संतप्तं नाह्लादयसि तर्हि चरणपतितं दृष्टिप्रसादेन संभावय। आत्मनः प्रियामानात्मकविप्रलम्भदुः सहताकारणमाह–निश्चयेन तव जातु कदाचिदीदृशः क्रोधो नासीत्। यदि चाभविष्यत्तदातत्संस्कार-वशादिदानीमपि सहिष्ये॥

कश्चिन्नर्मविदग्धो वियोगी तदेकतानेन मानिनीसर्वस्वमनुध्या यति–

गाढालिङ्गनवामनीकृतकुचप्रोद्धूतरोमोद्गमा
सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा।
मा मा मानद! माति मामलमिति क्षामाक्षरोल्लापिनी
सुप्ता किं नु मृता नु किं मनसि किं लीना विलीना नु किम्॥४॥

किं नु शयिता, उतस्विदुपरतैव? अथवान्तःकरणेऽभेदं प्राप्ता, आहोस्विद्द्रवतां ययौ? इत्यमुना संदेहेनानिर्वचनीयावस्था। मदकल-कलहंसचञ्चुकोटित्रोटितकोमलमृणालिनीकिसलयवत्परिक्लान्तैरङ्गकैः प्राभातिकनीलेन्दीवरवन्मुकुलितेन लोचनयुगलेन विलयं गच्छन्ती नोपलब्धेत्यर्थः। तस्यापि तत्कालमानन्देन मन्दचेतनत्वात्। केन क्रमेणैवं-विधा बभूवेत्याह–गाढेत्यादि। अतिनिर्भराश्लेषेणासवामनौ वामनौ कृतौ यौ कुचौ तत्र प्रकर्षेणोद्भूता पुलकोन्दमो यस्याः सा तथोक्ता। कथमुल्लापिनीति। मा, मा, मानद मानखण्डन! मा अतिशयेन। मामलमित्यत्र पीडयति क्रियां विना पर्याकुलताद्योतकमर्धोक्तम्। मा मेत्यादि पौनरुक्त्यं च सुन्दरम्। अत्रापि यदि कथ्यते तदा वधू रुष्यति, यदि मौनाय्यते तदगृहं नश्यति; तथापि करुणवीभत्सस्मारकं मृतेति पदं न मानयामः। तस्मात् 'किं म्लाना शयिता न किं मनसि मे लीना विलीना नु किम्' इति पठिष्यामः। संशयोऽलं कारः। यदुक्तम्–'वस्तुनि यत्रैकस्मिन्ननेकविषयतु भवति संदेहः। प्रतिपत्तुः सादृश्यादनिश्चयः संशयः स इति'॥

अभिनवस्नुषा प्रथमनर्मारम्भे किं करोतीत्याह–

पटालग्ने पत्यौ नमयति मुखं जातविनया
हठाश्लेषं वाञ्छत्यपहरति गात्राणि निभृतम्।
न शन्कोत्याख्यातुं स्मितमुखसखीदत्तनयना
ह्रिया ताम्यत्यन्तः प्रथमपरिहासे नववधूः॥४१॥

वस्त्राञ्चलाकर्षिणि प्रिये किंचिदङ्गीकाराज्जातप्रश्रया मुखं नमयति। बलात्कारेण परिरम्भमाकाङ्क्षति सत्यङ्गानि निभृतं यथा भवत्येवमन्यतो नयति, न तु मध्यावत्सभ्रूभङ्गाभ्यसूयाभिनयपूर्वकमपहरति। अत्रैवावसरे स्मितमुखीं वरसंनिधि प्रापयितुमागतां सहचरीं प्रति क्षिप्तलोचना तत्कालोचितप्रियप्रश्नोत्तरमाख्यातुं न क्षमते। यदि कथमपि सखी नाभविष्यत्तदा सा कदाचित्किंचिदाख्यातुमप्यक्षमिष्यतेत्यर्थः। इत्थमन्तःकरणे लज्जया ताम्यति। लज्जा तस्याः प्रियतमस्वच्छन्दसंगमप्रतिकूला वैरिणी जातेत्यर्थः यदुक्तम्–'दूरादुत्कण्ठन्ते दयितानां संनिधौ तु लज्जन्ते। ताम्यन्ति वेपमानाः शयने नवपरिणया वध्वः॥' मुग्धानां च प्रियोपक्रान्तसंभोगच्छलारम्भ एवाकल्पिकेयमिति कौतुकिन्यः सख्यो न सत्वरमेव संनिधानमुज्झन्ति। जातिरलंकारः। यदुक्तम्–'संस्थानावस्थानक्रि-यादि यद्यस्य यादृशं भवति। लोके चिरप्रसिद्धं तत्कथनमनन्यथा जातिः॥' हरति रुचिरं गाढाश्लेषे यदङ्कमाकुला स्थगयति तथा यत्पाणिभ्यां मुखं परिचुम्बने। यदपि बहुशः पृष्टा किंचिद्ब्रवीत्यपरिस्फूटं रमयतितरां तेनैवासो मनोऽभिनवा वधूः॥' रते वामा मुग्धा नायिका। विहृतं नाम नाट्यालंकारः। 'प्राप्तकालं न यद्ब्रूयाद्व्रीडयाविहृतं हि तत्' इति॥

नापेतोऽनुनयेन यः प्रियसुहृद्वाक्यैर्न यः संहृतो
यो दीर्घं दिवसं विषह्य विषमं यत्नात्कथंचिद्धृतः।
अन्योन्यस्य हृते मुखे निहितयोस्तिर्यक्कथंचिद्दृशोः
स द्वाभ्यामतिविस्मृतव्यतिकरो मानो विहस्योज्झितः॥४२॥

स प्रणयमानो द्वाभ्यामतिशयेन विस्मृतानुसंधानः स्वयं विहस्य मुक्तः। कयोः सत्योः?। दृशोस्तिर्यक्कथंचिन्निक्षिप्ततोः?। क्व, मुखे। कस्य?। अन्योन्यस्य।

किंविशिष्टे?। कोपादन्यतो नीते। दृशोर्मुखे इत्युभयत्रान्योन्यस्येति संबन्धः। स कः?। यः प्रसादनेन नापगतः। यः सखीप्रभृतीनां वचनैर्न शमितः। यश्च वियोगव्यथया दीर्घं विषमं च दिवसं प्रतिपाल्य गतकल्पोऽपि लाघवशङ्कया यत्नात्कथंचित्कथमपि व्यवस्थापितः। 'यत्रासंभाव्यभावो-वा' इति विषममलंकारः॥

काचिन्मनस्विनी-दयितव्यलीकखेदं सख्याः कथयति–

गते प्रेमाबन्धे प्रणयबहुमाने विगलिते
निवृत्ते सद्भावे जन इव जने गच्छति पुरः।
तदुत्प्रेक्ष्योत्प्रेक्ष्य प्रियसखि! गतांस्तांश्च दिवसान्न
जाने को हेतुर्दलति शतधा यन्न हृदयम्॥४३॥

हे प्रियसखि! न वेद्मि किं कारणं यन्मे हृदयं शतधा न स्फुटति। कस्मिन्सतीत्याह–स्नेहानुबन्धे गते। अन्योन्यगुणवशीकारगौरवे गलिते। निष्प्रपञ्चनायां निवृत्तायाम्। विधेये प्रियतमे उदासीन इव गच्छति। किं कृत्वा हृदयं शतधा न याति? तत्पूर्वोक्तं पर्यालोच्येषद्गणयित्वेति (?) लोकोक्तिः न परं तदुष्प्रेक्षा। विधेयेन प्रेयसा सह व्यतीतांस्ताननिर्व-चनीयवासरान्, इदानींतनदुःखं प्राक्तनं सुखमनुस्मृत्येत्यर्थः। यथा किंचिदपक्वपात्रस्थितमवष्टम्भेन विना विदीर्यते तथा मानाध्मातं हृदयं प्रेमाबन्धेन विना किमिति न स्फूटतीत्युक्तिलेशः। नायिकाः खलु सानुरागमपि नायकमीर्ष्याकालेषु निरनुरागं व्यपदिशन्तीत्येकानुरागे नात्र शङ्कनीय इति॥

चिरविरहिणोरत्युत्कण्ठाश्लथीकृतगात्रयो-
र्नवमिव जगज्जातं भूयश्चिरादभिनन्दतोः।
कथमिव दिने दीर्घे याते निशामधिरूढयोः
प्रसरति कथा बह्वी दूनोर्यथा न तथा रतिः॥४४॥

बहुदिनवियोगिनोर्भागधेयैः संगतयोस्तरुणयोर्यथा लम्भकानुपलम्भकैर्भूयसी गृहदेशान्तरानुभूतवृत्तान्तकथा प्रसरति न तथा संभोगः। किंविशिष्टयोः?।

महता कष्टेन दीर्घेऽहनि व्यतीते सति रात्रिमधिरुढयो:। अथ च दीर्घं नि:श्रेणिकाप्रायं पदार्थमतिक्रम्योञ्चैरधिरुह्यते। प्राप्तयोरित्येतावन्मात्रे वाच्येऽधिरुढयोरिति लक्षणया लब्धोत्कर्षयोरित्यर्थ:। यथा कश्चिद-भिमानी गजस्कन्धाधिरूढ: संपूर्णमनोरथत्वेन किंचिन्न मानयति। दिन एव किंविशिष्टयोरित्याह–रत्युत्कण्ठाश्लथीकृतगात्रयो:। अस्मिन्दु-रात्मनि दिने गते प्राप्तैकान्तौ स्वच्छन्दं रंस्यावह इति सुरतोत्कलिकया शिथिलीकृतान्यङ्गानि याभ्यां तयो:। रिरंसोर्हि प्रतिक्षणमुद्धृषितहृद-यस्यावयवा: शिथिलीभवन्ति। पुन: कथंभूतयो:?। भूयो नूतनमिव संसारमभिलक्ष्यीकृत्य समुद्धृदो:। कदा?। चिरात्। कोऽर्थ: अद्य प्राग्विरहनिष्फलत्वेन जगन्नष्टमिति ताभ्यां चिन्तितम्। बह्वीशब्दस्यायम-भिप्राय:–रतिरपि बह्वी, परं कथामानेन न भवति। सुरतान्तरालेषु परस्परवृत्तान्तोपवर्णनप्रश्नपरम्पराभिर्विभावरी प्रयाति, निद्राया: कथैव नास्तीति तात्पर्यम्॥

दीर्घा वन्दनमालिका विरचिता दृष्ट्यैव नेन्दीवरै:
पुष्पाणां प्रकर: स्मितेन रचितो नो कुन्दजात्यादिभि:।
दत्त: स्वेदमुचा पयोधरभरेणार्घो न कुम्भाम्भसा
स्वैरेवावयवै: प्रियस्य विशतस्तन्व्या कृतं मङ्गलम्॥४५॥

यथा कश्चिद्वशीकर्तुकाम: सर्वाधिकारेषु स्वीयमेव कुटुम्बं नियुङ्क्ते तथा दयितस्य गृहं प्रविशत: कृशाङ्ग्या: स्वैरेवाङ्गैर्मङ्गलमुपढौकितम्। किं तदित्याह–दीर्घेत्यादि। उत्सवेषु या तोरणादिसंनिवेशनीया लोकप्रसिद्धा वन्दनमाला सा दृष्ट्यैव दीर्घा सूत्रिता, न तु कुबलयै:। कुसुमानामितस्तत: प्रक्षेप ईषद्धसितेनैव निर्मित:, न पुनर्मालत्यादिभि:। स्वेदस्यन्दिना स्तनप्राग्भारेणैवार्घ: संपादित:, नतु कलशतोयेन। दृष्ट्यैवेत्यत्र य एवकार: स एव स्मितेनेत्यत्र पयोधरभरेणेत्यत्र चानुवर्तते। वन्दनमालिकेत्यत्र स्वार्थे कप्रत्यय:। न तु ह्रस्वार्थे; तथासति दीर्घेत्यस्यानुपपद्यमानत्वात्। दैर्ध्येण स्निग्धश्यामलत्वेन पक्ष्मलत्वेन च दृष्ट्यैव यदर्थ: साधितस्तैरिन्दीवरै: किम्?। सौकुमार्येण वैशद्येन परिमलेन च स्मितेनैव यत्कार्यमनुष्ठितं तेन

पुष्पप्रकरेणालम्। काठिन्येन प्रथिम्ना सजलत्वेन गरिम्णा च पयोधरेणैव यद्विधेयं संपादितं तेन कुम्भाम्भसा पर्याप्तमित्याक्षेपोऽलंकारः। इन्दीवरैः कुन्दजात्यादिभिरिति बहुवचनापेक्षया दृष्टिस्मितयोरेकवचनेन महानुत्कर्षः। अयमवश्यं गृहप्रवेशो देशान्तरादागतस्यावधार्यमाणो रसपुष्टिमाधत्ते। अत एव तन्व्येति। 'भाविन्यागमने भर्तुरात्मानं च गृहं च या। अलंकरोति हर्षेण सा स्याद्वासकसज्जिका॥' इत्यनेन तत्कालं वासकसज्जा नायिका॥

अद्य त्वमन्यादृशी, वयमेव दुर्जनीभूताः स्मः, युवां पुनरभिन्नावेवेति सस्मितं सख्या प्रभाते पृष्टा काचित्तां प्रत्याह–

कान्ते सागसि शापिते प्रियसखीवेषं विधायागते
भ्रान्त्यालिङ्ग्य मया रहस्यमुदितं तत्संगमाकाङ्क्षया।
मुग्धे! दुष्करमेतदित्यतितमामुद्दामहासं बला–
दाश्लिष्य च्छलितास्मि तेन कितवेनाद्य प्रदोषागमे॥४६॥

सापराधे प्रेयसि यद्य स्मद्गृहमागच्छसि तदामुकशपथस्तवेति निवारितेऽप्यमुकसखीवेषं कृत्वा प्राप्ते समि मया निजवयस्याभ्रमेण परिरभ्य प्रियसंगमस्पृहया स दुरात्मा यद्येवं परिरभ्यत इत्यादिकमपि रहस्यमुक्तम्। अथ सिद्धसमीहितेन तेन शठेन मुग्धे यदेतत्त्वयोक्तं तन्मम दुष्करमित्युक्त्या निरतिशयेन सशब्दहासं यथा भवत्येवं हठादालिङ्ग्याद्य रजनीमुखसमये वञ्चितास्मि। तदाऽहं तमज्ञास्यम्। भवादृशीनां सखीनामेव भ्रमेण मुष्टास्मीति भावः। अत्र कामुकस्य हठाश्लेष उद्दामहासोपल भेन नासिकाया अपसरणं सूचयति। अन्यथा सखीभ्रमेण स्वयं कृताश्लेषायाः। कीदृशं हठालिङ्गनम्?। मुग्धे इत्यत्र पत्यौ सखीमोहः, रहस्यमुदितमित्यनेन काममोहश्च। रसान्तरं प्रसादनोपायः। यथा–'अभिव्यक्तालीकः सकल–विफलोपायविभवश्चिरं ध्यात्वा सद्यः कृतकृतकसंरम्भनिपुणम्। इतः पृष्टे पृष्टे किमिदमिति संत्रास्य सहसा कृताश्लेषां धूर्तः स्मितमधुरमाश्लिष्यति वधूम्॥' समयाभियोगश्चायं नायकस्य। यदुक्तम्–'प्रदोषे निशि तमसि च योषितो मन्दसाध्वसाः सुखेन सुरतव्यवसायिनयो रागवत्यश्च भवन्ति' इति। प्रदोषगमे छलितेत्युचितम्। अन्यस्यापि यस्य भूतादिच्छलनं भवति तस्य

प्रदोषे प्रायः श्रूयते। अद्य प्रदोषागमे इत्यत्राद्यशब्दो विचार्यते–यदैव सा छलिता तदैव नायकः संप्रतिपत्तिमात्रं कृता गत इति तावन्न घटते। यतो मानिनी सखीवेषप्रायोपायकष्टप्रसादिता सर्वां शर्वरीं लालनीया भवति। आगते च तस्मिन्प्रदोषसमायान्तरं कस्याग्रे कथं वा स्ववृत्तान्तं निवेदयति?। न चैवंविधानि वाक्यानि मनोगतानि घटन्ते। ततश्चाद्यशब्दः कथमुपपद्यते?। अत्रोच्यते–लोकोक्तिमात्रमेतत्। यथा व्यतीतरात्रिवृत्तान्तेऽप्युपवर्ण्यमाने अद्य रात्रौ मया स्वप्नो दृष्ट इति व्यवह्रियते, तथा अद्य प्रदोशागमे इत्यत्रापि॥

कश्चिद्वियोगी प्रियतमामानुवृत्तान्तमनुस्मरति–

आशङ्क्य प्रणतिं पटान्तपिहितौ पादौ करोत्यादरा-
व्याजेनागतमावृणोति हसितं न स्पृष्टमुद्वीक्षते।
मय्यालापवति प्रतीपवचनं सख्या सहाभाषते
तन्व्यास्तिष्ठतु निर्भरप्रणयिता मानोऽपि रम्योदयः॥४७॥

तन्व्यास्तावदास्तां निरन्तरमनुवृत्तिपरता, यावन्मानोऽपि रमणीयोदयः। सर्वास्ववस्थासु स्पृहणीयेति भावः। कथमित्याह–आशङ्क्येत्यादि। एष प्रणामं करिष्यतीति चेष्टाविशेषैरनुमीय प्रयत्नाद्वस्त्राञ्चलावगुण्ठितौ स्वचरणौ विदधाति, न त्वन्यतो नयति; कोपस्य स्वल्पत्वात्। पूर्वानुभूतस्य कस्यचिन्नर्मण उल्लेखेनाकस्मादागतं हास्यं किमिदमिति मिथ्यापदार्थनिर्वर्णनार्थं ग्रीवावलनापदेशेन रुणद्धि, व्यक्तनावलोकते, मय्यन्यतोमुखेऽन्तरान्तरा पश्यतीत्यर्थः। मयि वाङ्मिश्रणार्थमालापयुक्ते तदन्तरार्थं सख्या सह विपरीतवचनमाचष्टे। लेशोऽलंकारः। यदुक्तम्–'दोषीभावो यस्मिन्गुणस्य दोषस्य वा गुणीभावः। अभिधीयते तथाविधिकर्मनिमित्तः सः लेश इति'॥

यावन्त्येव पदान्यलीकवचनैरालीजनैः पाठिता
तावन्त्येव कृतागसो द्रुततरं संलप्य पत्युः पुरः।
प्रारेभे परतो यथा मनसिजस्येच्छा तथा वर्तितुं
प्रेम्णो मौग्ध्यविभूषणस्य सहजः कोऽप्येष कान्तः क्रमः॥४८॥

मुग्धा यावन्त्येव पदानि व्यलीकवचनैः कृत्वा सखीजनैः शिक्षिता तावन्त्येव कृतापराधस्य भर्तुरग्रे अनन्यसामान्योऽयमर्थो मयैव केवलं साधित इत्यद्भुतातिशयेन शुकवदुच्चार्यं तदनन्तरं यथा मनसिजस्येच्छा तथा चेष्टितमुपचक्रमे, संभोगप्रवणा वभूवेत्यर्थः। यतः प्रेम्णो मौग्ध्येन शोभमानस्याकृत्रिमः कोऽप्यनिर्वचनीयः सुन्दरः प्रकारः। अलीकवचनैरित्यत्रालीकशब्दो व्यलीकवदपराधार्थः। यथा–'अभिव्यक्तालीकः' इत्यादि। तेनापराधे यानि वचनान्युच्यन्ते तैरलीकवचनैः न तु प्रणयमानार्थं मिथ्यापराधारोपकैरिति; अन्यथा कृतागस इत्यस्यानुपपद्यमानत्वात्। संलप्येति क्त्वाप्रत्यनेन पूर्वकालतायां प्रतिपादितायां मनसिजयेच्छावर्तनस्य यद्यपि परत्वं स्वतःसिद्धं तथाप्यमुकं कृत्वा पश्चादमुकं कर्तव्यमिति लोकोक्त्या परतःशब्दो नाधिकः॥

दूरादुत्सुकमागते विवलितं संभाषिणि स्फारितं
संश्लिष्यत्यरुणं गृहीतवसने कोपाञ्चितभ्रूलतम्।
मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णेक्षणं
चक्षुर्जातमहो प्रंपचचतुरं जातागसि प्रेयसि॥४६॥

अहो आश्चर्यम्। यज्जातापराधे प्रियतमे मानिन्याश्चक्षुरनेकरूपतादक्षिणं संवृत्तम्। कथं तथा जातमित्याह–दूरादित्यादि। यदि तमपराधकारिणं पश्यामि तदा शिक्षां ग्राहयामीत्युत्पन्नकोपावेगेन दूरस्थे तस्मिन्नुत्सुकम्। सविधं प्राप्तेऽवधीरणयान्यतो नीतम्। वक्तुं प्रवृत्ते सत्यद्यापि निःशङ्को वदन्वर्तत इत्याक्षेपबुद्ध्या स्फारितम्। बलादालिङ्गितुमुपनते बहुमानयोग्यामेवं मां धृष्यतीति रोषेण लोहितम्। धृतवस्त्रे कोपकुञ्चितभ्रूलतम्। अत्रारुण-तासकाशादञ्चितभ्रूलतत्वस्योद्भटत्वेन सर्वेष्वपि भावेषु कोपहेतुकेषु सत्स्वपि विशेषतः कोपाञ्चितेत्यमुना कोपशब्दप्रयोगेण बहुतमानरोष एव पोषं प्रापितः। तस्मात्: 'किंचाञ्चितभ्रूलतम्' इति यत्कैश्चित्पाठान्तरं कृतं तद्व्यर्थश्रमपर्यालोचितमरमणीयं च मन्यामहे। पादप्रणामसंपर्के च बहुमानलाभात्प्रसादोन्मुखत्वव्यञ्जकेन बाष्पाम्बुना पूर्णा संवरणा-योपक्रान्ता ईक्षणक्रिया यस्य तत्तथोक्तम्। चक्षुरित्येकवचनमवज्ञाद्योतकम्। कर्तृक्रियादीपकमलंकारः॥

अङ्गानामतितानवं कुत इदं कस्मादकस्मामिदं
मुग्धे! पाण्डुकपोलमाननमिति प्राणेश्वरे पृच्छति।
तन्व्या सर्वमिदं स्वभावत इति व्याहृत्य पक्ष्मान्तर-
व्यापी बाष्पभरस्तया वलितया निःश्वस्य मुक्तोऽन्यतः॥५०॥

तन्व्या तत्कालमेव पराङ्मुखत्वेनान्यतो विवृत्तया बाष्पोत्पीडो निःश्वासपूर्वमुक्तः। किं कृत्वा?। इत्युदीर्य। इति किम्?। सर्वमिद मङ्गतानवादिकं क्व स्वभावादेव। सति?। प्राणेश्वरे मया सह यथाकथंचिदेव वाङ्मिश्रणं करोतीत्यनुसंधानेनेति पर्यनुयुञ्जाने। इति किम्?। हे मनोहरे! अवयवानामतिकार्श्यं कस्मादेतत् कुतश्चेदं पाण्डुगण्डफलकं मुखम्?। कथम्?। अकस्मात्। कोऽभिप्रायः? मया ते शरीरदौर्बल्यपाण्डुकपोलत्वसदृशं केमपि न चेष्टितमस्तीति स्वापराशपह्नवः। प्राणेश्वरशब्दस्य चायमभिप्रायः—य एव प्राणेश्वरः स एव यद्युदासीनवत्पृच्छति तदा जीवितव्यस्य किं कार्यमीति। अत एव निःश्वासपूर्वमन्यतो भूत्वाश्रुमोक्षः कृतः। व्याजोक्तिरलंकारः। यदुक्तम् 'व्याजोक्तिश्छद्मनोद्भिन्नवस्तु रूपनिगूहनम्'। यथा—'शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढ़ोल्लसद्रोमाश्चादिविसंस्थुलाखिलविधव्यासङ्गभङ्गा कुलः। हा शैत्यं तुहिनाचलस्य करयोरित्यूचिवान्सस्मितं शैलान्तःपुरमातृमण्डलगणैर्दृष्टोऽवताद्वःशिवः'॥

कश्चित्कुपितनायिकाप्रसादनारम्भनिरुपायः कस्यति रहःसहचरस्याग्रे निवेदयति—

पुरस्तन्व्या गोत्रस्खलनचकितोऽहं नतमुखः
प्रवृत्तो वैलक्ष्यात्किमपि लिखितुं दैवहतकः।
स्फुटो रेखान्यासः कथमपि स तादृक्परिणतो
गता येन व्यक्तिं पुनरवयवैः सैव तरुणी॥५१॥
ततश्चाभिज्ञाय स्फुरदरुणगण्डस्थलरुचा
मनस्विन्या रूढप्रणयसहसोद्गद्गद्गिरा।
अहो चित्रं चित्रं स्फुटमिति निगद्याश्रुकलुषं
रुषा ब्रह्मास्त्रं मे शिरसि निहितो वामचरणः॥५२॥(युगलम्)

तन्व्याः पुरतो वार्तान्तरेऽन्याङ्गनानामोच्चारणचकितोऽहं किंचिदवाञ्चितवदनः प्रतिकूलविधप्रेरितो वैलक्ष्यात्किंचिल्लिखितुं प्रवृत्तः। अथ मयि लिखत्येव केनाप्यनिर्वचनीयप्रकारेण व्यक्तः स कोऽपि रेखालेखस्तादृशं पारिपाकं गतो येन यस्या एव गोत्रस्खलनमापतितं सैव युवतिर्नामापेक्षया पुनरप्यङ्गैरभिव्यक्तिं जगाम। ततश्चित्रनायिकामुपलभ्य तया वामोऽथ च प्रतिकूलश्चरणश्चण्डिम्ना निक्षिप्तः। किंविशिष्टः?। रूपकालंकारेण ब्रह्मास्त्रम्। यथा वारंवारमतिप्रहारिणि शत्रावनन्योपायतया ब्रह्मास्त्रं मुच्यते तथा मयि प्रथममपराधिनि पुनर्गोत्रस्खलनकारिणि पश्चादन्याङ्गनाचित्रलेखिनि वामपादो न्यस्त इत्यर्थः। किं कृत्वा?। अश्रुकलुषं यथा भवत्वेवमित्यभिधाय। इति किम्?। अहो आश्चर्यमाश्चर्यमभिव्यक्तम्। कोऽभिप्रायः? लोकाः, पश्यत् दुरात्मनोऽस्य तस्यां तदेकतानताम्। गोत्रस्खलने न पर्याप्तमिदानीं तामेव लिखन्वर्तते। किंविशिष्टया सत्या निगद्य? आरूढप्रणयेत्यादि। प्रकर्षं प्राप्तेन प्रेमविशेषेण य एव मे तथा वशीभूत आसीत्स एवायमित्थमुद्वृत्तो जात इत्याश्चर्यकोपव्यञ्जकेन हासेन सह वर्तत इति सहसा उद्गतरोदनस्वना च गीर्यथा स्यात्तथा। कुटस्यादिः कुटादिः इति षष्ठी तत्पुरुषेण कुटादिसंबन्धाल्लिखितुमित्यत्र गुणप्रतिषेधसमर्थनम्, अन्था लेखितुमित्येव प्राप्नोति। यथा–'सृष्ट्वा सृष्ट्वा समस्तं जनमनुलिखता भूरिभाग्याक्षराणि क्षिप्रं विद्वल्ललाटे कथमपि विधिना लेखितुं विस्मृता श्रीः। दत्त्वास्मिन्हंसपादं मलयजतिलकच्छद्मना क्ष्मातलेन्दो हस्ते दत्तैः सुवर्णैः प्रतिकृति भवता शोधितो भालदेशः॥' यच्च लेखनारम्भे सैव तरुणी व्यक्तिं गता, तत्र नायकस्य तन्मयी चित्तवृत्तिर्निमित्तम्। चित्रकला च विलासिनां प्रसिद्धैव।